# संस्कृतव्याकरणम्

कक्षा १०



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतव्याकरणम्

## कक्षा १०

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८२

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते ।अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतव्याकरणविषयकपाठ्यक्रमस्याधारेण दशम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

सर्वप्रथमं प्रा.डा. माधवशरणः उपाध्याय, प्रा. ध्रुवप्रसादः ज्ञवाली, हरिः गौतम- प्रभृतीनां महानुभावानां कार्यदलेन लिखितमिदं पुस्तकं प्रा. ध्रुवप्रसादः ज्ञवाली, उपप्रा. उपेन्द्रः दाहाल, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, टुकराजः अधिकारी, राजुः श्रेष्ठ-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं च

प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
| --- | --- | --- |
| **प्रथमः** | अथ हलन्तपुँल्लिङ्गप्रकरणे : लिहादिशब्दानां रूपसिद्धिप्रक्रिया | १ |
| **द्वितीयः** | हलन्तपुँल्लिङ्गप्रकरणे : वाहन्तादिशब्दानां रूपसिद्धिप्रक्रिया | ७ |
| **तृतीयः** | हलन्तपुँल्लिङ्गप्रकरणे : मकारसकारान्तशब्दयो रूपसिद्धिप्रक्रिया | १६ |
| **चतुर्थः** | हलन्तपुँल्लिङ्गप्रकरणे : नकारान्तशब्दानां रूपसिद्धिप्रक्रिया | २४ |
| **पञ्चमः** | हलन्तपुँल्लिङ्गप्रकरणे : नकारान्तधकारान्तशब्दयो रूपसिद्धिप्रक्रिया | ३१ |
| **षष्ठः** | हलन्तपुँल्लिङ्गप्रकरणे : जान्तादिशब्दानां रूपसिद्धिप्रक्रिया | ४१ |
| **सप्तमः** | हलन्तपुँल्लिङ्गप्रकरणे : युष्मदस्मच्छब्दयो रूपसिद्धिप्रक्रिया | ४९ |
| **अष्टमः** | हलन्तपुँल्लिङ्गप्रकरणे : युष्मदस्मदोः समासान्वादेशादिव्यवस्था | ५९ |
| **नवमः** | हलन्तपुँल्लिङ्गप्रकरणे : दकारान्तादिशब्दानां रूपसिद्धिप्रक्रिया | ६६ |
| **दशमः** | हलन्तपुँल्लिङ्गप्रकरणे : चान्तादिशब्दानां रूपसिद्धिप्रक्रिया | ७३ |
| **एकादशः** | हलन्तपुँल्लिङ्गप्रकरणे : षकारान्तशब्दानां रूपसिद्धिप्रक्रिया | ८१ |
| **द्वादशः** | हलन्तपुँल्लिङ्गप्रकरणे : सकारान्तशब्दानां रूपसिद्धिप्रक्रिया | ८७ |
| **त्रयोदशः** | अथ हलन्तस्त्रीलिङ्गप्रकरणे : हलन्तस्त्रीलिङ्गशब्दानां रूपसिद्धिप्रक्रिया | ९५ |
| **चतुर्दशः** | अथ हलन्तनपुंसकलिङ्गप्रकरणे : हलन्तनपुंसकशब्दानां रूपसिद्धिप्रक्रिया | १०३ |
| **पञ्चदशः** | हलन्तनपुंसकलिङ्गप्रकरणे : चान्तादिशब्दानां रूपसिद्धिप्रक्रिया | ११० |
| **षोडशः** | अथ अव्ययप्रकरणे : अव्ययशब्द-निरूपणम् | ११४ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| **सप्तदशः** | अथ स्त्रीप्रत्ययप्रकरणे : स्त्रीत्वबोधकयोः टाब्ङीपोर्निरूपणम् | १२० |
| **अष्टादशः** | स्त्रीप्रत्ययप्रकरणे : आपि परे इकारादेशादिनिरूपणम् | १२७ |
| **एकोनविंशः** | स्त्रीप्रत्ययप्रकरणे : स्त्रीत्वबोधकस्य ङीपो निरूपणम् | १३७ |
| **विंशः** | स्त्रीप्रत्ययप्रकरणे : शब्दस्वरूपेण स्त्रियां ङीब्ङीषोर्विवेकः | १४६ |
| **एकविंशः** | स्त्रीप्रत्ययप्रकरणे : स्त्रियां विविधप्रत्ययानां निरूपणम् | १५५ |
| **द्वाविंशः** | स्त्रीप्रत्ययप्रकरणे : स्त्रियां विविधप्रत्ययानां निरूपणम् | १६८ |

अथ हलन्तपुँल्लिङ्गप्रकरणे

# लिहादिशब्दानां रूपसिद्धिप्रक्रिया

### ढत्वविधायकं विधिसूत्रम्-

**हो ढः ८ । २ । ३१**

**हस्य ढः स्याज्झलि पदान्ते च । 'हल्ङ्याप्-' इति सुलोपः, पदान्तत्वाद्धस्य ढः, जश्त्वचर्त्वे, लिट्, लिड् । लिहौ । लिहः । लिहम् । लिहौ । लिहः । लिहा । लिड्भ्याम् इत्यादि । लिट्त्सु, लिट्सु ।**

(हः, ढः, झलि, पदस्य अन्ते, च)

**सरलार्थः–** झलि परतः पूर्वस्य हकारस्य, पदान्ते विद्यमानस्य हकारस्य च स्थाने ढकारादेशो भवति ।

लिह्शब्दाद् विहितायाः सुविभक्तेः सकारस्य "हल्ङ्याप्-" इति सूत्रेण लोपे जाते हकारस्य "सुप्तिङन्तं पदम्" इति पदान्तत्वादनेन सूत्रेण ढकारादेशे "झलां जशोऽन्ते" इत्यनेन जश्त्वेन डकारादेशे "वाऽवसाने" इत्यनेन विकल्पेन चर्त्वे कृते टकारादेश इत्यर्थः ।

लिह् + सु - लिह् + स् - लिह् - लिढ् - लिड् - **लिट्/लिड्** ।

लिह् + औ - **लिहौ** (वर्णयोगः) । लिह् + जस् - लिह् + अस् - लिहस् - लिहरू - लिहर् - **लिहः** । लिह् + अम् - **लिहम्** । लिह् + औट् - लिह् + औ - **लिहौ** । लिह् + शस् - लिह् + अस् - लिहस् - लिहरू - लिहर् - **लिहः** । लिह् + टा - लिह् + आ - **लिहा** । लिह् - भ्याम् - लिढ् + भ्याम् - लिड् + भ्याम् - **लिड्भ्याम्** । लिह् + भिस् - लिढ् + भिस् - लिड् + भिस् - लिड्भिरु - लिड्भिर् - **लिड्भिः** । हलादौ विभक्तौ (भ्यामादौ) "स्वादिष्वसर्वनामस्थाने" इत्यनेन पदत्वाद् 'हो ढः' इति ढत्वम्, 'झलां जशोऽन्ते' इत्यनेन जश्त्वमिति भावः ।

लिह् + सुप् - लिह् + सु - लिढ् + सु - लिड् + सु - लिड् + ध् (धुट्) सु - लिड् + त् सु - **लिट्त्सु/लिट्सु** ("डः सि धुट्" इति धुडागमविकल्पः) अत्र "न पदान्ताट्टोरनाम्" इति निषेधात् तकारसकारयोर्न ष्टुत्वम् ।

### घत्वविधायकं विधिसूत्रम्-

**दादेर्धातोर्घः ८ । २ । ३२**

**उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च । उपदेशे किम् ? अधोग् इत्यत्र यथा स्यात्, दामलिहमात्मन इच्छति दामलिह्यति, ततः क्विपि दामलिट्, अत्र मा भूत् ।**

(दादेः, धातोः, हः, घः, झलि, पदस्य अन्ते, च)

**सरलार्थः–** उपदेशकाले दकारादेर्धातोर्हस्य घकारादेशो भवति झलि परे पदान्ते च । 'हो ढः' इत्यस्य बाधकं सूत्रमिदम् ।

अधोग् इत्यत्र अनेन सूत्रेण घकारादेशः स्यादित्येतदर्थम् उपदेशकाले दकारादेर्धातोरित्युक्तम् । अस्य हि दुह्धातोः लङ्, अडागमः, तिप्, शप्, तस्य लुक्, लघूपधगुणः, हल्ङ्यादिना तिपो लोपः, 'दादेः -' इति हस्य घः, 'एकाचो बशः -' इति भष्भावेन दकारस्य धकारः, जश्त्वम्, चर्त्वमिति सिद्धिक्रमः । अत्र घत्वप्रवृत्तिवेलायां दुह्धातोर्दकारादित्वं नास्ति, कृते अडागमे 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषया अकारादित्वात् । अतोऽत्र घत्वं न प्राप्नोति । उपदेशग्रहणे तु नायं दोषः, घत्वप्रवृत्तिवेलायां दुहेरत्र दकारादित्वाभावेऽपि धातूपदेशकाले दादित्वादिति भावः । एवमेव दाम लेढीति दामलिट् । तमात्मन इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यचि "सनाद्यन्ता धातवः" इति धातुसंज्ञायां तिपि शपि दामलिह्यतीति रूपम् । ततः क्यजन्तात् कर्तरि क्विपि अल्लोपे यलोपे च दामलिह्शब्दात् सोर्लोपे 'होढः' इति ढत्वे जश्त्वे 'वावसाने' इति चर्त्वविकल्पे दामलिट्, दामलिड् इति रूपमित्यर्थः । अत्र घत्वं न भवेदित्येतदर्थमप्युपदेशग्रहणमस्ति । उपदेशग्रहणे तु घत्वमत्र न भवति, धातूपदेशे दामलिह् इति सुब्धातोः पाठाभावादिति भावः ।

### भष्भावविधायकं विधिसूत्रम्-

**एकाचो बशो भष् झषन्तस्य स्ध्वोः ८ । २ । ३७**

**धातोरवयवो य एकाज् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे पदान्ते च । एकाचो धातोः - इति सामानाधिकरण्येनान्वये त्विह न स्यात् - गर्दभमाचष्टे गर्दभयति, ततः क्विप्, णिलोपः, गर्धप् । झलीति निवृत्तम् स्ध्वोर्ग्रहणसामर्थ्यात् । तेनेह न - दुग्धम्, दोग्धा । व्यपदेशिवद्भावेन धात्ववयवत्वाद् भष्भावः, जश्त्वचर्त्वे धुक्, धुग् । दुहौ । दुहः । घत्वचर्त्वे धुक्षु ।**

(धातोः, एकाचः, झषन्तस्य, बशः, स्ध्वोः, पदस्य अन्ते, च, भष्)

**सरलार्थः–** धातोरवयवो य एकाच् झषन्तः, तदवयवस्य बशः स्थाने भष् आदेशो भवति सकारे, ध्वशब्दे च परतः, पदान्ते च । अनेन सूत्रेण वर्गतृतीयस्य स्थाने वर्गचतुर्थादेशो विधीयते । एकाचो धातोः झषन्तस्येत्यन्वये गर्दभ् इत्यस्य सुब्धातोरनेकाच्त्वाद् दकारस्य भष्भावो न स्यात् । धात्ववयवस्य झषन्तस्येत्यन्वये तु दभ् इति एकाचो झषन्तस्य धात्ववयवत्वात् तदवयवस्य दस्य भष्भावो निर्बाध इति भावः ।

दुह् + सु - दुह् + स् - दुह् - दुघ् - धुघ् - धुग् - **धुक्/धुग्** ।

दुह् + औ - **दुहौ** । दुह् + जस् - दुह् + अस् - दुहस् - दुहरू - दुहर् - **दुहः** ।

दुह् + अम् - **दुहम्** । दुह् + औट् - दुह् + औ - **दुहौ** ।

दुह् + टा - दुह् + आ - **दुहा** । दुह् + भ्याम् - दुघ् + भ्याम् - धुघ् + भ्याम् - धुग् + भ्याम् - **धुग्भ्याम्** ।

दुह् + भिस् - दुघ् + भिस् - धुघ् + भिस् - धुग् + भिस् - धुग् + भिरु - धुग्भिर् - **धुग्भिः** । दुह् + ङे - दुह् + ए - **दुहे** ।

दुह् + भ्यस् - दुघ् + भ्यस् - धुघ् + भ्यस् - धुग्भ्यस् - धुग्भ्यरु - धुग्भ्यर् - **धुग्भ्यः** ।

दुह् + ङसि - दुह् + अस् - दुहस् - दुहरू - दुहर् - **दुहः** ।

दुह् + ङस् - दुह् + अस् - दुहस् - दुहरू - दुहर् - **दुहः** ।

दुह् + ओस् - दुहोस् - दुहोरु - दुहोर् - **दुहोः** ।

दुह् + आम् - **दुहाम्** । दुह + ङि - दुह् + इ - **दुहि** ।

दुह् + सुप् - दुह् + सु - दुघ् + सु - धुघ् + सु - धुग् + सु - धुक् + षु - **धुक्षु** ।

### वैकल्पिक-ढत्वविधायकं विधिसूत्रम्-

**वा द्रुहमुहष्णुहष्णिहाम् ८ । २ । ३३**

**एषां हस्य वा घः स्याज्झलि पदान्ते च । पक्षे ढः । ध्रुक् ध्रुग्/ध्रुट्, ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम्/ध्रुड्भ्याम् । ध्रुक्षु/ध्रुट्त्सु, ध्रुट्सु । एवं मुहष्णुहष्णिहाम् ।**

(द्रुह-मुह-ष्णुह-ष्णिहाम्, धातोः, हः, घः, वा, झलि, पदस्य अन्ते च)

**सरलार्थः-** 'द्रुह्, मुह्, ष्णुह्, ष्णिह्' एतेषां शब्दानां हकारस्य स्थाने विकल्पेन घकारादेशो भवति, झलि परे पदान्ते च । अनेन घादेशाभावपक्षे "हो ढः" इत्यनेन हकारस्य ढकारादेशश्च भवति ।

द्रुह् + सु - द्रुह् + स् - द्रुह् - द्रुघ् - ध्रुघ् - ध्रुग् - **ध्रुक्/ध्रुग्** । विकल्पेन घत्वाभावपक्षे-

द्रुह् + सु - द्रुह् + स् - द्रुह् - द्रुढ् - ध्रुढ् - ध्रुड् - **ध्रुट्/ध्रुड्** ।

द्रुह् + औ - द्रुहौ । द्रुह् + जस् - द्रुह् + अस् - द्रुहरू - द्रुहर् - **द्रुहः** ।

द्रुह् + भ्याम् - द्रुघ् + भ्याम् - ध्रुघ् + भ्याम् - **ध्रुग्भ्याम्** । विकल्पेन घत्वाभावपक्षे-

द्रुह् + भ्याम् - द्रुघ् + भ्याम् - ध्रुढ् + भ्याम् - **ध्रुड्भ्याम्** ।

द्रुह् + सुप् - द्रुह् + सु - द्रुघ् + सु - ध्रुघ् + सु - ध्रुग् + सु - ध्रुक् + सु - ध्रुक् + षु - **ध्रुक्षु** । विकल्पेन घत्वाभावपक्षे-

द्रुह् + सुप् - द्रुह् + सु - द्रुढ् + सु - ध्रुढ् + सु - ध्रुड् + सु - ध्रुड् + ध् (धुट्) सु - ध्रुड् + त् सु - **ध्रुट्त्सु/ध्रुट्सु** ।

| लिह्-शब्दस्य रूपावली | | | दुह्-शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| लिट्/लिड् | लिहौ | लिहः | धुक्/धुग् | दुहौ | दुहः |
| लिहम् | लिहौ | लिहः | दुहम् | दुहौ | दुहः |
| लिहा | लिड्भ्याम् | लिड्भिः | दुहा | धुग्भ्याम् | धुग्भिः |
| लिहे | लिड्भ्याम् | लिड्भ्यः | दुहे | धुग्भ्याम् | धुग्भ्यः |
| लिहः | लिड्भ्याम् | लिड्भ्यः | दुहः | धुग्भ्याम् | धुग्भ्यः |
| लिहः | लिहोः | लिहाम् | दुहः | दुहोः | दुहाम् |
| लिहि | लिहोः | लिट्त्सु/लिट्सु | दुहि | दुहोः | धुक्षु |
| हे लिट्/ड् ! | हे लिहौ ! | हे लिहः ! | हे धुक्/ग् ! | हे दुहौ ! | हे दुहः ! |

## रूपसाधनप्रकारः

### लिट्/लिड्

लिह्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ, अनुबन्धलोपे, सकारस्य "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण लोपे 'लिह्' इति स्थिते "हो ढः" इत्यनेन हकारस्य ढकारादेशे, "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे 'लिड्' इति जाते, "वाऽवसाने" इति सूत्रेण विकल्पेन चर्त्वे 'लिट्' इति, चर्त्वाभावपक्षे 'लिड्' इति च रूपद्वयं सिद्धम् ।

### धुग्भ्याम्

दुह्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया द्विवचने भ्याम्विभक्तौ "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण दुह्शब्दस्य पदसंज्ञायां "हो ढः" इत्यनेन प्राप्तं ढत्वं प्रबाध्य "दादेर्धातोर्घः" इति सूत्रेण घादेशे "एकाचो बशो भष् झषन्तस्य स्ध्वोः" इति सूत्रेण भष्भावेन दकारस्य स्थाने धकारादेशे 'धुघ् + भ्याम्' इति जाते "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे 'धुग्भ्याम्' इति रूपं सिद्धम् ।

## अभ्यासः

### १. रिक्तस्थानं पूरयत

(क) झलि परे पदान्ते च … … … … इति सूत्रेण हस्य ढत्वं भवति ।

(ख) 'धुग्भिः' इत्यत्र … … … … सूत्रेण घादेशो विधीयते ।

(ग) भष्भावे कृते वर्गतृतीयस्य स्थाने … … … … आदिश्यते ।

(घ) दादेर्धातोर्हस्य विकल्पेन घत्वविधायकं सूत्रं … … … … इत्यस्ति ।

(ङ) "वा द्रुहमुहष्णुहष्णिहाम्" इति सूत्रं … … … … करोति ।

### २. परस्परं मेलयत

| | |
|---|---|
| मुक् | वर्णयोगमात्रम् |
| लिट्त्सु | भष्भावः |
| लिहौ | वैकल्पिकघत्वम् |
| धुग्भ्याम् | धुडागमः |

### ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

लिह्+सु, दुह्+सुप्, द्रुह्+भ्यस्, मुह्+भ्याम्, स्निह्+ओस्, स्नुह्+भिस् ।

### ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

लिड्भ्यः, धुग्भिः, ध्रुट्त्सु, स्निक्, मुट् ।

### ५. अधो लिखितप्रश्नानामतिसङ्क्षेपेण उत्तरं लिखत

(क) लिह्-शब्दस्य प्रातिपदिकसंज्ञा केन सूत्रेण भवति ?

(ख) भ्यामादिहलादौ विभक्तौ परे पदसंज्ञाविधायकं सूत्रं किम् ?

(ग) "हो ढः", "दादेर्धातोर्घः" इत्यनयोरेकत्र प्राप्तौ किं सूत्रं प्रवर्तते ?

(घ) 'धुक्षु' इत्यत्र क्षकारे कयोर्वर्णयोः संयोगोऽस्ति ?

(ङ) दुह्-शब्दस्य पञ्चम्या द्विवचने किं रूपम् ?

(च) डकारात् परस्य सस्य केन धुडागमो विधीयते ?

(छ) दुह्-शब्दस्य कोऽर्थः ?

## ६. अधस्तनप्रश्नानामुत्तरं दत्त

(क) 'एकाचो धातोः झषन्तस्य भष्' इत्यर्थे 'गर्दभ्' इत्यत्र दकारस्य भष्भावः कथं न भवति ?

(ख) "दामलिट्" इत्यत्र "दादेर्धातोर्घः" इत्यनेन घादेशाभावे कारणं किम् ?

(ग) हलादिविभक्तयः काः ? भ्यामादिहलादौ विभक्तौ परायामङ्गस्य केन सूत्रेण का संज्ञा भवति ?

(घ) 'अधोक्' इत्यत्र 'दादेर्धातोर्घः' इत्यस्य प्रवृत्तिः कथं सुलभा ?

(ङ) द्रुह्-शब्दस्य सर्वाणि रूपाणि लिखत ।

## ७. निम्नाङ्कितानां प्रयोगाणां ससूत्रं रूपसाधनप्रकारं दर्शयत

लिह् + सु - लिह् + स् - लिह् - लिढ् - लिड् - **लिट्/लिड्** ।

लिह् + भ्याम् - लिढ् + भ्याम् - लिड् + भ्याम् - **लिड्भ्याम्** ।

दुह् + सुप् - दुह् + सु - दुघ् + सु - धुघ् + सु - धुग् + सु - धुक् + सु - धुक् + षु - **धुक्षु** ।

द्रुह् + सु - द्रुह् + स् - द्रुह् - द्रुघ् - ध्रुघ् - ध्रुग् - **ध्रुक्/ध्रुग्,** विकल्पेन घकारादेशाभावपक्षे- द्रुह् - द्रुढ् - ध्रुढ् - ध्रुड् - **ध्रुट्/ध्रुड्** ।

## ८. अधस्तनसूत्राणां सरलार्थं लिखत

(क) हो ढः ।

(ख) दादेर्धातोर्घः ।

(ग) एकाचो बशो भष् झषन्तस्य स्ध्वोः ।

(घ) वा द्रुहमुहष्णुहष्णिहाम् ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

लिट्, धुग्भिः, लिहे, द्रुहः, लिहम्, दुहाम्, स्निहः, मुक्, स्नुट्, मुहः ।

## हलन्तपुँल्लिङ्गप्रकरणे

# वाहन्तादिशब्दानां रूपसिद्धिप्रक्रिया

### संप्रसारणसंज्ञाविधायकं सूत्रम्-

**इग्यणः संप्रसारणम् १ । १ । ४५**

**यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् ।**

(यणः, इक्, सम्प्रसारणम्)

**सरलार्थः-** यण्-वर्णानां स्थाने विधीयमानाः इक्-वर्णाः संप्रसारणनाम्ना ज्ञायन्ते ।

### ऊठादेशविधायकं विधिसूत्रम्-

**वाह ऊठ् ६ । ४ । १३२**

**भस्य वाहः संप्रसारणमूठ् स्यात् ।**

(भस्य, वाहः, सम्प्रसारणम्, ऊठ्)

**सरलार्थः-** भसंज्ञकस्य 'वाह्' इति शब्दस्वरूपस्य वकारस्य 'ऊठ्' इति संप्रसारणं भवति । ऊठि ऊकारः अवशिष्यते । अजादौ विभक्तौ 'यचि भम्' इति सूत्रेण पूर्ववर्त्तिनः शब्दस्य भसंज्ञा ।

### पूर्वरूपैकादेशविधायकं विधिसूत्रम्-

**संप्रसारणाच्च ६ । १ । १०८**

**संप्रसारणादचि पूर्वरूपमेकादेशः स्यात् । 'एत्येधत्यूठ्सु' इति वृद्धिः विश्वौहः । विश्वौहेत्यादि । छन्दस्येव ण्विः इति पक्षे णिजन्ताद्विच् ।**

(संप्रसारणाद्, अचि, पूर्वः, एकः पूर्वपरयोः)

**सरलार्थः-** संप्रसारणादचि परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति ।

विश्ववाह् + शस् - विश्ववाह् + अस् - विश्व ऊठ् आह् + अस् - विश्व ऊ आह् + अस् - विश्व ऊह् (पूर्वरूपम्) + अस् - विश्वौह् (वृद्धिः) + अस् - विश्वौहस् - विश्वौहरु - **विश्वौहः** ।

विश्ववाह् + टा - विश्ववाह् + आ - विश्व ऊठ् आह् + आ - विश्व ऊ आह् + आ - विश्व ऊह् + आ - विश्वौह् + आ - **विश्वौहा** ।

विश्ववाह् + भ्याम् - विश्ववाढ् + भ्याम् - विश्ववाड्भ्याम् ('हो ढः' इति ढत्वम्, जश्त्वम्) ।

### आमागमविधायकं विधिसूत्रम्-

**चतुरनडुहोरामुदात्तः ७।१।९८**

**अनयोराम् स्यात्सर्वनामस्थाने परे, स चोदात्तः ।**

(चतुरनडुहोः, आम्, उदात्तः, सर्वनामस्थाने)

**सरलार्थः–** चतुर्शब्दस्य अनडुह्शब्दस्य च सर्वनामस्थाने विभक्तौ परे आमागमो भवति, आकार उदात्तश्च विधीयते । आमागमः "मिदचोऽन्त्यात्परः" इति नियमेन अन्त्यादचः परो भवति ।

### नुमागमविधायकं विधिसूत्रम्-

**सावनडुहः ७।१।८२**

**अस्य नुम् स्यात्सौ परे । 'आत्' इत्यधिकारादवर्णात्परोऽयं नुम् । अतो विशेषविहितेनापि नुमा आम् न बाध्यते । आमा च नुम् न बाध्यते । सोर्लोपः । नुम्विधिसामर्थ्यात् 'वसुस्रंसु -' इति दत्वं न । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । अनड्वान् ।**

(अनडुहः, अङ्गस्य, आत्, नुम्, सौ)

**सरलार्थः–** अनडुह्शब्दस्य सुविभक्तौ परतः नुमागमो भवति । अत्र 'आत्' इत्यस्य अधिकारादवर्णात्परोऽयं नुमागमः । तेन आमागमनुमागमयोरेकत्र समावेश एव भवति न तु बाध्यबाधकभावः । अतः 'अनडुह्'शब्दात् सौ आम्नुमागमौ यथायथं भवतः ।

अनडुह् + सु - अनडुह् + स् - अनडु आ (आम्) ह् + स् - अनड्वाह् + स् - अनड्वान् (नुम्) ह् + स् - अनड्वान्ह् - **अनड्वान्** ।

अनडुह् + औ - अनडु आ ह् + औ - अनड्वाह् + औ - **अनड्वाहौ** ।

अनडुह् + जस् - अनडुह् + अस् - अनडु आ ह् + अस् - अनड्वाह् + अस् - अनड्वाहस् - अनड्वाहरु - अनड्वाहर् - **अनड्वाहः** ।

### अमागम-विधायकं विधिसूत्रम्-

**अम् संबुद्धौ ७।१।९९**

**चतुरनडुहोरम् स्यात्संबुद्धौ । आमोऽपवादः । हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनडुहा ।**

(चतुरनडुहोः, अम्, सम्बुद्धौ)

**सरलार्थः–** चतुरनडुहोः शब्दयोः अमागमो भवति सम्बुद्धौ परे । "चतुरनडुहोरामुदात्तः" इति सूत्रेण विहितस्य आमः अपवादोऽयममागमः ।

अनडुह् + सु - अनडुह् + स् - अनडु अ (अम्) ह् + स् - अनड्वह् + स् - अनड्व न् (नुम्) ह् + स् - अनड्वन्ह् - अनड्वन् - **हे अनड्वन्** ।

अनडुह् + शस् - अनडुह् + अस् - अनडुहस् - अनडुहरु - अनडुहर् - **अनडुहः** ।

अनडुह् + टा - अनडुह् + आ - **अनडुहा** ।

### दकारादेशविधायकं विधिसूत्रम्-

**वसुस्रंसुध्वंस्वनडुहां दः ८ । २ । ७२**

**सान्तवस्वन्तस्य स्रंस्वादेश्च दः स्यात्पदान्ते । अनडुद्भ्यामित्यादि । सान्त इति किम् - विद्वान् । पदान्त इति किम् - स्रस्तम् । ध्वस्तम् ।**

(सः, वसुस्रंसुध्वंस्वनडुहाम्, दः, पदस्य अन्ते)

**सरलार्थः–** सः इति वसुप्रत्ययान्तस्यैव विशेषणम् । सकारान्तवसुप्रत्ययान्तस्य, स्रंसु-ध्वंसु-अनडुहाञ्च पदान्ते दकारान्तादेशो भवति । 'विद्वान्' इत्यादौ वसुप्रत्ययान्तस्य सान्तत्वाभावाद् दकारान्तादेशो न भवति । तथैव पदान्ते जायमानं दत्वं 'स्रस्तम् ध्वस्तम्' इत्यादौ पदमध्यस्थस्य सकारस्य न भवतीत्यपि ज्ञेयम् ।

अनडुह् + भ्याम् - अनडुद् + भ्याम् - **अनडुद्भ्याम्** ।

अनडुह् + भिस् - अनडुद् + भिस् - अनडुद्भिरु - अनडुद्भिर् - **अनडुद्भिः** ।

### मूर्धन्यादेशविधायकं विधिसूत्रम्-

**सहेः साडः सः ८ । ३ । ५६**

**साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात् । तुराषाट्, तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि । तुरं सहते इत्यर्थे 'छन्दसि सहः' इति सूत्रेण ण्विः । लोके तु साहयतेः क्विप् । 'अन्येषामपि...' पूर्वपदस्य दीर्घः ।**

(साडः, सहेः, सः, मूर्धन्यः)

**सरलार्थः–** साड्रूपापन्नस्य सह्धातोः सस्य स्थाने ( मूर्धन्यादेशः) षकारादेशो भवति ।

तुरासाह् + सु - तुरासाह् + स् - तुरासाह् - तुरासाढ् - तुरासाड् - तुराषाड् - **तुराषाट्/तुराषाड्** ।

तुरासाह् + औ - **तुरासाहौ** । तुरासाह् + जस् - तुरासाह् + अस् - तुरासाहस् - तुरासाहरू - तुरासाहर् - **तुरासाहः** ।

### औत्-आदेशविधायकं विधिसूत्रम्-

**दिव औत् ७ । १ । ८४**

**दिविति प्रातिपदिकस्य औत् स्यात् सौ परे । अल्विधित्वेन स्थानिवत्त्वाभावाद् 'हल्ङ्याप्' इति सुलोपो न । सुद्यौः । सुदिवौ । सुदिवः । सुदिवम् । सुदिवौ । सुदिवः ।**

(दिवः, औत्, सौ)

**सरलार्थः–** दिविति प्रातिपदिकस्य औकारोऽन्तादेशो भवति सुविभक्तौ परे । अत्र औकारादेशस्य 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रेण स्थानिवत्वेन 'हल्ङ्याभ्यो...' इति सूत्रेण सुलोपो न भवति, अनल्विधावेव स्थानिवद्भावाद् ।

सुदिव् + सु - सुदिव् + स् - सुदि औ + स् - सुद्यौ + स् - सुद्यौरु - सुद्यौर् - **सुद्यौः** ।

सुदिव् + औ - **सुदिवौ** । सुदिव् + जस् - सुदिव् + अस् - सुदिवरु - सुदिवर् - **सुदिवः** ।

### उत्-आदेशविधायकं विधिसूत्रम्-

**दिव उत् ६ । १ । १३१**

**दिवोऽन्तादेश उकारः स्यात्पदान्ते । सुद्युभ्याम् । सुद्युभिः, इत्यादि । इति वान्ताः ।**

(दिवः, उत्, पदान्ते)

**सरलार्थः–** दिविति प्रातिपदिकस्य स्थाने उकारान्तादेशो भवति पदान्ते ।

सुदिव् + भ्याम् - सुदि उ + भ्याम् - **सुद्युभ्याम्** ।

सुदिव् + भिस् - सुदि उ + भिस् - सुद्यु + भिस् - सुद्युभिरु - सुद्युभिर् - **सुद्युभिः** ।

**चत्वारः** । **चतुरः** । **चतुर्भिः** । **चतुर्भ्यः** । **चतुर्भ्यः** ।

चतुर्शब्दो नित्यं बहुवचनान्तः ।

चतुर् + जस् - चतुर् + अस् - चतु आ (आम्) र् + अस् - चत्वार् + अस् - चत्वारस् - चत्वाररु - चत्वारर् - **चत्वारः** ।

चतुर् + शस् - चतुर् + अस् - चतुरस् - चतुररु - चतुरर् - **चतुरः** ।

### नुडागमविधायकं विधिसूत्रम्-

**षट्चतुर्भ्यश्च ७ । १ । ५५**

**षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडामगः स्यात् । णत्वम्, द्वित्वम् । चतुर्ण्णाम् ।**

(षट्चतुर्भ्यः, च, नुट्, आमि)

**सरलार्थः–** षट्संज्ञकेभ्यः शब्देभ्यः चतुर्शब्दाच्च परस्य आमः नुडागमो भवति ।

चतुर् + आम् - चतुर् + न् (नुट्) आम् - चतुर् + नाम् - चतुर् + णाम् - चतुर् + ण्णाम् - चतुर्ण्णाम् । "अचो रहाभ्यां द्वे" इति णस्य द्वित्वम् ।

### नियमसूत्रम्-

**रोः सुपि ८ । ३ । १६**

**सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य । षत्वम् । षस्य द्वित्वे प्राप्ते -**

(सुपि, रोः, विसर्जनीयः)

**सरलार्थः–** सप्तम्याः बहुवचने सुपि परे उकारानुबन्धिनो रेफस्य विसर्गादेशो भवति नान्यस्य रेफस्य ।

### द्वित्वनिषेधविधायकं सूत्रम्-

**शरोऽचि ८ । ४ । ४९**

**अचि परे शरो न द्वे स्तः । चतुर्षु । प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः । हे प्रियचत्वः । इत्यादि । गौणत्वे तु नुट् नेष्यते - प्रियचतुराम् । प्राधान्ये तु स्यादेव परमचतुर्णाम् । कमलं कमलां वा आचक्षाणः कमल् । कमलौ । कमलः । षत्वम्-कमल्षु ।**

(अचि, शरः, न, द्वे)

**सरलार्थः–** अचि परे शरो द्वित्वं न भवति । चतुर्शब्दात् सुपि स्वादिष्विति पदसंज्ञायां 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे प्राप्ते 'रोःसुपि' इत्यनेन निषिध्यते । ततः "अचो रहाभ्यां द्वे" इति द्वित्वे प्राप्तेऽनेन निषिध्यते ।

चतुर् + सुप् - चतुर् + सु - चतुर् + षु - **चतुर्षु** ।

प्रियाः चत्वारो यस्येति बहुव्रीहिसमासेन निष्पन्नः प्रियचतुर्शब्दो विशेष्यानुसारी एकद्वि-बहुचनान्तः ।

प्रियचतुर्   सु - प्रियचतुर्   स्   प्रियचतु आ (आम्) र् स् - प्रियचत्वार् + स् - प्रियचत्वार् - **प्रियचत्वाः** ।

प्रियचतुर् + आम् - **प्रियचतुराम्** । बहुव्रीहिसमासे अन्यपदार्थस्य प्रधानत्वेन अत्र चतुर्शब्दस्य गौणार्थकतया

'षट्चतुर्भ्यश्च' इत्यनेन आमि नुडागमो न भवतीत्यर्थः। कर्मधारयसमासे तु **परमचतुर्णामि**त्यादौ नुडागमो भवत्येव।

कमलं = पद्मम्, कमला = लक्ष्मीः। कमलामाचष्टे इत्यर्थे कमलाशब्दात् 'तत्करोति तदाचष्टे' इति णिचि 'सनाद्यन्ताः' इति धातुत्वात् तदवयवस्य सुपो लुकि टिलोपे ततः क्विप् सर्वापहारे णेर्लोपे च कृते कमल्शब्दो निष्पद्यते, ततः सौ - कमल् + सु - कमल् + स् - **कमल्**।

कमल् + औ - **कमलौ**। कमल् + जस् - कमल् + अस् - कमलस् - कमलरु - **कमलः**।

कमल् + सुप् - कमल् + सु - कमल् + षु - **कमल्षु**।

## रूपावली

### अनडुह्शब्दस्य रूपावली

| | | |
|---|---|---|
| अनड्वान् | अनड्वाहौ | अनड्वाहः |
| अनड्वाहम् | अनड्वाहौ | अनडुहः |
| अनडुहा | अनडुद्भ्याम् | अनडुद्भिः |
| अनडुहे | अनडुद्भ्याम् | अनडुद्भ्यः |
| अनडुहः | अनडुद्भ्याम् | अनडुद्भ्यः |
| अनडुहः | अनडुहोः | अनडुहाम् |
| अनडुहि | अनडुहोः | अनडुत्सु |
| हे अनड्वन् ! | हे अनड्वाहौ ! | हे अनड्वाहः ! |

### विश्ववाह्शब्दस्य रूपावली

| | | |
|---|---|---|
| विश्ववाट्-ड् | विश्ववाहौ | विश्ववाहः |
| विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| विश्वौहः | विश्वौहोः | विश्वौहाम् |
| विश्वौहि | विश्वौहोः | विश्ववाट्त्सु / विश्वावाट्सु |
| हे विश्ववाट्/ड् ! | हे विश्ववाहौ ! | हे विश्ववाहः ! |

### सुदिव्शब्दस्य रूपावली

| | | |
|---|---|---|
| सुद्यौः | सुदिवौ | सुदिवः |
| सुदिवम् | सुदिवौ | सुदिवः |
| सुदिवा | सुद्युभ्याम् | सुद्युभिः |
| सुदिवे | सुद्युभ्याम् | सुद्युभ्यः |
| सुदिवः | सुद्युभ्याम् | सुद्युभ्यः |
| सुदिवः | सुदिवोः | सुदिवाम् |
| सुदिवि | सुदिवोः | सुद्युषु |
| हे सुद्यौः ! | हे सुदिवौ ! | हे सुदिवः ! |

# रूपसाधनप्रकारः

### विश्वौहः

विश्ववाह्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ अनुबन्धलोपे "यचि भम्" इति सूत्रेण भसंज्ञायां "वाह ऊठ्" इति सूत्रेण संप्रसारणे वकारस्य ऊठादेशे विश्व + ऊ + आह् + अस् इति जाते "संप्रसारणाच्च" इति सूत्रेण पूर्वरूपे "एत्येधत्यूठ्सु" इति सूत्रेण वृद्धौ वर्णसम्मेलने विश्वौहस् इति जाते सकारस्य रुत्वे विसर्गे च विश्वौहः इति रूपं सिद्धम् ।

### अनडुद्भ्याम्

अनडुह्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्र-सहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया द्विवचने भ्याम्विभक्तौ अनुडुह् + भ्याम् इति स्थिते "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायां "वसुस्रंसुध्वंस्वनडुहां दः" इति सूत्रेण हकारस्य दकारादेशे अनडुद्भ्याम् इति रूपं सिद्धम् ।

### सुद्यौः

सुदिव्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे सुदिव् + स् इति जाते "दिव औत्" इति सूत्रेण वकारस्य औत् आदेशे सुदि + औ + स् इति जाते "इको यणचि" इति सूत्रेण यणि सकारस्य रुत्वे विसर्गे च सुद्यौः इति रूपं सिद्धम् ।

### चत्वारः

चतुर्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तौ अनुबन्धलोपे सर्वनामस्थानसंज्ञायां "चतुरनडुहोरामुदात्तः" इति सूत्रेण आमागमे अनुबन्धलोपे चतु आ र् + अस् इति जाते "इको यणचि" इति यणि वर्णयोगे सकारस्य रुत्वे विसर्गे च चत्वारः इति रूपं सिद्धम् ।

# अभ्यासः

## १. परस्परं मेलयत

| | |
|---|---|
| णत्वम् | इग्यणः सम्प्रसारणम् |
| पदसंज्ञा | संप्रसारणाच्च |
| नुमागमः | चतुरनडुहोरामुदात्तः |
| पूर्वरूपम् | अम् सम्बुद्धौ |
| आमागमः | स्वादिष्वसर्वनामस्थाने |
| सम्प्रसारणसंज्ञा | रषाभ्यां नो णः समानपदे |
| अमागमः | यचि भम् |
| भसंज्ञा | सावनडुहः |

## २. रिक्तस्थानं पूरयत

(क) सर्वनामस्थानभिन्नासु अजादिविभक्तिषु प्रातिपदिकस्य ... ... ... ... -संज्ञा भवति ।

(ख) 'चतुर्णाम्' इत्यत्र ... ... ... ... सूत्रेण णकारस्य विकल्पेन द्वित्वं विधीयते ।

(ग) सम्प्रसारणे कृते वकारस्य स्थाने ... ... ... ... आदिश्यते ।

(घ) सम्प्रसारणादचि परे ... ... ... ... एकादेशो भवति ।

(ङ) चतुर्-शब्दो नित्यं ... ... ... ... -वचनान्तः ।

## ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

विश्ववाह् + ङसि, अनडुह् + सुप्, तुरासाह् + भ्यस्, चतुर् + जस्, सुदिव् + शस् ।

## ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

सुदिवोः, सुद्युभ्याम्, विश्ववाड्भ्यः, विश्वौहि, अनडुत्सु, तुराषाड्भ्याम्, चतुर्भिः ।

## ५. अधो लिखितप्रश्नानामतिसङ्क्षेपेण उत्तरं लिखत

(क) 'विश्वौहः' इत्यत्र वृद्धिः केन सूत्रेण भवति ?

(ख) 'अनडुद्भ्यः' इत्यत्र प्रातिपदिकस्य पदसंज्ञाविधायकं सूत्रं किम् ?

(ग) 'चतुर्ण्णाम्' इत्यत्र णत्वविधायकं सूत्रं किम् ?

(घ) 'तुराषाट्' इत्यत्र सकारस्य षत्वं केन सूत्रेण विधीयते ?

(ङ) सप्तमीबहुवचने सुपि परे कीदृशस्यैव रेफस्य विसर्गादेशो भवति ? एतन्नियामकं सूत्रञ्च किम् ?

## ६. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) सम्प्रसारणेन केषां स्थाने के भाव्यन्ते ?

(ख) 'चत्वारः' इत्यत्र आमागमः उकारात्परो भवतीत्यत्र कारणं किम् ?

(ग) 'चतुर्षु' इत्यत्र रेफस्य विसर्गः केन प्राप्तः ? कथं च तद्वार्यते ?

(घ) 'सुद्यौः' इत्यत्र 'हल्ङ्याप् -' सुलोपः कथं प्राप्तः कथञ्च वार्यते ?

(ङ) "चतुरनडुहोरामुदात्तः", "सावनडुहः" इत्यनयोर्बाध्यबाधकाऽभावे कारणं किम् ?

## ७. अधःप्रदत्तानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां निर्दिशत

अनड्वान्, अनडुद्भ्याम्, हे अनड्वन्, विश्वौहा, सुद्युषु, चतुर्षु, चतुर्ण्णाम्, तुराषाड्भ्याम् ।

## ८. अधस्तनसूत्राणां सरलार्थं लिखत

(क) इग्यणः सम्प्रसारणम् ।

(ख) सम्प्रसारणाच्च ।

(ग) चतुरनडुहोरामुदात्तः ।

(घ) वसुस्रंसुध्वंस्वनडुहां दः ।

(ङ) दिव उत् ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

विश्ववाट्, विश्वौहा, अनड्वाहौ, तुराषाहा, चत्वारः, चतुरः, चतुर्षु, सुद्यौः ।

## हलन्तपुँल्लिङ्गप्रकरणे

# मकारसकारान्तशब्दयो रूपसिद्धिप्रक्रिया

### नकारादेशविधायकं विधिसूत्रम्-

**मो नो धातोः ८ । २ । ६४**

**मान्तस्य धातोर्नः स्यात् पदान्ते । नत्वस्यासिद्धत्वान्नलोपो न ।** प्रशाम्यतीति **प्रशान्** । **प्रशामौ** । **प्रशामः** । **प्रशान्भ्यामित्यादि** ।

(मः, धातोः, नः, पदस्य, अन्ते)

**सरलार्थः–** मान्तस्य धातोर्मकारस्य नकारादेशो भवति पदान्ते । नत्वविधायकस्यास्य सूत्रस्यापेक्षया "न लोपः प्रातिपदिकान्तस्य" इत्यस्य पूर्वत्रिपादीत्वेन "पूर्वत्रासिद्धम्" इति नियमेन नत्वस्यासिद्धत्वान्नलोपो न भवतीति बोध्यम् ।

प्रशाम् + सु - प्रशाम् + स् - प्रशाम् - **प्रशान्** । प्रशाम् + औ - **प्राशामौ** ।

प्रशाम् + जस् + प्रशाम् + अस् - प्रशामस् - प्रशामरु - प्रशामर् - **प्रशामः** । प्रशाम् + भ्याम् - प्रशान् + भ्याम् - **प्रशान्भ्याम्** ।

### कादेशविधायकं विधिसूत्रम्-

**किमः कः ७ । २ । १०३**

**किमः कः स्याद्विभक्तौ । अकच्सहितस्याप्ययमादेशः । कः । कौ । के । कम् । कौ । कान् इत्यादि, सर्ववत् ।**

(किमः, कः, विभक्तौ)

**सरलार्थः–** किम्शब्दस्य विभक्तौ परे कादेशो भवति । कादेशानन्तरं सर्वशब्दवदस्य रूपाणि भवन्ति । "अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यनेन विहितस्य अकज्विशिष्टस्यापि किमः कादेशो भवतीत्यर्थः ।

किम् + सु - किम् + स् - क + स् - करु - कर् - **कः** ।

किम् + औ - क + औ - **कौ** ।

किम् + जस् - किम् + अस् - क + अस् - क + शी - क + ई - **के** ।

### मकारादेशविधायकं विधिसूत्रम्-

**इदमो मः ७ । २ । १०८**

**इदमो मस्य मः स्यात्सौ परे । त्यदाद्यत्वापवादः ।**

(इदमः, मस्य मः सौ)

**सरलार्थः-** इदम्शब्दस्य मकारस्य स्थाने मकारादेश एव भवति न तु अकारः ।

'त्यदादीनामः' इत्यनेन प्राप्तमकारान्तादेशं प्रबाध्यानेन सूत्रेण इदम्शब्दस्य मकारस्य मकार एवादेशो भवतीत्याशयः ।

### अय्-आदेशविधायकं विधिसूत्रम्-

**इदोऽय् पुंसि ७ । २ । १११**

**इदम इदोऽय् स्यात्सौ पुंसि । सोर्लोपः । अयम् ।**

(इदमः, इदः, अय्, पुंसि, सौ, अङ्गस्य)

**सरलार्थः-** इदम्शब्दस्य इद्भागस्य स्थाने अयादेशो भवति सौ परे ।

इदम् + सु - इदम् + स् - अय् + अम् + स् - अयम् + स् - **अयम्** ।

'त्यदादीनामः' इति अत्वं पररूपत्वं च, ततः -

### मकारादेशविधायकं विधिसूत्रम्-

**दश्च ७ । २ । १०९**

**इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः संबोधनं नास्ति इत्युत्सर्गः ।**

(इदमः, दस्य, मः, विभक्तौ)

**सरलार्थः-** इदम्शब्दस्य दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः ।

इदम् + औ - इद अ + औ - इद (पररूपम्) + औ - इम + औ - **इमौ** ।

इदम् + जस् - इदम् + अस् - इद अ + अस् - इद + अस् - इम + अस् - इम + शी - इम + ई - **इमे** । इदम् + अम् - इद अ + अम् - इद + अम् - इम + अम् - **इमम्** । इदम् + शस् - इदम् + अस् - इद अ + अस् - इद + अस् - इम + अस् - इमास् (पूर्वसवर्णदीर्घः) - **इमान्** (नत्वम्) ।

### अन्-आदेशविधायकं विधिसूत्रम्-

**अनाप्यकः ७ । २ । ११२**

**अककारस्येदम इदोऽन् स्यादापि विभक्तौ । आप् इति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः । अनेन ।**

(अकः, इदमः, इदः, अन्, आपि, विभक्तौ)

**सरलार्थः–** अकच्प्रत्ययरहितस्य इदम्शब्दस्य इद्भागस्य स्थाने अन्-आदेशो भवति आपि विभक्तौ परतः ।

इदम् + टा - इदम् + आ - इदअ + आ - इद + आ - अन + आ - अन + इन - **अनेन** ।

### इद्भागस्य लोपविधायकं विधिसूत्रम्-

**हलि लोपः ७ । २ । ११३**

**अककारस्येदम इदो लोपः स्यादापि हलादौ । 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' (वा) ।**

(अकः, इदमः, इदः, लोपः, आपि, हलि विभक्तौ)

**सरलार्थः–** अकच्प्रत्ययरहितस्य इदम्शब्दस्य इद्भागस्य लोपो भवति आपि हलादौ विभक्तौ परतः ।

अत्र "अलोऽन्त्यस्य" इति नियमेन इदो दकारमात्रस्य लोपो न शङ्कनीयः, यतो हि अनर्थकशब्दस्वरूपे अभ्यासविकाररूपं कार्यं विहाय अन्यत्र अलोऽन्त्यपरिभाषा न प्रवर्तते इति वार्तिकाशयः । इदम्-शब्दे 'इद्' इत्यस्यानर्थकत्वात् तदन्तस्येति न लभ्यते । ततश्च 'इद्' इत्यस्य संपूर्णस्यैव लोप इति भावः । इदम्-शब्दाद् भ्यामि त्यदाद्यत्वे पररूपे अनेन सूत्रेण इद्भागस्य लोपे 'अ + भ्याम्' इति जाते अङ्गस्याकारात्मकत्वाद् अदन्तत्वाभावात् "सुपि च" इति दीर्घो न स्यादिति तद्व्यवस्थापकं सूत्रमाह-

### अतिदेशसूत्रम्-

**आद्यन्तवदेकस्मिन् १ । १ । २१**

**एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव च स्यात् । आभ्याम् ।**

(एकस्मिन्, आद्यन्तवद्)

**सरलार्थः–** एकस्मिन् असहायेऽपि आद्यन्तवद् व्यवहारो भवति । तेन अकारान्ताङ्गस्य अकाराद्यङ्गस्य वा क्रियमाणं कार्यम् अकाररूपाङ्गस्यापि भवति । अतोऽत्र "सुपि च" इत्यनेन दीर्घः ।

इदम् + भ्याम् - इद अ + भ्याम् - इद + भ्याम् - अ + भ्याम् - **आभ्याम्** ।

इदम्-शब्दाद् भिसि अत्वे पररूपे च कृते इदो लोपे 'अ + भिस्' इत्यत्र ऐसादेशे प्राप्ते-

### ऐसादेशनिषेधविधायकं सूत्रम्-

**नेदमदसोरकोः ७ । १ । ११**

**अककारयोरिदमदसोर्भिस ऐस् न स्यात् । एत्वम् –एभिः । अस्मै । आभ्याम् । एभ्यः । अस्मात् । आभ्याम् । एभ्यः । अस्य । अनयोः । एषाम् । अस्मिन् । अनयोः । एषु** । ककारयोगे तु- **अयकम् । इमकौ । इमके । इमकम् । इमकौ । इमकान् । इमकेन । इमकाभ्याम् इत्यादि ।**

(अकोः, इदमदसोः, भिसः, ऐस्, न)

**सरलार्थः–** अकच्-रहितयोः इदमदसोः भिस ऐसादेशो न भवति ।

इदम् + भिस् - इद अ + भिस् - इद + भिस् - अ + भिस् - ए + भिस् - एभिरु - एभिर् - **एभिः** ।

इदम् + ङे - इदम् + ए - इद + ए - इद + स्मै - अ + स्मै - **अस्मै** ।

इदम् + आम् - इद अ + आम् - इद + आम् - इद + स् (सुट्) आम् - इद + साम् - अ + साम् - ए + साम् - **एषाम्** ।

इदम्-शब्दाद् अकचि कृते इदकमिति जाते, तस्य रूपाणि **अयकमि**त्यादीनि जायन्ते । ककाररहितस्य इति वचनात् "अनाप्यकः", 'हलि लोपः", "नेदमदसोरकोः" इति सूत्राणि तत्र न प्रवर्तन्ते तथा हि-

इदकम् + टा - इदकम् + आ - इदक अ + आ - इदक + आ - इमक + आ - इमक + इन - **इमकेन** ।

इदकम् + भ्याम् - इदक अ + भ्याम् - इदक + भ्याम् - इमक + भ्याम् - **इमकाभ्याम्** ।

इदकम् - भिस् - इदक अ + भिस् - इदक + भिस् - इमक + भिस् - इमक + ऐस् - इमकैस् - इमकैरु - इमकैर् - **इमकैः** ।

### अशादेशविधायकं विधिसूत्रम्-

**इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २ । ४ । ३२**

**अन्वादेशविषयस्येदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ । अश्वचनं साकच्कार्थम् ।**

(अन्वादेशे, इदमः, अनुदात्तः, अश्, तृतीयादौ, विभक्तौ)

**सरलार्थः–** अन्वादेशविषयकस्य इदम्-शब्दस्य स्थानेऽनुदात्तोऽशादेशो भवति तृतीयादौ विभक्तौ ।

### एनादेशविधायकं विधिसूत्रम्-

**द्वितीयाटौस्स्वेनः २ । ४ । ३४**

**द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं**

**पुनरुपादानमन्वादेशः । यथा - 'अनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय' इति । एनम् । एनौ । एनान् । एनेन । एनयोः, इत्यादि ।**

**गणयतेर्विच् । सुगण् । सुगणौ । सुगणः । सुगण्ठ्सु/सुगण्ट्सु/सुगण्सु । क्विप् - 'अनुनासिकस्य क्विझलोः' इति दीर्घः । सुगाण् । सुगाणौ । सुगाणः । सुगाण्ठ्सु/सुगाण्ट्सु/सुगाण्सु ।**

(अन्वादेशे, इदमदसोः, एनः, द्वितीयाटौस्सु)

**सरलार्थः–** अन्वादेशविषयकयोः इदमेतदोः एनादेशो भवति द्वितीयायाम्, टाविभक्तौ, ओस्-विभक्तौ च परतः ।

इदम् + अम् - इद अ + अम् - इद + अम् - एन + अम् - **एनम्** ।

इदम् + शस् - इदम् + अस् - इद अ + अस् - इद + अस् - एन + अस् - एनास् - **एनान्** ।

अत्र अन्वादेशविषये तृतीयादौ 'हलि लोपः' इत्यनेन इद्भागस्य लोपेनैव **अस्मै, अस्मात्** इत्यादीनां सिद्धौ सत्याम् "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ" इति सूत्रेण अशादेशवचनं व्यर्थमिति शङ्कायामाह - अकज्विशिष्टस्येदम आदेशार्थमश्वचनमावश्यकमस्ति । तेन यथा इदंशब्दस्य ङयि **'अस्मै'** इति रूपम् तथैव इदकम्शब्दस्यापि ङयि **'अस्मै'** इत्येव रूपं साधु । अत एव - 'इमकाभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम्' इत्यत्रान्वादेशे इमकाभ्यामिति न भवति ।

उपरि विच्प्रययान्तस्य सुगण्शब्दस्य, क्विप्प्रत्ययान्तस्य सुगाण्शब्दस्य च रूपाणि पार्थक्येन प्रदर्शितानि सन्ति ।

सुगण् + सु - सुगण् + स् - **सुगण्** । सुगण् + औ - **सुगणौ** ।

सुगण् + जस् - सुगण् + अस् - सुगणस् - सुगणरु - सुगणर् - **सुगणः** ।

सुगण् + सुप् - सुगण् + सु - सुगण् ट् (टुक्) + सु - **सुगण्ठ्सु/सुगण्ट्सु/सुगण्सु** । अत्र विकल्पेन 'ङणोः कुक् टुक् शरि' इति टुगागमः, विकल्पेनैव 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति टकारस्य ठकारादेशश्च, तेन विकल्पेन त्रीणि रूपाणि जायन्ते । एवमेव सुगाण्शब्दस्यापि रूपाणि बोध्यानि ।

| किम्-शब्दस्य रूपावली | | | इदम्-शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| कः | कौ | के | अयम् | इमौ | इमे |
| कम् | कौ | कान् | इमम् | इमौ | इमान् |
| केन | काभ्याम् | कैः | अनेन | आभ्याम् | एभिः |
| कस्मै | काभ्याम् | केभ्यः | अस्मै | आभ्याम् | एभ्यः |
| कस्मात्/द् | काभ्याम् | केभ्यः | अस्मात्/द् | आभ्याम् | एभ्यः |
| कस्य | कयोः | केषाम् | अस्य | अनयोः | एषाम् |
| कस्मिन् | कयोः | केषु | अस्मिन् | अनयोः | एषु |

# रूपसाधनप्रकारः

**प्रशान्भ्याम्**

प्रशाम्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकोण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया द्विवचने भ्याम्विभक्तौ 'प्रशाम् + भ्याम्' इति जाते "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायां "मो नो धातोः" इति सूत्रेण मकारस्य नकारादेशे 'प्रशान्भ्याम्' इति रूपं सिद्धम् ।

**अनेन**

इदम्शब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया एकवचने टाविभक्तौ अनुबन्धलोपे "त्यदादीनामः" इत्यनेन अकारान्तादेशे 'इद अ + आ' इति जाते "अतो गुणे" इति पररूपे 'इद + आ' इति जाते "अनाप्यकः" इति सूत्रेण इद्भागस्य अनादेशे 'अन + आ' इति जाते "टाङसिङसामिनात्स्याः" इति सूत्रेण इनादेशे "आद् गुणः" इति गुणे च अनेन इति रूपं सिद्धम् ।

**एभिः**

इदम्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया बहुवचने भिस्विभक्तौ "त्यदादीनामः" इत्यनेन अकारान्तादेशे "अतो गुणे" इति सूत्रेण पररूपे 'इद + भिस्' इति जाते "हलि लोपः" इति सूत्रेण इद्भागस्य लोपे 'अ + भिस्' इति जाते "अतो भिस ऐस्" इति सूत्रेण ऐसादेशे प्राप्ते "नेदमदसोरकोः" इति सूत्रेण तन्निषेधे "बहुवचने झल्येत्" इति सूत्रेण एत्वे सकारस्य रुत्वे विसर्गे च 'एभिः' इति रूपं सिद्धम् ।

# अभ्यासः

## १. युक्तकथनेषु ✓ इति चिह्नं तथाऽयुक्तकथनेषु × इति चिह्नं योजयत

(क) 'अनेन' इत्यत्र 'इद अ + आ' इत्यवस्थायां सवर्णदीर्घो भवति ।

(ख) 'के' इत्यत्र "जसः शी" इत्यनेन 'शी' इत्यादेशो भवति ।

(ग) "हलि लोपः" इत्यनेन इदो लोपविषये "अलोऽन्त्यस्य" इति परिभाषासूत्रं प्रवर्तते ।

(घ) 'केषाम्' इत्यत्र सुडागमे कृते "बहुवचने झल्येत्" इत्यनेन एत्वं भवति ।

(ङ) 'इमकेन' इति रूपमन्वादेशे प्रयोक्तुं शक्यते ।

(च) इदम्-शब्दस्य अन्वादेशविषये द्वितीया-टा-ओस्विभक्तिषु एव रूपाणि भिद्यन्ते ।

## २. रिक्तस्थानं पूरयत

(क) "हलि लोपः" इति सूत्रेण इदम्-शब्दस्य … … … … लोपो भवति ।

(ख) 'इमे' इत्यत्र … … … … इति सूत्रेण दकारस्य मत्वं विधीयते ।

(ग) अजादावपि विभक्तौ इदम इद्भागस्यानादेशविधायकं सूत्रम् … … … … ।

(घ) "नेदमदसोरकोः" इति … … … … शब्दयोः परस्य भिस ऐस् निषिध्यते ।

(ङ) सुगण्-शब्दः … … … … -प्रत्ययान्तः ।

## ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

सुगण्+भिस्, प्रशाम्+सुप्, इदम्+आम् (पुंसि), किम्+ङि (पुंसि) ।

## ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

इदकेन, एनयोः, कस्मात्, अस्य, प्रशामे, सुगणः ।

## ५. अधो लिखितानां प्रश्नानां सङ्क्षेपेण उत्तरं लिखत

(क) 'आप्-विभक्तिः' इत्यनेन कासां विभक्तीनां संग्रहो भवति ?

(ख) "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ" इति सूत्रे अश्वचनं किमर्थम् ?

(ग) "मो नो धातोः" इत्यनेन कासु विभक्तिषु मकारस्य नकारादेशो भवति ?

(घ) सौ परे इदमो इद्भागस्य अयादेशः कस्मिन् लिङ्गे विधीयते ?

(ङ) पुंलिङ्गे इदम्-शब्दस्य अत्वपररूपे कुत्र न भवतः ?

(च) इदम्-शब्दस्य भिसि पुंसि किं रूपम् ?

(छ) किम्-शब्दे "त्यदादीनामः" इत्यस्य प्रवृत्तिरस्ति न वा ?

(ज) किमः कादेशः कस्यामवस्थायां भवति ?

## ६. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) किम्-शब्दस्य रूपाणि सर्वशब्दवद् भवन्तीत्यत्र कारणं किम् ?

(ख) अन्वादेशः कः ? सोदाहरणं लिखत ।

(ग) भपदसंज्ञयोरेकत्र प्राप्तयोः का संज्ञा विधीयते ?

(घ) "हलि लोपः" इति सूत्रविषये "अलोऽन्त्यस्य" इति प्रवर्त्तते न वा ? सकारणं लिखत ।

(ङ) 'प्रशान्' इत्यत्र "न लोपः प्रातिपदिकान्तस्य" इत्यनेन नलोपः कथं न भवति ?

(च) "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" इत्यस्याशयः कः ?

## ७. अधःप्रदत्तानां प्रयोगाणांससूत्रं सिद्धिप्रक्रियां निर्दिशत

प्रशान्, प्रशान्सु, कः, केषाम्, अयम्, इमे, अस्मिन्, आभ्याम्, एनम्, कस्मै, सुगण्, सुगाण्ठ्सु ।

## ८. अधस्तनसूत्राणां सरलार्थं लिखत

(क) किमः कः ।

(ख) इदोऽय् पुंसि ।

(ग) हलि लोपः ।

(घ) नेदमदसोरकोः ।

(ङ) द्वितीयाटौस्स्वेनः ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

प्रशामः, केन, इमौ, अस्मात्, सुगणा, कस्मिन्, कान्, केभ्यः, के, इमम् ।

हलन्तपुँल्लिङ्गप्रकरणे

# नकारान्तशब्दानां रूपसिद्धिप्रक्रिया

**परत्वादुपधादीर्घः, हल्ङ्यादिलोपः, ततो नलोपः, राजा ।**

### नकारलोपनिषेधविधायकं सूत्रम्-

**न ङिसंबुद्ध्योः ८ । २ । ८**

**नस्य लोपो न स्यात् ङौ संबुद्धौ च । हे राजन् । ङौ तु छन्दस्युदाहरणम् । सुपां सुलुक् इति ङेर्लुक् । निषेधसामर्थ्यात्प्रत्ययलक्षणम् । परमे व्योमन् । ङावुत्तरपदे प्रतिषेधो वक्तव्यः** (वा.) ॥ **चर्मणि तिला अस्य चर्मतिलः । ब्रह्मणि निष्ठा अस्य ब्रह्मनिष्ठः । राजानौ । राजानः । राजानम् । राजानौ । "अल्लोपोऽनः" । श्चुत्वम् । न चाऽल्लोपः स्थानिवत् । पूर्वत्रासिद्धे तन्निषेधात् । नाऽपि बहिरङ्गतयाऽसिद्धः । यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतयाऽन्तरङ्गाभावेन परिभाषाया अप्रवृत्तेः । जञोर्ज्ञः । राज्ञः । राज्ञा ॥**

(नलोपो, न, ङिसंबुद्ध्योः)

**सरलार्थः–** नकारस्य लोपो न भवति ङौ संबुद्धौ च परतः ।

हल्ङ्यादिलोपापेक्षया परत्वात् पूर्वमेव "सर्वनामस्थाने चासंबुद्धौ" इति उपधादीर्घः, हल्ङ्यादिलोपः, ततो नलोपः, राजा ।

राजन् + सु - राजन् + स् - राजान् + स् - राजान् - राजा ।
राजन् + सु - राजन् + स् - राजन् - हे राजन् !

ङौ विषये उत्तरपदे च परे "न ङिसंबुद्ध्योः" इत्यस्य निषेधो वाच्य इत्यर्थः । अत्र सप्तम्यन्तेन समासे चर्मन्, ब्रह्मन् इत्येतयोर्नकारस्य लोपो भवत्येव । उत्तरपदे परे ङौ विषयेऽपि नलोपनिषेधस्य प्रतिषेध इति भावः ।

राजन् + औ - राजान् + औ - **राजानौ** । राजन् + जस् - राजन् + अस् - राजान् + अस् - राजानस् - राजानरु - राजानर् - **राजानः** । राजन् + अम् - राजन् + अम् - **राजानम्** । राजन् + औट् - राजन् + औ - राजान् + औ - **राजानौ** ।

राजन्शब्दात् शसि भसंज्ञायाम् "अल्लोपोऽनः" इति अकारलोपे 'राज्न् + अस्' इति जाते नकारस्य श्चुत्वेन ञकारे, जञोर्ज्ञः । **राज्ञः** । **राज्ञा** ।

राजन् + शस् - राजन् + अस् - राज्न् + अस् - राज्ञ् + अस् - राज्ञस् - राज्ञरु - राज्ञर् - **राज्ञः** ।

राजन् + टा - राजन् + आ - राज्न् + आ - राज्ञ् + आ - राज्ञ् + आ - **राज्ञा** ।

राजन्शब्दाद् भ्यामि पदसंज्ञायां "न लोपः प्रातिपदिकान्तस्य" इति नकारस्य लोपे 'राज + भ्याम्' इत्यत्र "सुपि च" इत्यनेन प्राप्तो दीर्घः "पूर्वत्रासिद्धम्" इत्यनेन नलोपस्यासिद्धत्वाद् निवार्यते । एवमेव 'राज्ञः अश्वः' इत्यत्र समासे सुपो लुकि 'राजन् + अश्वः' इत्यत्र नकारस्य लोपे 'राज + अश्वः' इत्यत्रापि सवर्णदीर्घविषये नलोपस्यासिद्धत्वात् कथं 'राजाश्वः' इति रूपं सिद्ध्यतीति जिज्ञासायां नलोपस्य असिद्धत्वनियामकं सूत्रमाह-

### नलोपस्य असिद्धत्वनियामकं सूत्रम्-

**नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८ । २ । २**

**सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धः नान्यत्र 'राजाश्वः' इत्यादौ । इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न । राजभ्याम् । राजभिः । राज्ञे । राजभ्यः । राज्ञः । राज्ञोः । राज्ञाम् । राज्ञि, राजनि इत्यादि । प्रतिदीव्यतीति प्रतिदिवा । प्रतिदिवानौ । प्रतिदिवानः । अस्य भविषयेऽल्लोपे कृते ॥**

(नलोपः, पूर्वत्रासिद्धम्, सुप्स्वरसंज्ञातुग्विधिषु कृति)

**सरलार्थः-** सुबाश्रयविधौ, स्वरे विधेये, संज्ञायां विधेयायाम्, कृति परे यस्तुक् तस्मिन् विधेये चैव "पूर्वत्रासिद्धमि"त्यनेन नकारलोपस्य असिद्धत्वं विज्ञायते अन्यस्मिन् कार्ये नलोपस्यविषये "पूर्वत्रासिद्धमि"ति सूत्रं न प्रवर्तते । तेन 'राजभ्याम्' इत्यत्र भ्याममाश्रित्य जायमाने "सुपि चे"ति दीर्घविषये नलोपोऽसिद्धो भवति, 'राजाश्वः' इत्यत्र च सूत्रोक्तातिरिक्ते सवर्णदीर्घविषये नलोपस्यासिद्धत्वं न ज्ञाप्यते इति भावः ।

राजन् + भ्याम् - राज + भ्याम् - **राजभ्याम्** । राजन् + भिस् - राज + भिस् - राजभिरु - राजभिर् - **राजभिः** ।
राजन् + ङे - राजन् + ए - राज्न् + ए - राज्ञ् + ए - राज्ञ् + ए - **राज्ञे** ।

राजन् + ङि - राजन् + इ - राज्न् + इ - राज्ञ् + इ - राज्ञ् + इ - **राज्ञि** । अत्र "विभाषा ङिश्योः" इति विकल्पेन अकारलोपः, तदभावपक्षे तु- राजन् + ङि - राजन् + इ - **राजनि** ।

प्रतिदिवन्शब्दात् सुबुत्पत्तौः "सर्वनामस्थाने-" इति दीर्घे, हल्ङ्यादिना सुलोपे **'प्रतिदिवा'** इति रूपम् । सुटि राजवत् । **प्रतिदिवा** । **प्रतिदिवानौ** । **प्रतिदिवानः** । **प्रतिदिवानम्** । **प्रतिदिवानौ** । अस्य शब्दस्य भविषयेऽल्लोपे कृते-

### दीर्घादेशविधायकं विधिसूत्रम्-

**हलि च ८ । २ । ७७**

**रेफवान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि । न चाल्लोपस्य स्थानिवत्त्वम्, दीर्घविधौ तन्निषेधात्, बहिरङ्गपरिभाषा तूक्तन्यायेन न प्रवर्तते । प्रतिदीव्नः । प्रतिदीव्ना, इत्यादि ।**
(धातोः, र्वोरुपधायाः, दीर्घः, इकः, हलि च)

**सरलार्थः–** रेफवान्तस्य धातोरुपधाया इकः स्थाने दीर्घादेशो भवति हलि परे ।

प्रतिदिवन् + शस् - प्रतिदिवन् + अस् - प्रतिदिव्न् + अस् - प्रतिदीव्न् + अस् - प्रतिदीव्नस् - प्रतिदीव्नरु - प्रतिदीव्नर् - **प्रतिदीव्नः** । प्रतिदिवन् + भ्याम् - प्रतिदिव + भ्याम् (न लोपः प्रादिपदिकान्तस्य) - **प्रतिदिवभ्याम्** ।

**यज्वा** । **यज्वानौ** । **यज्वानः** । **यज्वानम्** । **यज्वानौ** ।

यज्वन्शब्दस्य सुटि राजवद्रूपाणि ज्ञेयानि ।

यज्वन् + सु - यज्वन् + स् - यज्वान् + स् - यज्वान् - **यज्वा** ।

यज्वन्शब्दात् शसि भसंज्ञायाम् "अल्लोपोऽनः" इति अकारलोपे प्राप्ते-

### अकारलोपनिषेधविधायकं सूत्रम्-

**न संयोगाद्वमन्तात् ६ । ४ । १३७**

**वकारमकारान्तसंयोगात्परस्यानोऽकारस्य लोपो न स्यात्** ।

**यज्वनः** । **यज्वना** । **यज्वभ्याम् इत्यादि** । **ब्रह्मणः** । **ब्रह्मणा** । **ब्रह्मभ्याम् इत्यादि** ।

(वमन्तात्, संयोगाद्, अनः, भस्य, अङ्गस्य, अल्लोपो न)

**सरलार्थः–** वकारान्ताद् मकारान्ताच्च संयोगात् परस्यानोऽकारस्य लोपो न भवति ।

ब्रह्मन्शब्दस्यापि यज्वन्शब्दवद्रूपाणि बोध्यानि ।

**ब्रह्मा** । **ब्रह्माणौ** । **ब्रह्माणः** । **ब्रह्माणम्** । **ब्रह्माणौ** । **ब्रह्मणः** । **ब्रह्मणा** । **ब्रह्मभ्याम्** इत्यादि ।

वृत्रहन्शब्दात् सौ, नान्तत्वेन "सर्वनामस्थाने-" इति दीर्घे प्राप्ते-

### दीर्घनियामकं सूत्रम्-

**इन्हन्पूषार्यम्णां शौ ६ । ४ । १२**

**एषां शावेवोधाया दीर्घः, नान्यत्र । इति निषेधे प्राप्ते-**

(इन्हन्पूषार्यम्णाम्, उपधायाः, दीर्घः, शौ)

**सरलार्थः–** इन्, हन्, पूषन्, अर्यमन् इत्यन्तानामुधाया दीर्घो भवति चेत्तर्हि 'शि' परे सत्येव नान्यत्र ।

### दीर्घादेशविधायकं विधिसूत्रम्-

**सौ च ६ । ४ । १३**

**इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ सौ परे । वृत्रहा । हे वृत्रहन् ! । "एकाजुत्तरपदे-" इति णत्वम् । वृत्रहणौ । वृत्रहणः । वृत्रहणम् । वृत्रहणौ ।**

(इन्हन्पूषार्यम्णाम्, उपधायाः, दीर्घः, असम्बुद्धौ सौ च)

**सरलार्थः-** इन्, हन्, पूषन्, अर्यमन् इत्यन्तानामुधायाः सौ विभक्तौ परतः दीर्घादेशो भवति ।

### कुत्वादेशविधायकं विधिसूत्रम्-

**हो हन्तेर्ञ्णिन्नेषु ७ । ३ । ५४**

**ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं स्यात् ।**

(हन्तेः, हः, कुः, ञ्णिन्नेषु)

**सरलार्थः-** हन्धातोः हकारस्य स्थाने कवर्गादेशो भवति ञिति, णिति च प्रत्यये, नकारे च परतः ।

### णत्वादेशविधायकं विधिसूत्रम्-

**हन्तेः ८ । ४ । २२**

**उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात् । प्रहण्यात् ।**

(हन्तेः,रषाभ्यां नः णः, अट्कुप्वाङ्नुम्व्यवायेऽपि, उपसर्गाद्)

**सरलार्थः-** उपसर्गस्थनिमित्ताभ्यां रेफषकाराभ्यां परस्य हन्तेर्नकारस्य स्थाने णकारादेशो भवति ।

### णत्वनियामकं सूत्रम्-

**अत्पूर्वस्य । ८ । ४ । २२**

**हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य । प्रघ्नन्ति ।**

**योगविभागसामर्थ्याद् "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" (परि.) इति न्यायं बाधित्वा "एकाजुत्तरपदे णः" इति णत्वमपि निवर्तते । नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्, वृत्रघ्नः । वृत्रघ्ना इत्यादि । यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तम्, तद्भाष्यवार्तिकविरुद्धम् ॥**

(रषाभ्यां हन्तेः, अत्पूर्वस्य, नः णः, अट्कुप्वाङ्नुम्व्यवायेऽपि)

**सरलार्थः-** हन्धातोः ह्रस्वाकारपूर्वस्यैव नकारस्य णत्वं भवति नान्यस्य ।

वृत्रहन् + शस् - वृत्रहन् + अस् - वृत्रह्न् + अस् - वृत्रघ्न् + अस् - वृत्रघ्नस् - वृत्रघ्नरु - वृत्रघ्नर् - **वृत्रघ्नः** ।
**एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन् । यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि "इन्हन् -" इत्यत्र ग्रहणं**

**भवत्येव, "अनिनस्मन्-ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति"** (परि.) **इति वचनात् । अर्यम्णि, अर्यमणि । पूष्णि, पूषणि ।**

यशस्विन् + सु - यशस्विन् + स् - यशस्वीन् + स् - यशस्वीन् - **यशस्वी** ।

यशस्विन् + औ - **यशस्विनौ** ।

अर्यमन् + ङि - अर्यमन् + इ - अर्यम्न् + इ - अर्यम्ण् + इ - **अर्यम्णि** । अत्र "विभाषा ङिश्योः" इति विकल्पेन अकारलोपः, तदभावक्षे - अर्यमन् + ङि - अर्यमन् + इ - अर्यमण् + इ - **अर्यमणि** ।

| राजन्-शब्दस्य रूपावली | | | ब्रह्मन्-शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| राजा | राजानौ | राजानः | ब्रह्मा | ब्रह्माणौ | ब्रह्माणः |
| राजानम् | राजानौ | राज्ञः | ब्रह्माणम् | ब्रह्माणौ | ब्रह्मणः |
| राज्ञा | राजभ्याम् | राजभिः | ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः |
| राज्ञे | राजभ्याम् | राजभ्यः | ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| राज्ञः | राजभ्याम् | राजभ्यः | ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| राज्ञः | राज्ञोः | राज्ञाम् | ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| राज्ञि / राजनि | राज्ञोः | राजसु | ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु |
| हे राजन् ! | हे राजानौ ! | हे राजानः ! | हे ब्रह्मन् ! | हे ब्रह्माणौ ! | हे ब्रह्माणः ! |

## रूपसाधनप्रकारः

**राज्ञः**

राजन्शब्दस्य प्रातिपदिकसंज्ञायां तस्माद् "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति द्वितीयाया बहुवचने शस्विभक्तौ अनुबन्धलोपे 'राजन् + अस्' इति जाते "यचि भम्" इत्यनेन भसंज्ञायाम् "अल्लोपोऽनः" इति सूत्रेण अकारस्य लोपे 'राज्न् + अस्' इति जाते "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे 'राज्ञ् + अस्' इति जाते जञोर्ज्ञादेशे वर्णसम्मेलने 'राज्ञस्' इति जाते पदसंज्ञायां सकारस्य रुत्वे विसर्गे च 'राज्ञः' इति रूपं सिद्धम् ।

**ब्रह्मणे**

ब्रह्मन्शब्दस्य प्रातिपदिकसंज्ञायां तस्माद् "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तौ अनुबन्धलोपे 'ब्रह्मन् + ए' इत्यवस्थायां भसंज्ञायाम् "अल्लोपोऽनः" इति अकारस्य लोपे प्राप्ते "न संयोगाद्वमन्तात्" इत्यनेन तन्निषेधे 'ब्रह्मन् + ए' इति जाते "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण णत्वे वर्णयोगे च 'ब्रह्मणे' इति रूपं सिद्धम् ।

# अभ्यासः

## १. युक्तकथनेषु ✓ इति चिह्नं तथाऽयुक्तकथनेषु X इति चिह्नं योजयत

(क) 'राजन् + सु - राजन् + स्' इत्यवस्थायां उपधादीर्घात् पूर्वं हल्ङ्यादिलोपो भवति ।

(ख) 'राज्ञि' इत्यत्र "अल्लोपोऽनः" इति अकारलोपः ।

(ग) सुब्विधौ "न लोपः..." इत्यनेन विहितो नकारलोपः सिद्धो भवति ।

(घ) 'ब्रह्मन् + ए' इत्यत्र अनोऽकारस्य लोपो विधीयते ।

(ङ) 'वृत्रघ्नः' इत्यत्र कुत्वविधिसामर्थ्यादल्लोपस्य स्थानिवद्भावो न भवति ।

## २. रिक्तस्थानं पूरयत

(क) "न ङिसम्बुद्ध्योः" इति सूत्रेण ङौ परे ... ... ... ... च नलोपो निषिद्ध्यते ।

(ख) 'वृत्रहणौ' इत्यत्र ... ... ... ... इति सूत्रेण नकारस्य णत्वं विधीयते ।

(ग) "... ... ... ..." इति सूत्रं ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वविधायकम् ।

(घ) 'राजन् + ङे' इत्यत्र प्रातिपदिकस्य भपदसंज्ञयोः ... ... ... ... संज्ञा भवति ।

(ङ) ... ... ... ... विभक्तौ अनोऽकारस्य विकल्पेन लोपो भवति ।

(च) "हलि च" इति सूत्रं ... ... ... ... करोति ।

## ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

राजन्+आम्, यज्वन्+सुप्, ब्रह्मन्+अम्, वृत्रहन्+ङसि, अर्यमन्+ङि, पूषन्+जस्, शार्ङ्गिन्+सु ।

## ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

यशस्वी, राज्ञा, यज्वानः, ब्रह्मणि, वृत्रघ्नाम्, पूष्णि ।

## ५. अधस्तनप्रश्नानामुत्तरं लिखत

(क) भसंज्ञायां पदसंज्ञायां वा अनोऽल्लोपो भवति ?

(ख) सम्बोधने पदान्तस्य नस्य लोपनिषेधकं सूत्रं किम् ?

(ग) "पूर्वत्रासिद्धमि"त्यनेन नलोपस्यासिद्धत्वनियामकं सूत्रं किम् ?

(घ) 'यज्वनः' इत्यत्र केन हेतुना अल्लोपनिषेधो भवति ?

(ङ) कीदृशानां नकारान्तशब्दानां 'सौ च' इत्यनेन उपधादीर्घो विधीयते ?

(च) 'प्रघ्नन्ति' इत्यत्र णत्वं कथं वार्यते ?

(छ) कस्मात् परस्य हन्तेर्नकारस्य णत्वम् ?

(ज) 'प्रतिदीव्नः' इत्यत्र दीर्घसम्पादकं सूत्रं किम् ?

(झ) इन्नादयश्चत्वारः शब्दाः के ?

(ञ) यशस्विन्-शब्दस्य शसि पुंसि किं रूपं निष्पद्यते ?

## ६. समानविभक्तिमनुसृत्य परस्परं मेलयत

| | |
|---|---|
| राज्ञाम् | ब्रह्मभ्याम् । |
| राजा | राज्ञोः । |
| प्रतिदीव्नः | वृत्रघ्नः । |
| यज्वभ्याम् | यशस्विनाम् । |
| ब्रह्मणोः | वृत्रहा । |

## ७. अधःप्रदत्तानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां निर्दिशत

राजा । हे राजन् ! राजभ्याम् । ब्रह्मणः । वृत्रघ्नः । यशस्वी । अर्यम्णि, अर्यमणि । प्रतिदीव्ना ।

## ८. अधस्तनसूत्रपरिभाषाणां सरलार्थं लिखत

(क) न ङिसंबुद्ध्योः । (ख) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।

(ग) न संयोगाद्वमन्तात् । (घ) इन्हन्पूषार्यम्णां शौ ।

(ङ) सौ च । (ङ) अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा (परि.) ।

(च) अनिनस्मन्-ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति (परि.) ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं कुरुत

राज्ञि, ब्रह्मणे, वृत्रहा, यशस्विनः, पूषा, राजन्, यज्वना, शार्ङ्गिणौ ।

हलन्तपुँल्लिङ्गप्रकरणे

# नकारान्तधकारान्तशब्दयो रूपसिद्धिप्रक्रिया

### विभाषया तृ इत्यन्तादेशविधायकं विधिसूत्रम्-

**मघवा बहुलम् ६ । ४ । १२८**

**मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात् । ऋ इत् ।**

(मघवा, बहुलम्, तृ)

**सरलार्थः-** मघवन्शब्दस्यान्त्यवर्णस्य स्थाने विभाषया तृ इत्यादेशो भवति । तृ इत्यस्य ऋकार इत् । मघवन्शब्दस्य स्थाने मघवत्शब्दः प्रयोक्तव्य इत्यर्थः ।

### नुमागमविधायकं विधिसूत्रम्-

**उगिदचां सर्वनामस्थानेऽधातोः ७ । १ । ७०**

**अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे । उपधादीर्घः - मघवान् । इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात् । तथा च "श्वन्नुक्षन्-" (उ.सू.) इति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे । 'हविर्जक्षति निःशङ्को मखेषु मघवान्नसौ' इति भट्टिः । मघवन्तौ । मघवन्तः । हे मघवन् । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्यामित्यादि । तृत्वाभावे मघवा । "छन्दसीवनिपौ च" इति वनिबन्तं मध्योदात्तं छन्दस्येव । अन्तोदात्तं तु लोकेऽपीति विशेषः । मघवानौ । मघवानः । सुटि राजवत् ।**

(अधातोः, उगिदचाम्, नुम्, सर्वनामस्थाने)

**सरलार्थः-** यस्मिन् धातुभिन्नेऽङ्गे उक्-प्रत्याहारस्येत्संज्ञा विहिता वर्तते तस्य, नलोपिनः 'अञ्चु गतौ' इति धातुरूपाङ्गस्य च सर्वनामस्थाने परे नुमागमो भवति ।

मघवन् + सु - मघवन् + स् - मघवत् + स् - मघवन् (नुम्) त् + स् - मघवन्त् - मघवन् - **मघवान्** (अत्र "सर्वनामस्थाने चासम्बुद्धौ" इति उपधादीर्घे कर्तव्ये "संयोगान्तस्य लोपः" इत्यस्य त्रिपादीत्वेन तद्विहितस्य तलोपस्य प्राप्तमसिद्धत्वं न भवति, "मघवा बहुलम्" इति सूत्रे बहुलग्रहणादिति बोध्यम् ।) । मघवन् + औ - मघवत् + औ - अघवन्त् + औ - **मघवन्तौ** । मघवन् + जस् - मघवन् + अस् - मघवत् - अस् - मघवन्त् अस् - मघवन्तस् - मघवन्तरु - मघवन्तर् - **मघवन्तः** । मघवन् + भ्याम् - मघवत् + भ्याम् - **मघवद्भ्याम्** ।

तृत्वाभावे - **मघवा । मघवानौ । मघवानः । मघवानम् । मघवानौ** इति राजन्-शब्दवत् ।

मघवन् + सु - मघवन् + स् - मघवान् + स् - मघवान् - **मघवा** । शसि विशेषमाह-

### सम्प्रसारणादेशविधायकं विधिसूत्रम्-

**श्वयुवमघोनामतद्धिते ६ । ४ १३३**

**अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे संप्रसारणं स्यात् । "संप्रसारणाच्च" इति पूर्वरूपम्, "आद् गुणः" इति गुणः - मघोनः । अन्नन्तानां किम् - मघवतः । स्त्रियां - मघवती । अतद्धिते किम् - माघवनम् । मघोना । मघवभ्याम् इत्यादि । शुनः । शुना । श्वभ्यामित्यादि । युवन्-शब्दे वस्योत्त्वे कृते-**

**सरलार्थः-** श्वन्, युवन्, मघवन् इति एतेषां नान्तानां शब्दानां भसंज्ञायां संप्रसारणं भवति, तद्धिते तु भसंज्ञायामपि संप्रसारणं न भवति ।

मघवन् + शस् - मघवन् + अस् - मघ उ अन् + अस् - मघ उन् + अस् (सम्प्रसारणाच्च) - मघोन + अस् (आद् गुणः) - मघोनस् - मघोनरु - मघोनर् - **मघोनः** ।

श्वन्-शब्दस्य, **श्वा । श्वानौ । श्वानः । श्वानम् । श्वानौ । शुनः । शुना । श्वभ्याम् । श्वभिः** इत्यादि ।

श्वन् + शस् - श्वन् + अस् - श् उ अन् अस् - श् उन् + अस् - शुनस् - शुनर् - **शुनः** । युवन्-शब्दस्य - **युवा । युवानौ । युवानः । युवानम् । युवानौ** ।

शसि युवन्-शब्दे वस्योत्वे (संप्रसारणे) कृते यु उ अन् + अस् इत्यत्र यकारस्यापि संप्रसारणे प्राप्ते-

### सम्प्रसारणादेशनिषेधविधायकं सूत्रम्-

**न संप्रसारणे संप्रसारणम् ६ । १ । ३७**

**संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात् । इति यकारस्य नेत्वम् । अत एव ज्ञापकादन्त्यस्य यणः पूर्वं संप्रसारणम्, यूनः । यूना । युवभ्याम् इत्यादि । अर्वा । हे अर्वन् !**

(संप्रसारणे, संप्रसारणम्, न, इग्यणः सम्प्रसारणम्)

**सरलार्थः-** सम्प्रसारणे परे सति पूर्वस्य यणः स्थाने सम्प्रसारणादेशो न भवति ।

युवन् + शस् - युवन् + अस् - यु उ अन् + अस् - यु उन् + अस् (पूर्वरूपम्) - यून् + अस् (अकः सवर्णे दीर्घः) - यूनरु - यूनर् - **यूनः** ।

अर्वन्-शब्दस्य - **अर्वा । हे अर्वन् !** राजन्-शब्दवत् ।

### तृ-इत्यन्तादेशविधायकं विधिसूत्रम्-

**अर्वणस्त्रसावनञः ६ । ४ । १२७**

**नञा रहितस्यार्वन्नित्यस्याङ्गस्य तृ इत्यन्तादेशः स्यात्, न तु सौ । उगित्वान्नुम्- अर्वन्तौ । अर्वन्तः । अर्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्याम् इत्यादि । अनञः किम् - अनर्वा, यज्ववत् ।**

(अनञः, अर्वणः, तृ, असौ, अङ्गस्य)

**सरलार्थः-** नञ्समासरहितस्य अर्वन्-शब्दरूपस्याङ्गस्य तृ इत्यन्तादेशो भवति, सौ परे तु न भवति ।

अर्वन् + औ - अर्वत् + औ (त्रन्तादेशः) - अर्वन्त् + औ (उगिदचां सर्वनामस्थानेऽधातोः) - **अर्वन्तौ** ।

### आकारान्तादेशविधायकं विधिसूत्रम्-

**पथिमथ्यृभुक्षामात् ७ । १ । ८५**

**एषामाकारोऽन्तादेशः स्यात्सौ परे । आ आत् इति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः ।**

(पथिमथ्यृभुक्षाम्, आत्, सौ)

**सरलार्थः-** पथिन्, मथिन्, ऋभुक्षिन् एषां शब्दानामन्त्यवर्णस्य स्थाने सौ परे आकारादेशो भवति ।

अत्र नकारस्य आकारादेशे अनुनासिक आकार न स्यादित्येतदर्थम् आत् इत्यत्र आ-आत् इति विगृह्य निरनुनासिक आकारोऽन्तादेशो भवतीति स्वीक्रियते ।

### अकारादेशविधायकं विधिसूत्रम्-

**इतोऽत्सर्वनामस्थाने ७ । १ । ८५**

**पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे ।**

(पथिमथ्यृभुक्षाम्, इतः, अत्, सर्वनामस्थाने)

**सरलार्थः-** पथिन्, मथिन्, ऋभुक्षिन् एषां शब्दानामिकारस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परे ।

### न्थादेशविधायकं विधिसूत्रम्-

**थो न्थः ७ । १ । ८७**

**पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे ।**

**पन्थाः । पन्थानौ । पन्थानः । पन्थानम् । पन्थानौ ।**

(पथिमथ्यृभुक्षाम्, थः, न्थः, सर्वनामस्थाने)

**सरलार्थः–** पथिन्-मथिन्शब्दयोः थस्य स्थाने न्थादेशो भवति सर्वनामस्थाने परे ।

पथिन् + सु - पथिन् स् - पथि आ + स् (पथिमथ्यृभुक्षामात्) - पथ आ + स् (इतोऽत् सर्वनामस्थाने) - पन्थ आ + स् (थो न्थः) - पन्थास् - पन्थारु - पन्थार् - **पन्थाः** ।

पथिन् + औ - पथन् + औ - पन्थन् + औ - पन्थान् + औ (उपधादीर्घः) - **पन्थानौ** ।

### टेर्लोपविधायकं विधिसूत्रम्-

**भस्य टेर्लोपः ७ । १ । ८८**

**भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात् । पथः । पथा । पथिभ्याम् इत्यादि । एवं मन्थाः । ऋभुक्षाः । स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः । सुपथी । सुमथी, नगरी । अनृभुक्षी सेना । आत्वं नपुंसके न भवति "न लुमताङ्गस्य" इति प्रत्ययलक्षणनिषेधात् । सुपथि वनम् । "संबुद्धौ नपुंसकानां नलोपो वा वाच्यः" (वा) हे सुपथिन् !, हे सुपथि वनम् !**

**"सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः" । हे सुपथिन्, हे सुपथि ! "नलोपः सुप्स्वर.." इति नलोपस्यासिद्धत्वाद् ह्रस्वस्य गुणो न । द्विवचने भत्वाट्टिलोपः । सुपथी । शौ सर्वनास्थानत्वात् सुपन्थानि । पुनरपि सुपथि, सुपथी, सुपन्थानि । सुपथा । सुपथे । सुपथिभ्यामित्यादि ।**

(पथिमथ्यृभुक्षाम्, भस्य, टेः, लोपः)

**सरलार्थः–** भसंज्ञकानां पथिन्-मथिन्-ऋभुक्षिन्शब्दानां टिभागस्य लोपो भवति ।

पथिन् + शस् - पथिन् + अस् - पथ् + अस् (टिलोपः) - पथस् - पथरु - पथर् - **पथः** ।

पथिन् + टा - पथिन् + आ - पथ् + आ - **पथा** । पथिन् + भ्याम् - **पथिभ्याम्** (नलोपः) ।

### षट्संज्ञाविधायकं सूत्रम्-

**ष्णान्ता षट् १ । १ । २४**

**षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात् । "षड्भ्यो लुक्" । पञ्च । पञ्च । संख्या किम् ? विप्रुषः, पामानः । शतानि, सहस्राणि इत्यत्र सन्निपातपरिभाषया न लुक्, सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात् । पञ्चभिः । पञ्चभ्यः । पञ्चभ्यः । "षट्चतुर्भ्यश्च" इति नुट् ।**

(ष्णान्ता, सङ्ख्या, षट्)

**सरलार्थः–** षकारान्ता नकारान्ताश्च सङ्ख्यावाचकाः शब्दाः षट्संज्ञका भवन्ति ।

पञ्चन्-शब्दो नित्यं बहुवचनान्तः । पञ्चन् + जस् - पञ्चन् + अस् - पञ्चन् (षड्भ्यो लुक्) - **पञ्च** ।

पञ्चन् + भिस् - पञ्च + भिस् (नलोपः) - पञ्चभिरु - पञ्चभिर् - **पञ्चभिः**।

आमि "षट्चतुर्भ्यश्च" इति नुटि कृते-

### दीर्घादेशविधायकं विधिसूत्रम्-

**नोपधायाः ६।४।७**

**नान्तस्योपधाया दीर्घः स्यान्नामि परे। नलोपः। पञ्चानाम्। पञ्चसु। परमपञ्च। परमपञ्चानाम्। गौणत्वे तु न लुङ्नुटौ। प्रियपञ्चा। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियपञ्चनाम्। एवं सप्तन् नवन् दशन्।**

(नः, अङ्गस्य, उपधायाः, दीर्घः, नामि)

**सरलार्थः-** नकारान्तस्याङ्गस्य दीर्घादेशो भवति नामि परे।

पञ्चन् + आम् - पञ्चन् + नाम् (षट्चतुर्भ्यश्च) - पञ्चान् नाम् (नोपधायाः) - पञ्चा नाम् (न लोपः प्रातिपदिकान्तस्य) - पञ्चानाम्। एवं सप्तन्-नवन्-दशन्शब्दाः ज्ञेयाः।

### आकारादेशविधायकं विधिसूत्रम्-

**अष्टन आ विभक्तौ ७।२।८४**

**अष्टन आत्वं स्याद्धलादौ विभक्तौ।**

(अष्टनः, आ, हलि, विभक्तौ)

**सरलार्थः-** अष्टन्शब्दस्य स्थाने आकारान्तादेशो भवति हलादौ विभक्तौ परतः।

### औशादेशविधायकं विधिसूत्रम्-

**अष्टाभ्य औश् ७।१।२१**

**कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्। 'अष्टभ्यः' इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदमष्टन आत्वम्, "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। अष्टौ। अष्टौ। परमाष्टौ। अष्टाभिः। अष्टाभ्यः। अष्टाभ्यः। अष्टानाम्। अष्टासु। आत्वाभावे-अष्ट। अष्ट इत्यादि पञ्चवत्। गौणत्वे त्वात्वाभावे राजवत्। शसि प्रियाष्टनः। इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावान्न ष्टुत्वम्। कार्यकालपक्षे बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वा। प्रियाष्ट्वा इत्यादि।**

**जश्शसोरनुमीयमानमात्वं प्राधान्य एव, न तु गौणतायाम्। तेन प्रियाष्टनो हलादावेव वैकल्पिकमात्वम्।**

**प्रियाष्टाः । प्रियाष्टाभ्याम् । प्रियाष्टाभिः । प्रियाष्टाभ्यः । प्रियाष्टाभ्यः । प्रियाष्टासु । "प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि" ।**

**भष्भावः, जश्त्वचर्त्वे , भुत्, भुद् । बुधौ । बुधः । बुधा । भुद्भ्याम् । भुत्सु ।**

(अष्टाभ्यः, जश्शसोः, औश्)

**सरलार्थः–** आकारादेशविशिष्टाद् अष्टन्-शब्दात् परयोः जश्शसोः स्थाने औशादेशो भवति ।

"अष्टन आ विभक्तौ" इत्यत्र हलीत्यनुवृत्या हलादौ विभक्तौ अष्टन आकारान्तादेशो भवतीत्यर्थस्य "अष्टाभ्य औश्" इति जश्शसोरौश्विधायके सूत्रे दीर्घविशिष्टस्य 'अष्टभ्यः' इति निर्देशेनैव सिद्धे 'अष्टाभ्यः' इति दीर्घविशिष्टस्य निर्देशेन जश्शसोर्विषयेऽपि आकारान्तादेशो भवतीति विशेषार्थो ज्ञाप्यते इत्यर्थः । एवमेव "अष्टनो दीर्घात्" इति उदात्तस्वरविधायके सूत्रे दीर्घादिति विशेषणदानेन ह्रस्वान्तोऽपि अष्टन्शब्दः प्रयुज्यते इति ज्ञायते । अष्टन्शब्दस्य षट्संज्ञायां जश्शसोर्लुकि प्राप्ते तदपवाद औशादेश इति बोध्यम् ।

अष्टन् + जस् - अष्टन् + अस् - अष्ट आ + अस् - अष्टा + अस् (सवर्णदीर्घः) - अष्टा + औश् - अष्टा + औ - **अष्टौ** । आत्वाभावे "षड्भ्यो लुक्" इति लुकि, नलोपः । अष्टन् + जस् - अष्टन् + अस् - अष्टन् - **अष्ट** । अष्टन् + भिस् - अष्ट आ + भिस् - अष्टाभिस् - अष्टाभिरु - अष्टाभिर् - **अष्टाभिः** । आत्वाभावे पदसंज्ञायां पदान्तस्य नकारस्य लोपः । अष्टन् + भिस् - अष्ट + भिस् - अष्टभिरु - अष्टभिर् - **अष्टभिः** ।

प्रिया अष्टौ यस्येति बहुव्रीहौ अष्टन्शब्दस्य गौणत्वे आत्वाभावे राजवत् । **प्रियाष्टा** । **प्रियाष्टानौ** ।

**प्रियाष्टानः** । **प्रियाष्टानम्** । **प्रियाष्टानौ** । शसि - **प्रियाष्ट्नः** । इह अल्लोपस्य स्थानिवद्भावान्न ष्टुत्वम् । **प्रियाष्ट्ना** इत्यादि । जश्शसोरनुमीयमानमात्वं प्राधान्ये एव, न तु गौणतायाम् । तेन प्रियाष्टन्शब्दस्य हलादावेव वैकल्पिकमात्वम् - **प्रियाष्टाभ्याम्** । **प्रियाष्टाभिः** । बुध्-शब्दस्य भष्भावः, जश्त्वचर्त्वे - **भुत्, भुद्** । **बुधौ** । **बुधः** । **बुधा** । **भुद्भ्याम्** । **भुत्सु** ।

बुध् + सु - बुध् + स् - बुध् - भुध् - भुद् - **भुत्/भुद्** । "वाऽवसाने" इति चर्त्वम् वा ।

बुध् + औ - **बुधौ** । बुध् + जस् - बुध् + अस् - बुधस् - बुधरु - बुधर् - **बुधः** ।

बुध् + भ्याम् - भुध् + भ्याम् - **भुद्भ्याम्** ।

बुध् + सुप् - बुध् + सु - भुध् + सु - **भुत्सु** । खरि चेति चर्त्वम् ।

| मघवन्-शब्दस्य तृत्वाभावे रूपावली | | |
|---|---|---|
| मघवा | मघवानौ | मघवानः |
| मघवानम् | मघवानौ | मघोनः |
| मघोना | मघवभ्याम् | मघवभिः |
| मघोने | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघोनोः | मघोनाम् |
| मघोनि | मघोनोः | मघवसु |
| हे मघवन् ! | हे मघवानौ ! | हे मघवानः ! |

| युवन्-शब्दस्य रूपावली | | |
|---|---|---|
| युवा | युवानौ | युवानः |
| युवानम् | युवानौ | यूनः |
| यूना | युवभ्याम् | युवभिः |
| यूने | युवभ्याम् | युवभ्यः |
| यूनः | युवभ्याम् | युवभ्यः |
| यूनः | यूनोः | यूनाम् |
| यूनि | यूनोः | युवसु |
| हे युवन् ! | हे युवानौ ! | हे युवानः ! |

| पथिन्-शब्दस्य रूपावली | | |
|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः |
| पन्थानम् | पन्थानौ | पथः |
| पथा | पथिभ्याम् | पथिभिः |
| पथे | पथिभ्याम् | पथिभ्यः |
| पथः | पथिभ्याम् | पथिभ्यः |
| पथः | पथोः | पथाम् |
| पथि | पथोः | पथिषु |
| हे पन्थाः ! | हे पन्थानौ ! | हे पन्थानः ! |

| पञ्चन्-शब्दस्य रूपावली |
|---|
| पञ्च |
| पञ्च |
| पञ्चभिः |
| पञ्चभ्यः |
| पञ्चभ्यः |
| पञ्चानाम् |
| पञ्चसु |
| हे पञ्च ! |

## रूपसाधनप्रकारः

**मघोनः**

मघवन्शब्दस्य प्रातिपदिकसंज्ञायां तस्माद् "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ अनुबन्धलोपे 'मघवन् + अस्' इत्यवस्थायां "यचि भम्" इति सूत्रेण भसंज्ञायां "श्वयुवमघोनामतद्धिते" इत्यनेन वकारस्य संप्रसारणे 'मघ उ अन् + अस्' इति जाते "संप्रसारणाच्च" इति सूत्रेण पूर्वरूपे "आद् गुणः" इत्यनेन गुणे 'मघोन् + अस्' इति जाते वर्णयोगे सकारस्य रुत्वे विसर्गे च 'मघोनः' इति रूपं सिद्धम् ।

**पन्थाः**

पथिन्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे 'पथिन् + स्' इति जाते "पथिमथ्यृभुक्षामात्" इति सूत्रेण नकारस्य आकारादेशे "इतोऽत्सर्वनामस्थाने" इति सूत्रेण इकारस्य अकारादेशे 'पथ आ + स्' इति जाते "थो न्थः" इति सूत्रेण थस्य न्थादेशे सवर्णदीर्घे 'पन्थास्' इति जाते सकारस्य रुत्वे विसर्गे च 'पन्थाः' इति रूपं सिद्धम् ।

**पञ्चानाम्**

पञ्चन्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ 'पञ्चन् + आम्' इति जाते षट्संज्ञायां "षट्चतुर्भ्यश्च" इति सूत्रेण नुडागमेऽनुबन्धलोपे 'पञ्चन् + नाम्' इति जाते "नोपधायाः" इति सूत्रेण उपधाया दीर्घे पदसंज्ञायां "न लोपः प्रातिपदिकान्तस्य" इति सूत्रेण नकारस्य लोपे च 'पञ्चानाम्' इति रूपं सिद्धम् ।

# अभ्यासः

## १. परस्परं मेलयत

| | |
|---|---|
| मघोने | षष्ठीबहुवचने । |
| यूनि | द्वितीयाबहुवचने । |
| पथाम् | पञ्चमीबहुवचने । |
| पञ्च | चतुर्थ्येकवचने । |
| अष्टाभ्यः | सप्तम्येकवचने । |

## २. रिक्तस्थानं पूरयत

(क) "अष्टाभ्य औश्" इति सूत्रेण ... ... ... ... स्थाने औशादेशो भवति ।

(ख) मघवन्-शब्दस्य त्रन्तादेशविधायकसूत्रं "... ... ... ..." इति ।

(ग) "... ... ... ..." इति सूत्रं षान्तनान्तसंख्याशब्दानां षट्संज्ञाविधायकम् ।

(घ) भसंज्ञकस्य युवन्-शब्दस्य यकारस्य संप्रसारणं "... ... ... ..." इति सूत्रेण निषिध्यते ।

(ङ) संप्रसारणादचि "... ... ... ..." इति सूत्रेण ... ... ... ... एकादेशो भवति ।

## ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

मघवन्+शस्, मघवत्+भिस्, युवन्+ङे, श्वन्+ङसि, पथिन्+औ, मथिन्+सु, अष्टन्+भ्यस् ।

## ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

पञ्च, यूनि, शुनाम्, मघोनोः, मघवन्तः, पन्थानम्, भुद्भ्याम्, पथे ।

## ५. अधस्तनप्रश्नानामुत्तरं लिखत

(क) 'मघवान्' इत्यत्र उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं कथं न भवति ?

(ख) श्वभ्यामित्यत्र नलोपप्रयोजकं पदसंज्ञाविधायकं सूत्रं किम् ?

(ग) पथिन्शब्दस्य नकारस्य आकारादेशे अनुनासिक आकारादेशो भवेदिति आशङ्कायाः प्रयोजकं कारणं किमस्ति ?

(घ) 'पञ्चानाम्' इत्यत्र नुडागमे कृते "नामि" इत्यनेन दीर्घो भवति न वा ?

(ङ) बुध्-शब्दस्य भष्भावः केन सूत्रेण भवति ?

(च) "अष्टाभ्य औश्" इति सूत्रे कृतात्वनिर्देशेन किं ज्ञाप्यते ?

(छ) "अष्टनो दीर्घात्" इति सूत्रस्थं दीर्घग्रहणं किं ज्ञापयति ?

(ज) "श्वयुवमघोनामतद्धिते" इत्यत्र कति शब्दा निर्दिष्टाः सन्ति, के च ते ?

(झ) 'यूनः' इत्यत्र पूर्वं वकारस्य संप्रसारणस्य, यकारस्य संप्रसारणाभावस्य च कारणं किम् ?

(ञ) "अष्टन आ विभक्तौ" इत्यत्र 'हलादौ विभक्तौ' इत्युक्तेऽपि जश्शसोर्विषये अष्टन्शब्दस्य आकारान्तादेशः कथं सुलभः ?

## ६. अधःप्रदत्तानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां निर्दिशत

मघवान् । मघोनः । पन्थाः । पथः । मघवन्तौ । यूना । अष्टौ । अष्टानाम् । पञ्चानाम् ।

## ७. अधस्तनसूत्राणां सरलार्थं लिखत

(क) उगिदचां सर्वनामस्थानेऽधातोः

(ख) न संप्रसारणे संप्रसारणम् ।

(ग) इतोऽत्सर्वनामस्थाने ।

(घ) ष्णान्ता षट् ।

(ङ) अष्टाभ्य औश् ।

(च) मघवा बहुलम् ।

## ८. युवन्-शब्दस्य सर्वाणि रूपाणि विलिख्य प्रथमान्तपदानां वाक्ये प्रयोगं दर्शयत ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

श्वानम्, मघोना, मघवते, पन्थाः, पञ्चभ्यः, अष्ट, अष्टानाम्, बुधः, भुत्सु ।

## हलन्तपुँल्लिङ्गप्रकरणे

# जान्तादिशब्दानां रूपसिद्धिप्रक्रिया

### क्विन्-प्रत्ययविधायकं विधिसूत्रम्-

**ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३ । २ । ५९**

**एभ्यः क्विन् स्यात् । अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते । निरुपपदाद् युजेः क्विन् । कनावितौ ।**

(ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम्, च, क्विन्, धातोः)

**सरलार्थः–** ऋतौ उपपदे यज्धातोः, धृष्धातोः, सृज्धातोः, दिश्धातोः, ष्णिह्धातोः, अञ्चुधातोः, युज्धातोः, क्रुञ्च्धातोश्च क्विन्प्रत्ययो भवति । धृष्धातोः क्विन्प्रत्यये कृते द्वित्वविधायकसूत्रस्य अभावात् कथं सूत्रे दधृगिति शब्दस्वरूपं निर्दिष्टमित्यादि जिज्ञासायामाह - केनापि सूत्रेण अप्राप्तमपि कार्यं प्रामाणिकानां प्रयोगवशात् साधुत्वेन स्वीक्रियते ।

### कृत्संज्ञाविधायकं सूत्रम्-

**कृदतिङ् ३ । ७ । ९३**

**सन्निहिते धात्वधिकारे तिङ्भिन्नप्रत्ययः कृत्संज्ञः स्यात् ।**

(तत्र, धातोः, अतिङ्, कृद्)

**सरलार्थः–** "धातोः" इत्यस्मिन्नधिकारे विहितास्तिङ्भिन्नप्रत्ययाः कृत्संज्ञका भवन्ति ।

### वकारलोपविधायकं विधिसूत्रम्-

**वेरपृक्तस्य ६ । १ । ६७**

**अपृक्तस्य वस्य लोपः स्यात् । "अपृक्त एकाल्प्रत्ययः" इति अपृक्तसंज्ञा । "कृत्तद्धितसमासाश्च" इति प्रातिपदिकत्वात् स्वादयः ।**

(अपृक्तस्य, वेः, लोपः)

**सरलार्थः–** अपृक्तसंज्ञकस्य वकारस्य लोपो भवति ।

## नुमागमविधायकं विधिसूत्रम्-

**युजेरसमासे ७ । १ । ७१**

**युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः, संयोगान्तलोपः ।**

**सरलार्थः–** युज्शब्दस्य नुमागमो भवति सर्वनामस्थाने विभक्तौ परतः । समासे तु नुमागमो न भवति ।

## कुत्वादेशविधायकं विधिसूत्रम्-

**क्विन्प्रत्ययस्य कुः ८ । २ । ६२**

**क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात् पदान्ते । नस्य कुत्वेनानुनासिको ङकारः । युङ् । "नश्चापदान्तस्य.." इनि नुमोऽनुस्वारः, परसवर्णः, तस्यासिद्धत्वात् "चोः कुः" इति कुत्वं न - युञ्जौ । युञ्जः । युञ्जम् । युञ्जौ । युजः । युजा युग्भ्यामित्यादि । असमासे किम् ?-**

(क्विन्प्रत्ययस्य, कुः, पदस्य अन्ते)

**सरलार्थः–** क्विन्प्रत्ययो यस्माद् विहितोऽस्ति तस्य स्थाने कवर्गान्तादेशो भवति पदान्ते ।

युज् + क्विन् - युज् + व् (अनुबन्धलोपः) - युज् - युज् + सु - युज् + स् - यु न् (नुमागमः) ज् + स् - युंज् + स् - युञ्ज् + स् - युञ्ज् (सलोपः) - युञ् (संयोगान्तलोपः) - **युङ् (कुत्वम्)** ।

"नश्चापदान्तस्य-" इति नुमोऽनुस्वारः, परसवर्णः, तस्यासिद्धत्वात् "चोः कुः" इति कुत्वं न - **युञ्जौ** । **युञ्जः** **युञ्जम्** । **युञ्जौ** । **युजः** । **युजा युग्भ्याम्** इत्यादि । समासे तु -

## कवर्गादेशविधायकं विधिसूत्रम्-

**चोः कुः ८ । २ । ३०**

**चवर्गस्य कवर्गः स्याद् झलि पदान्ते च । इति कुत्वम्, "क्विन्प्रत्ययस्य-" इति कुत्वस्यासिद्धत्वात्, सुयुक्, सुयुग् । सुयुजौ । सुयुजः । युजेरिति धातुपाठपठितेकारविशिष्टस्यानुकरणं न त्विका निर्देशः । तेनेह न । युज्यते समाधत्ते इति युक् । युज समाधौ दैवादिक आत्मनेपदी । संयोगान्तलोपः । खन् । खञ्जौ । खञ्जः । इत्यादि । व्रश्च...इति षत्वम् । जश्त्वचर्त्वे । राट्, राड् । राजौ । राजः । राट्त्सु । राट्सु । एवं विभ्राट् । देवेट् । देवेजौ । देवेजः । विश्वसृट्, विश्वसृड् । विश्वसृजौ । विश्वसृजः । इह सृजियुज्योः कुत्वं नेति क्लीबे वक्ष्यते । परिमृट् । षत्वविधौ राजिसाहचर्यात् टुभ्राजृ दीप्ताविति फणादिरेव गृह्यते ।**

**यस्तु एजृ भ्रेजृ भ्राजृ दीप्ताविति तस्य कुत्वमेव । विभ्राक्, विभ्राग् । विभ्राग्भ्यामित्यादि ।**

**परौ व्रजेः षः पदान्ते ?'उ.सू.' । परावुपपदे व्रजेः क्विप्स्याद्दीर्घश्च पदान्तविषये षत्वं च । परित्यज्य सर्वं व्रजतीति**

**परिव्राट्, परिव्राड्** । **परिव्राजौ** । **परिव्राजः** ॥

(चोः, कुः, झलि, पदस्य अन्ते)

**सरलार्थः-** चवर्गस्य स्थाने कवर्गान्तादेशो भवति झलि परतः पदान्ते च ।

खञ्ज्शब्दात् सौ, सुलोपः, संयोगान्तलोपः - **खन्** । **खञ्जौ** । **खञ्जः** - इत्यादि । राज्शब्दात् सौ, सुलोपः, "व्रश्च-" इति षत्वम्, जश्त्वचर्त्वे-**राट्/राड्** । **राजौ** । **राजः** । **राट्सु** ।

राज् + सु - राज् + स् - राज् - राष् - राड् - **राट्/राड्** ।

राज् + औ - **राजौ** । राज् + जस् - राज् + अस् - राजस् - राजरु - राजर् - **राजः** ।

राज् + सुप् - राज् + सु - राष् + सु - राड् + सु - राड् + ध् (धुडागमः) सु - राड् + त्सु - **राट्त्सु** । धुडागमाभावपक्षे - राज् + सुप् - राज् + सु - राष् + सु - राड् + सु - राट् + सु - **राट्सु** । एवं **विभ्राट्** । **देवेट्** । **देवेजौ** । **देवेजः** । **विश्वसृट्/विश्वसृड्** । **विश्वसृजौ** । **विश्वसृजः** ।

### दीर्घान्तादेशविधायकं विधिसूत्रम्-

**विश्वस्य वसुराटोः ६ । ३ । १२८**

**विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे ।**

**विश्वं वसु यस्य स विश्वावसुः । राडिति पदान्तोपलक्षणार्थम् ।**

**चर्त्वमविवक्षितम् । विश्वाराट्/विश्वाराड् । विश्वराजौ । विश्वराजः । विश्वाराड्भ्याम् । इत्यादि ।**

(विश्वस्य, दीर्घः, वसुराटोः)

**सरलार्थः-** विश्वशब्दस्य दीर्घोन्तादेशो भवति वसुप्रत्यये राट्शब्दे च परतः ।

विश्वराज् + सु - विश्वराज् + स् - विश्वराज् - विश्वराष् - विश्वराड् - विश्वाराड् (दीर्घः) - **विश्वाराट्/विश्वाराड्** ।

### स्कोर्लोपविधायकं विधिसूत्रम्-

**स्कोः संयोगाद्योरन्ते च ८ । २ । २९**

**पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात् । भृट्/भृड् । सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः, - भृज्जौ । भृज्जः । "ऋत्विग्-" इत्यादिना ऋतावुपपदे यजेः क्विन्, क्विन्नन्तत्वात्कुत्वम् - ऋत्विक्/ऋत्विग् ।**

**ऋत्विजौ । ऋत्विजः । "रात्सस्य" इत्यनेन रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य इति नियमान्न संयोगान्त-**

**लोपः - ऊर्क् / ऊर्ग्। ऊर्जौ। ऊर्जः।**

(संयोगाद्योः, स्कोः, लोपः, अन्ते, पदस्य, झलि च)

**सरलार्थः-** संयोगस्य आदौ वर्तमानयोः सकारकवर्गयोः लोपादेशो भवति झलि परे पदान्ते च।

भृस्ज् + सु - भृस्ज् + स् - भृस्ज् - भृज् (संयोगादिलोपः) - भृष् - भृड् - **भृट्/भृड्**।

भृस्ज् + औ - भृश्ज् + औ - भृज्ज् + औ (झलां जश् झशि जश्वत्वम्) - **भृज्जौ**।

ऊर्ज्शब्दात्सौ सकारस्य हल्ङ्यादिलोपे, संयोगान्तलोपस्य "रात्सस्य" इति नियमेन निवारिते सति 'चोः कुः' इति कुत्वम्, "वाऽवसाने", इत्यनेन विकल्पेन चर्त्वमिति भावः।

त्यदादिशब्दानां विभक्तौ परतः "त्यदादीनामः" इति अत्वे पररूपे-

## सकारादेशविधायकं विधिसूत्रम्-

**तदोः सः सावनन्त्ययोः ७।२।१०६**

**त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे। स्यः। त्यौ। त्ये। त्यम्। त्यौ। त्यान्। सः। तौ। ते। परमसः। परमतौ। परमते। द्विपर्यन्तानामित्येव। नेह। त्वम्। नच तकारोच्चारणसामर्थ्यान्नेति वाच्यम्। अतित्वमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्वसत्वे न। त्यद्। त्यदौ। त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु। एनम्। एनौ। एनान्। एनेन। एनयोः २॥**

(त्यदादीनाम्, अनन्त्ययोः, तदोः, सः, सौ)

**सरलार्थः-** त्यदादीनां शब्दानाम् अनन्त्ये विद्यमानयोः तकारदकारयोः स्थाने सकारादेशो भवति सौ परतः।

त्यद् + सु - त्यद् + स् - त्य अ + स् - त्य + स् - स्य + स् - स्यरु - स्यर् - **स्यः**।

त्यद् + औ - त्य अ + औ - त्य + औ - **त्यौ**।

त्यद् + जस् - त्यद् + अस् - त्य अ + अस् - त्य + अस् - त्य + ई (शी) - **त्ये**।

**सः। तौ। ते। परमसः। परमतौ। परमते।**

तद् + सु - तद् + स् - त अ + स् - त + स् - स + स् - सरु - सर् - **सः**।

तद् + औ - त अ + औ - त + औ - **तौ**।

तद् + जस् - तद् + अस् - त अ + अस् - त + अस् - त + ई (शी) - **ते**।

त्यदादीनां सकारादेशोऽपि द्विपर्यन्तानामित्येव, तेन 'त्वम्' इत्यत्र तकारस्य सकारादेशो न भवति। अत्र तु "त्वाहौ सौ" इत्यनेन आदेशे 'त्व' इत्यत्र तकारोच्चारणसामर्थ्यादेव त्वमित्यत्र सत्वं न भवति, अन्यथा "स्वाहौ सौ" इत्येव ब्रूयादिति अतोऽत्र द्विपर्यन्तानुकरणं व्यर्थमिति शङ्कायामाह- गौणे 'अतित्वम्' इत्यादौ तकारोच्चारणस्य चरितार्थत्वेन अन्यत्र त्वमित्यादौ नियमं विना सकारादेशस्य वारणाशक्यत्वेन "तदोः-" इति सकारादेशोऽपि 'द्विपर्यन्तानामित्येव' इति नियमनमावश्यकम्।

संज्ञायां गौणत्वे चात्वसत्वे न। कस्यचित् संज्ञायाम्- त्यद्। त्यदौ। त्यदः। अप्रधाने- अतित्यद्। अतित्यदौ। अतित्यदः।

यद् - शब्दस्य - **यः**। **यौः**। **ये**।

यद् + सु - यद् + स् - य अ + स् - य + स् - यरु - यर् - **यः**।

एतद् - शब्दस्य - **एषः**। **एतौ**। **एते**। अन्वादेशे तु - **एनम्**। **एनौ**। **एनान्**। **एनेन**। **एनयोः**। **एनयोः**।

एतद् + सु - एतद् + स् - एत अ + स् - एस + स् (तदोरिति सादेशः) - एष + स् (षत्वम्) - एषरु - एषर् - **एषः**।

| परिव्राज्-शब्दस्य रूपावली | | | तद्-शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| परिव्राट्/ड् | परिव्राजौ | परिव्राजः | सः | तौ | ते |
| परिव्राजम् | परिव्राजौ | परिव्राजः | तम् | तौ | तान् |
| परिव्राजा | परिव्राड्भ्याम् | परिव्राड्भिः | तेन | ताभ्याम् | तैः |
| परिव्राजे | परिव्राड्भ्याम् | परिव्राड्भ्यः | तस्मै | ताभ्याम् | तेभ्यः |
| परिव्राजः | परिव्राड्भ्याम् | परिव्राड्भ्यः | तस्मात्-द् | ताभ्याम् | तेभ्यः |
| परिव्राजः | परिव्राजोः | परिव्राजाम् | तस्य | तयोः | तेषाम् |
| परिव्राजि | परिव्राजोः | परिवाट्त्सु/परिव्राट्सु | तस्मिन् | तयोः | तेषु |
| हे परिव्राट्/ड्! | परिव्राजौ! | हे परिव्राजः! | | | |

## रूपसाधनप्रकारः

### राट्-राड्

राज्शब्दस्य “कृत्तद्धितसमासाश्च” इति सूत्रेण प्रातिपदिकसंज्ञायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे ‘राज् स्’ इति जाते सकारस्य “हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्” इत्यनेन लोपे “व्रश्चभ्रस्ज-” इति सूत्रेण षकारादेशे “झलां जशोऽन्ते” इति सूत्रेण जश्त्वे ‘राड्’ इति जाते “वाऽवसाने” इति सूत्रेण विकल्पेन चर्त्वे ‘राट्’ इति रूपम्, चर्त्वाभावपक्षे ‘राड्’ इति च रूपद्वयं सिद्धम् ।

### ते

तद्शब्दस्य “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इति सूत्रेण प्रातिपदिकसंज्ञायां “ङ्याप्प्राति-पदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तौ अनुबन्धलोपे “त्यदादीनामः” इत्यनेन अत्वे “अतो गुणे” इत्यनेन पररूपे ‘त + अस्’ इति जाते सर्वनामसंज्ञायां “जसः शी” इति सूत्रेण ‘शी’ आदेशेऽनुबन्धलोपे ‘त + ई’ इति जाते “आद् गुणः” इति गुणे ‘ते’ इति रूपं सिद्धम् ।

# अभ्यासः

## १. परस्परं मेलयत

| | | |
|---|---|---|
| (क) | त्यस्मै | भिस् |
| | तैः | सु |
| | परिव्राड्भ्यः | ङे |
| | राट् | आम् |
| | येषाम् | भ्यस् |
| (ख) | जश्त्वम् | अतो गुणे । |
| | चर्त्वम् | त्यदादीनामः । |
| | पररूपम् | स्कोः संयोगाद्योरन्ते च । |
| | अकारादेशः | झलां जशोऽन्ते । |
| | संयोगादिलोपः | खरि च । |

## २. रिक्तस्थानं पूरयत

(क) सौ परे त्यदादीनामनन्त्ययोः … … … … स्थाने सत्वं भवति ।

(ख) "चोः कुः" इति सूत्रं … … … … करोति ।

(ग) … … … …-पर्यन्तानामेव त्यदादिशब्दानामत्वमिष्टम् ।

(घ) क्विन्-प्रत्ययस्य वकारस्य लोपः "… … … …" इति सूत्रेण विधीयते ।

(ङ) झलि … … … … च चवर्गस्य स्थाने कवर्गादेशो भवति ।

## ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

युज् + सु, ऋत्विज् + जस्, त्यद् + शस् (पुंसि), तद् + ङसि (पुंसि), राज् + भ्याम्, यद् + ङि पुंसि ।

## ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

भृज्जौ, युञ्जम्, ऋत्विग्भ्यः, तयोः, एतैः, यस्य ।

## ५. अधो लिखितानां प्रश्नानामुत्तरं लिखत

(क) त्यदादयः शब्दाः कति ? के च ते ?

(ख) "अलाक्षणिकमपि किंचित्कार्यं निपातनाल्लभ्यते" इत्यस्याभिप्रायः कः ?

(ग) 'एषः' इत्यत्र षकारादेशः केन सूत्रेण भवति ?

(घ) क्विन्प्रत्ययस्य कथं सर्वापहारिलोपः ? प्रतिवर्णं लोपप्रक्रियां लिखत ।

(ङ) अतित्यद्शब्दस्य त्यदादित्वेन अकारान्तादेशो भवति न वा ? सकारणं लिखत ।

(च) 'ऊर्क्' इत्यत्र संयोगान्तलोपः केन वार्यते ?

(छ) 'युञ्जौ' इत्यत्र कुत्वं कथं न भवति ?

(ज) "ऋत्विग्दधृक्..." इति सूत्रेण केभ्यः क्विन्प्रत्ययो विधीयते ?

(झ) कृत्संज्ञा कस्य केन भवति ?

(ञ) "युजेरसमासे" इति सूत्रस्य कार्यं किम् ?

## ६. अधःप्रदत्तानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां निर्दिशत

ऋत्विक् । सः । त्ये । येषाम् । एतस्मिन् । युङ् । ऋत्विग्भ्याम् । विश्वाराड् । तस्मै ।

## ७. अधस्तनसूत्राणां सरलार्थं लिखत

(क) चोः कुः ।

(ख) वेरपृक्तस्य ।

(ग) विश्वस्य वसुराटोः ।

(घ) तदोः सः सावनन्त्ययोः ।

(ङ) स्कोः संयोगाद्योरन्ते च ।

(च) कृदतिङ् ।

## ८. ऋत्विज्-शब्दस्य सर्वाणि रूपाणि लिखत ।

## ९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

युङ्, परिव्राजः, राजम्, त्यौ, एतेन, तान्, यस्मात्, ऋत्विजे ।

## हलन्तपुँल्लिङ्गप्रकरणे

# युष्मदस्मच्छब्दयो रूपसिद्धिप्रक्रिया

### अमादेशविधायकं विधिसूत्रम्-

**ङेप्रथमयोरम् ७ । १ । २८**

**युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात् ।**

(युष्मदस्मद्भ्याम्, ङेप्रथमयोः, अम्)

**सरलार्थः-** युष्मद्-अस्मद्-शब्दाभ्यां परस्य ङे इत्येतस्य, प्रथमाद्वितीयाविभक्त्योश्च स्थाने अमादेशो भवति । ङे सु औ जस् अम् औट् एतेषाममादेशो विधीयते, शस्विषये तु वक्ष्यमाणेन "शसो न" इत्यनेन विधिरयं बाध्यते ।

### अधिकारसूत्रम्-

**मपर्यन्तस्य ७ । २ । ९१**

**इत्यधिकृत्य ।**

**सरलार्थः-** अस्याधिकारे विधीयमानानि कार्याणि युष्मदस्मदोः मपर्यन्तस्य भागस्य स्थाने विधातव्यानि ।

### त्व-अह-आदेशविधायकं विधिसूत्रम्-

**त्वाहौ सौ ७ । २ । ९४**

**युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे ।**

(युष्मदस्मदोः, मपर्यन्तस्य, त्वाहौ, सौ)

**सरलार्थः-** युष्मदस्मदोः शब्दयोः मपर्यन्तस्य भागस्य स्थाने क्रमेण त्व अह इत्यादेशौ भवतः सौ परे ।

### शेषभागस्य लोपविधायकं विधिसूत्रम्-

**शेषे लोपः ७ । २ । ९०**

**आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात् । "अतो गुणे" इति पररूपम्, "अमि पूर्वः", इति पूर्वरूपम् । त्वम् । अहम् ।**

**ननु 'त्वम् स्त्री' 'अहम् स्त्री' इत्यत्र 'त्व अम्' 'अह अम्' इति स्थिते अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वाट्टाप् प्राप्नोति । सत्यम् । अलिङ्गे युष्मदस्मदी । तेन स्त्रीत्वाभावान्न टाप् । यद्वा, शेष इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया । तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोपः स च परोऽप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते, अदन्तत्वाभावान्न टाप् । परमत्वम् । परमाहम् । अतित्वम् । अत्यहम् ।**

(युष्मदस्मदोः, शेषे, लोपः)

**सरलार्थः–** शेषे = आत्वयत्वनिमित्तेतरविभक्तौ परतः, युष्मद्-शब्दस्य अस्मद्-शब्दस्य चान्त्यवर्णस्य स्थाने लोपादेशो भवति ।

युष्मद् + सु - युष्मद् + स् - युष्मद् + अम् - त्व अद् + अम् - त्व अ + अम् - त्व + अम् (पररूपम्) - **त्वम्** (पूर्वरूपम्) ।

अस्मद् + सु - अस्मद् + स् - अस्मद् + अम् - अह अद् + अम् - अह अ + अम् - अह + अम् - **अहम्** ।

"शेषे लोपः" इत्यस्य द्वाभ्यां प्रकाराभ्यामर्थः क्रियते, शेषविभक्तौ परतः युष्मदस्मदोरन्त्यस्य लोप इत्येकोऽर्थः । युष्मदस्मदोः मपर्यन्तात् शेषभागस्य लोपो भवतीत्यपरोऽर्थः । तत्र प्रथमपक्षे युष्मदस्मदोर्लिङ्गविशेषाभावात् स्त्रीवाचकत्वेन विवक्षितेऽपि टाप् न प्राप्नोति । द्वितीयपक्षे पूर्वं पररूपे कृते त्वद् + अम्, अहद् + अम् इत्यवस्थायाम् अद्भागस्य लोपे अदन्तत्वाभावादेव टाप् न प्राप्नोति इति भावः ।

### युव, आव इत्यादेशविधायकं विधिसूत्रम्-

**युवावौ द्विवचने ७ । २ । ९२**

**द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ।**

(द्विवचने, युष्मदस्मदोः, मपर्यन्तस्य, युवावौ, विभक्तौ)

**सरलार्थः–** द्वित्वसंख्याया वाचकयोर्युष्मदस्मदोः शब्दयोर्मपर्यन्तस्य भागस्य स्थाने क्रमेण युव आव इत्यादेशौ भवतः, विभक्तौ परतः ।

### आकारान्तादेशविधायकं विधिसूत्रम्-

**प्रथमायाश्च द्विवचने भाषायाम् ७ । २ । ८८**

**इह युष्मदस्मदोराकारोऽन्तादेशः स्यात् । युवाम् । 'औङि' इत्येव सुवचम् । भाषायाम् किम् - युवं वस्त्राणि । मपर्यन्तस्य किम् - साकच्कस्य मा भूत् - युवकाम् । आवकाम् । 'त्वया' 'मया' इत्यत्र 'त्व्या' 'म्या' इति मा भूत् । 'युवकाभ्याम्' 'आवकाभ्याम्' इति च न सिध्येत् ।**

(युष्मदस्मदोः, च, आः, प्रथमायाः, द्विवचने, विभक्तौ, भाषायाम्)

**सरलार्थः–** युष्मदस्मदोः शब्दयोः स्थाने आकारोन्तादेशः स्यात् प्रथमायाः द्विवचने औविभक्तौ परतः लोके ।

युष्मद् + औ - युष्मद् + अम् - युव अद् + अम् - युव अ आ + अम् - युव आ + अम् (पररूपम्)

युवा + अम् (सवर्णदीर्घः) - **युवाम्** (पूर्वरूपम्) ।

अस्मद् + औ - अस्मद् + अम् - आव अद् + अम् - आव अ आ + अम् - आव आ + अम् - आवा + अम् - **आवाम्** ।

"अव्ययसर्वनाम्नाम्-" इति टेः प्रागकचि 'युष्मकद् + औ, अस्मकद् + औ' इति स्थिते "ङे प्रथमयोः-" इत्यमि "युवावौ द्विवचने" इति संपूर्णस्य स्थाने युव-आवादेशयोः "प्रथमायाश्च-" इति दः स्थाने आत्वे अमि पूर्वरूपे च युवाम्, आवाम् इत्येव स्यात्, युवकाम्, आवकाम् इति ककारो न श्रूयेत । अतः मपर्यन्तस्येति वचनमित्यर्थः । तथैव तृतीयायां "त्वमावेकवचने" इत्यनेन संपूर्णस्य त्व आदेशे 'त्व + आ, म + आ' इत्यत्र "योऽचि" इत्यनेन अकारस्य यकारे 'त्व्या' 'म्या', इति अनिष्टरूपापत्तिः स्यात्, कृते च मपर्यन्तग्रहणे मपर्यन्तस्य 'त्व म आदेशे त्व अद् + आ' 'म अद् + आ' इत्यत्र दः स्थाने यकारादेशे पररूपे त्वया, मया इत्येतयोः सिद्धिरिति भावः । एवमेव युवकाभ्याम्, आवकाभ्याम् इत्यादौ ककारश्रवणाय "युवावौ द्विवचने" इत्यत्र मपर्यन्तस्य ग्रहणमावश्यकमेव ।

### यूय वय इत्यादेशयोर्विधायकं विधिसूत्रम्-

**यूयवयौ जसि ७ । २ । ९३**

**स्पष्टम् । यूयम् । वयम् । परमयूयम् । परमवयम् । अतियूयम् । अतिवयम् । इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी प्राप्तः "अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्" (परि.) इति न भवति । "ङे प्रथमयोः-" इत्यत्र मकारान्तरं प्रश्लिष्य 'अम् मान्त एवावशिष्यते, न तु विक्रियते' इति व्याख्यानाद् वा ।**

(युष्मदस्मदोः, मपर्यन्तस्य, यूयवयौ, जसि)

**सरलार्थः–** युष्मदस्मदोर्मपर्यन्तस्य स्थाने क्रमेण यूय वय इत्यादेशौ भवतः, जसि परतः ।

युष्मद् + जस् - युष्मद् + अस् - युष्मद् + अम् - यूय अद् + अम् - यूय + अम् - **यूयम्** ।
अस्मद् + जस् - अस्मद् + अस् - अस्मद् + अम् - वय अद् + अम् - वय अ + अम् - वय + अम् - **वयम्** ।
युष्मदस्मदोः प्राधान्येऽप्राधान्ये च 'यूयवयौ जसि' इत्येतस्य प्रवृत्तिर्भवति इति ज्ञापनार्थं **परमवयम्, अतियूयम्, अतिवयम्** इत्युदाहरणं प्रदत्तमस्ति ।

"शेषे लोपः" इत्यनेन अन्त्यवर्णस्य लोपो भवति इति पक्षे 'यूय + अम्, वय अम्' इत्यत्र "जसः शी" इति श्यादेशं प्राप्नोति, तस्य 'अङ्गाधिकारे विहिते कार्ये कृते सति पुनः, अङ्गाधिकारे विहितं कार्यं न भवति' इत्यर्थिकया परिभाषया निषेधात्, प्रकृतौ च शेषलोपस्य अङ्गकार्यस्य प्रवृत्तत्वाद् आङ्गः शीभावो न भवतीत्यर्थः । अत्र अङ्गकार्यमित्यस्य अङ्गोद्देश्यकं कार्यमिति मन्तव्यम्, प्रकृतेश्च शेषलोपस्याङ्गकार्यत्वेऽपि श्यादेशस्य अङ्गोद्देश्यककार्यत्वाभावात् तया परिभाषया शीभावो दुर्वार इति शङ्कायामाह- "ङे प्रथमयोरम्" इत्यत्र मकारप्रश्लेषेण मकारान्तोऽम् स्यादिति

लभ्यते । मकारान्तस्य अमः पुनर्मान्तत्वविधानाद् अम् मान्त एव भवति, न तु तस्य विकारो भवतीति लभ्यते । अतो न शीभाव इत्यर्थः ।

### त्व म इत्यादेशविधायकं विधिसूत्रम्-

**त्वमावेकवचने ७ । २ । २७**

**एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ।**

**सरलार्थः–** एकत्वसंख्यावाचिनोर्युष्मदस्मदोर्मपर्यन्तस्य स्थाने क्रमेण त्व म इत्यादेशौ भवतः, विभक्तौ परतः ।

### आकारादेशविधायकं विधिसूत्रम्-

**द्वितीयायां च ७ । २ । ८७**

**युष्मदस्मदोराकारः स्यात् । त्वाम् । माम् । युवाम् । आवाम् ।**

(युष्मदस्मदोः, आः, द्वितीयायां विभक्तौ, च)

**सरलार्थः–** युष्मदस्मदोः स्थाने आकारोऽन्तादेशो भवति, द्वितीयायां विभक्तौ परतः ।

युष्मद् + अम् - त्व अद् + अम् - त्व अ आ + अम् - त्व आ + अम् (पररूपम्) - त्वा + अम् (सवर्णदीर्घः) - **त्वाम्** (पूर्वरूपम्) ।

अस्मद् + अम् - म अद् + अम् - म अ आ + अम् - म आ + अम् - मा + अम् - **माम्** ।

युष्मद् + औट् - युष्मद् + औ - युष्मद् + अम् - युव अद् + अम् - युव अ आ + अम् - युवा आ + अम् - युवा + अम् - **युवाम्** ।

अस्मद् + औट् - अस्मद् + औ - अस्मद् + अम् - आव अद् + अम् - आव अ आ + अम् - आव आ + अम् - आवा + अम् - **आवाम्** ।

### नकारादेशविधायकं विधिसूत्रम्-

**शसो न ७ । १ । २९**

**नेत्यविभक्तिकं पदम् । युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् । अमोऽपवादः । "आदेः परस्य" । "संयोगाान्तस्य लोपः" । युष्मान् । अस्मान् ।**

(युष्मदस्मद्भ्याम्, शसः, न)

**सरलार्थः–** युष्मदस्मद्भ्यां परस्य शसः स्थाने नकारादेशो भवति । "आदेः परस्य" इति आदेः अकारस्य नकारः ।

युष्मद् + शस् - युष्मद् + अस् - युष्म आ + अस् - युष्मा + अस् - युष्मा + न्स् - युष्मा + न् (संयोगान्तलोपः) - **युष्मान्** ।

अस्मद् + शस् - अस्मद् + अस् - अस्म आ + अस् - अस्मा + अस् - अस्मा + न्स् - अस्मा + न् - **अस्मान्** ।

## यकारादेशविधायकं विधिसूत्रम्-

### योऽचि ७ । २ । ९८

**अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः । त्वया । मया ।**

(युष्मदस्मदोः, यः, अचि विभक्तौ)

**सरलार्थः-** युष्मदस्मद्-शब्दयोरन्त्यवर्णस्य स्थाने यकारादेशो भवति अनादेशे अजादौ विभक्तौ परतः ।

युष्मद् + टा - युस्मद् + आ - त्व अद् + आ - त्व अ य् + आ - त्व य् + आ - **त्वया** ।

अस्मद् + टा - अस्मद् + आ - म अद् + आ - म अ य् + आ - मय् + आ - **मया** ।

## आकारादेशविधायकं विधिसूत्रम्-

### युष्मदस्मदोरनादेशे ७ । २ । ८६

**अनयोराकारः स्यादनादेशे हलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ।**

(युष्मदस्मदोः, आः, अनादेशे, हलि, विभक्तौ)

**सरलार्थः-** युष्मदस्मद्-शब्दयोरन्त्यवर्णस्य स्थाने आकारादेशो भवति अनादेशे हलादौ विभक्तौ परतः ।

युष्मद् + भ्याम् - युव अद् + भ्याम् - युव अ आ + भ्याम् - युव आ + भ्याम् - युवा + भ्याम् - **युवाभ्याम्** । अस्मद् + भ्याम् - आव अद् + भ्याम् - आव अ आ + भ्याम् - आव आ + भ्याम् - आवा + भ्याम् - **आवाभ्याम्** । युष्मद् + भिस् - युष्म आ + भिस् - युष्मा + भिस् - युष्माभिरु - युष्माभिर् - **युष्माभिः** । अस्मद् + भिस् - अस्म आ + भिस् - अस्मा + भिस् - अस्माभिरु - अस्माभिर् - **अस्माभिः** ।

## तुभ्य मह्य इत्यादेशविधायकं विधिसूत्रम्-

### तुभ्यमह्यौ ङयि ७ । २ । ९५

**अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि । अमादेशः "शेषे लोपः" । तुभ्यम् । मह्यम् । परमतुभ्यम् । परममह्यम् । अतितुभ्यम् । अतिमह्यम् । युवाभ्याम् । आवाभ्याम् ।**

(युष्मदस्मदोः, मपर्यन्तस्य, तुभ्यमह्यौ, ङयि)

**सरलार्थः-** युष्मदस्मद्-शब्दयोर्मपर्यन्तस्य स्थाने क्रमेण तुभ्य मह्य इत्यादेशौ भवतः, ङेविभक्तौ परतः।

युस्मद् + ङे - युष्मद् + ए - युष्मद् + अम् - तुभ्य अद् + अम् - तुभ्य अ + अम् - तुभ्य + अम् - **तुभ्यम्**।
अस्मद् + ङे - अस्मद् + ए - अस्मद् + अम् - मह्य अद् + अम् - मह्य अ + अम् - मह्य + अम् - **मह्यम्**।

### भ्यम्/अभ्यम् वा-आदेशविधायकं विधिसूत्रम्-

**भ्यसो भ्यम् ७।१।३०**

**भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्यान्त्यलोपत्व एव। तत्राङ्गवृत्तपरिभाषया एत्वं न। अभ्यम् तु पक्षद्वयेऽपि साधुः। युष्मभ्यम्। अस्मभ्यम्।**

(युष्मदस्मद्भ्याम्, भ्यसः, भ्यम्/अभ्यम्)

**सरलार्थः-** युष्मदस्मद्-शब्दाभ्यामुत्तरस्य भ्यसः स्थाने भ्यम् अभ्यम् वा आदेशो भवति।

युष्मद् + भ्यस् - युष्मद् + भ्यम् - युष्म + भ्यम् - **युष्मभ्यम्** इति भ्यमादेशपक्षे। अभ्यमादेशे च - युष्मद् + भ्यस् - युष्मद् + अभ्यम् - युष्म + अभ्यम् - **युष्मभ्यम्**।

### अत् इत्यादेशविधायकं विधिसूत्रम्-

**एकवचनस्य च ७।१।३२**

**आभ्यां पञ्चम्येकवचनस्य अत् स्यात्। त्वत्। मत्। 'ङसेश्च' इति सुवचम्। युवाभ्याम्। आवाभ्याम्।**

(युष्मदस्मद्भ्याम्, पञ्चम्याः, एकवचनस्य, च, अत्)

**सरलार्थः-** युष्मदस्मद्भ्यां परस्य पञ्चम्या एकवचनस्य ङसि इत्यस्य स्थाने अत् आदेशो भवति।

युष्मद् + ङसि - युष्मद् + अस् - त्व अद् + अस् - त्व अद् + अत् - त्व अ + अत् - त्व + अत् (पररूपम्) - **त्वत्** (पुनः पररूपम्)।

अस्मद् + ङसि - अस्मद् + अस् - म अद् + अस् - म अद् + अत् - म अद् + अत् - म अ + अत् - **मत्**।

### अत् इत्यादेशविधायकं विधिसूत्रम्-

**पञ्चम्या अत् ७।१।३१**

**आभ्यां पञ्चम्या भ्यसोऽत् स्यात्। युष्मत्। अस्मत्।**

(युष्मदस्मद्भ्याम्, पञ्चम्याः, भ्यसः, अत्)

**सरलार्थः-** युष्मदस्मद्भ्यां परस्य पञ्चम्या भ्यसः स्थाने अत् आदेशो भवति।

युष्मद् + भ्यस् - युष्मद् + अत् - युष्म + अत् (पररूपम्) - **युष्मत्** ।

अस्मद् + भ्यस् - अस्मद् + अत् - अस्म + अत् - **अस्मत्** ।

### तव मम इत्यादेशविधायकं विधिसूत्रम्-

**तवममौ ङसि ७ । २ । ९६**

**अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि ।**

(युष्मदस्मदोः, मपर्यन्तस्य, तवममौ, ङसि)

**सरलार्थः-** युष्मदस्मदोः शब्दयोर्मपर्यन्तभागस्य स्थाने क्रमेण तव मम इत्यादेशौ भवतः, ङस्विभक्तौ परतः ।

### अश् इत्यादेशविधायकं विधिसूत्रम्-

**युष्मदस्मद्भ्यां ङसोऽश् ७ । १ । २७**

**स्पष्टम् । तव । मम । युवयोः । आवयोः ।**

**सरलार्थः-** युष्मदस्मद्भ्यां परस्य ङसः स्थाने अश्-आदेशो भवति ।

युष्मद् + ङस् - युष्मद् + अस् - तव अद् + अस् - तव अद् + अश् - तव अ + अ - तव + अ (पररूपम्) - **तव** (पुनः पररूम्) ।

अस्मद् + ङस् - अस्मद् + अस् - मम अद् + अस् - मम अद् + अ (अश्) - मम अ + अ - मम अ - **मम** । युष्मद् + ओस् - युव अद् + ओस् - युव अ य् + ओस् - युवय् + ओस् - युवयोस् - युवयोरु - युवयोर् - **युवयोः** । अस्मद् + ओस् - आव अद् + आव अ य + ओस् - आवयोस् - आवयोरु - आवयोर् - **आवयोः** ।

### आकम् इत्यादेशविधायकं विधिसूत्रम्-

**साम आकम् ७ । १ । ३३**

**आभ्यां परस्य साम आकम् स्यात् । भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः । युष्माकम् । अस्माकम् । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ।**

(युष्मदस्मद्भ्याम्, सामः, आकम्)

**सरलार्थः-** युष्मदस्मद्भ्यां परस्य साम् इत्यस्य स्थाने आकम् इत्यादेशो भवति ।

साम इति ससुट्कस्य आमो निर्देशः, अनेन आम आकमादेशोत्तरं भाविनः सुटो निवृत्तिः क्रियते । यदि तु "आम आकम्" इत्येवोच्येत तर्हि आम आकमादेशे कृते दकारस्य शेषलोपे सति स्थानिवत्त्वेन आकमादेशस्य आम्त्वात् तस्य च अवर्णात्परत्वात् "आमि सर्वनाम्नः सुट्" इति सुडागमः स्यात् । तत एत्वे षत्वे युष्मेषाकम्, अस्मेषाकम् इति स्यात् ।

युष्मद् + आम् - युष्मद् + आकम् - युष्म + आकम् - **युष्माकम्** (सवर्णदीर्घः)।

अस्मद् + आम् - अस्मद् + आकम् - अस्म + आकम् - **अस्माकम्**।

युष्मद् + ङि - युष्मद् + इ - त्व अद् + इ - त्व अ य् + इ - त्व य् + इ - **त्वयि**।

अस्मद् + ङि - अस्मद् + इ - म अद् + इ - म अ य् + इ - म य् + इ - **मयि**।

युष्मद् + सुप् - युष्मद् + सु - युष्म आ + सु - युष्मा + सु - **युष्मासु**।

अस्मद् + सुप् - अस्मुद् + सु - अस्म आ + सु - अस्मा + सु - **अस्मासु**।

| युष्मद्-शब्दस्य रूपावली | | | अस्मद्-शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| त्वम् | युवाम् | यूयम् | अहम् | आवाम् | वयम् |
| त्वाम् | युवाम् | युष्मान् | माम् | आवाम् | अस्मान् |
| त्वया | युवाभ्याम् | युष्माभिः | मया | आवाभ्याम् | अस्माभिः |
| तुभ्यम् | युवाभ्याम् | युष्मभ्यम् | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| त्वत् | युवाभ्याम् | युष्मत् | मत् | आवाभ्याम् | अस्मत् |
| तव | युवयोः | युष्माकम् | मम | आवयोः | अस्माकम् |
| त्वयि | युवयोः | युष्मासु | मयि | आवयोः | अस्मासु |

## रूपसाधनप्रकारः

### त्वम्

युष्मद्-शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे "ङे प्रथमयोरम्" इत्यनेन अमादेशे "त्वाहौ सौ" इति सूत्रेण मपर्यन्तस्य त्वादेशे 'त्व अद् अम्' इति जाते "शेषे लोपः" इत्यनेन दकारस्य लोपे "अतो गुणे" इति पररूपे 'त्व + अम्' इति जाते "अमि पूर्वः" इति सूत्रेण पूर्वरूपे 'त्वम्' इति रूपं सिद्धम्।

### मया

अस्मद्-शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया एकवचने टाविभक्तौ अनुबन्धलोपे 'अस्मद् + आ' इति जाते "त्वमावेकवचने" इति सूत्रेण मपर्यन्तस्य मादेशे 'म अद् + आ' इति जाते "योऽचि" इत्यनेन दकारस्य यकारादेशे 'म अ य् + आ' इति जाते "अतो गुणे" इत्यनेन पररूपे वर्णयोगे 'मया' इति रूपं सिद्धम्।

## अभ्यासः

### १. विभक्तिवचनानुसारेण परस्परं मेलयत

| | |
|---|---|
| अहम् | तुभ्यम् । |
| माम् | युवयोः । |
| मह्यम् | यूयम् । |
| आवयोः | त्वम् । |
| वयम् | त्वाम् । |

### २. रिक्तस्थानं पूरयत

(क) 'त्व + अम्' इत्यत्र "... ... ..." इत्यनेन ... ... ... भवति ।

(ख) 'अस्मान्' इत्यत्र "... ... ..." इत्यनेन सकारलोपो विधीयते ।

(ग) "द्वितीयायां च" इति सूत्रम् ... ... ... करोति ।

(घ) ङस अशादेशविधायकं सूत्रं ... .... ... इत्यस्ति ।

(ङ) "युष्मदस्मदोरनादेशे" इत्यनेन ... ... ... क्रियते ।

### ३. निर्दिष्टावस्थासु निष्पन्नानि रूपाणि लिखत

युष्मद्+सुप्, अस्मद्+शस्, युष्मद्+भ्यस् (चतुर्थी), अस्मद्+भ्यस् (पञ्चमी), युष्मद्+ङे, अस्मद्+ङि ।

### ४. अधस्तनपदानां प्रातिपदिकविभक्ती निर्दिशत

युष्मत्, अस्मभ्यम्, युवयोः, अस्माकम् ।

### ५. अधो लिखितानां प्रश्नानामुत्तरं लिखत

(क) युष्मदस्मदोः परस्य कासां विभक्तीनाममादेशो भवति ? स च केन सूत्रेण ?

(ख) "शसो न" इति कस्यापवादः ? अनेन कस्य स्थाने नकारादेशो भवति ?

(ग) "साम आकम्" इत्यस्य स्थाने "आम आकम्" इति विधाने को दोषः ?

(घ) "आवयोः" इत्यत्र "रामयोः" इतिवत् "ओसि च" इत्यनेन एकारादेशो भवति न वा ?

(ङ) युष्मच्छब्दस्य चतुर्थ्यां विभक्तौ कानि रूपाणि ?

(च) 'यूयम्, वयम्' इत्यत्र 'यूय + अम्', 'वय + अम्' इत्यवस्थायां "जसः शी" इत्यनेन शीभावः कथं न भवति ?

(छ) "अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्" इत्यस्याः परिभाषायाः आशयः कः ?

**६. अधःप्रदत्तानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां निर्दिशत**

त्वम्, आवाम्, यूयम्, माम्, युष्मान्, मया, तुभ्यम्, अस्मभ्यम्, मत्, युष्मत्, तव, अस्माकम् ।

**७. अधस्तनसूत्राणां सरलार्थं लिखत**

(क) त्वाहौ सौ
(ख) युवावौ द्विवचने ।
(ग) शसो न ।
(घ) योऽचि ।
(ङ) तवममौ ङसि ।
(च) भ्यसो भ्यम्

**८. "शेषे लोपः" इति सूत्रस्य द्विविधमेव मतमनुसृत्य सोदाहरणमर्थं लिखत ।**

**९. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत**

त्वया, वयम्, त्वाम्, अस्मान्, युवाभ्याम्, अस्मत्, आवयोः, मयि ।

हलन्तपुँल्लिङ्गप्रकरणे

# युष्मदस्मदोः समासान्वादेशादिव्यवस्था

समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसङ्ख्यश्चेत्स्तो युवावौ त्वमावपि ॥ १ ॥

सुजस्ङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममाविति ॥ २ ॥

एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ॥ ३ ॥

द्व्येकसङ्ख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरव्येकतार्थत्वान्न युवावौ त्वमौ च न ॥ ४ ॥

त्वां मां वा अतिक्रान्त इति विग्रहे, अतित्वम् । अत्यहम् । अतित्वाम्, अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् । अतिमाम् । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः । अतितुभ्यम् । अतिमह्यम् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वभ्यम् । अतिमभ्यम् । ङसिभ्यसोः - अतित्वत् । अतिमत् । भ्यामि प्राग्वत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु ॥

युवाम् आवाम् वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत् । औअम्औट्सु- अतियुवाम् । अत्यावाम् । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः । भ्यसि - अतियुवभ्यम् । अत्यावभ्यम् । ङसिभ्यसोः -अतियुवत् । अत्यावत् । ओसि - अतियुवयोः अत्यावयोः । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु ।

युष्मान् अस्मान्वेति विग्रहे सुजस्ङेङस्सु प्राग्वत् । औअम्औट्सु - अतियुष्माम् । अत्यस्माम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्माभिः । अत्यस्माभिः । भ्यसि - अतियुष्मभ्यम् । अत्यस्मभ्यम् । ङसिभ्यसोः - अतियुष्मत् । अत्यस्मत् । ओसि - अतियुष्मयोः । अत्यस्मयोः । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु ।

**पदस्य ८ । १ । १६**

**पदात् ८ । १ । १७**

**अनुदात्तं सर्वमपादादौ ८ । १ । १८**

**इत्यधिकृत्य ।**

इति सूत्रत्रयस्य अधिकारे विधीयमानं कार्यं पदस्य भवति, पदात् परस्य भवति, अपादादौ स्थितस्य भवति, अनुदात्तस्वरवाञ्च भवतीति च बोध्यम् ।

### वाम्, नौ इत्यादेशविधायकं विधिसूत्रम्-

**युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ८ । १ । २०**

**पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः । तौ चानुदात्तौ ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, वांनावौ)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः शब्दयोः क्रमेण वाम् नौ इत्यादेशौ भवतः तौ च अनुदात्तौ स्तः ।

### वस् नस् इत्यादेशविधायकं विधिसूत्रम्-

**बहुवचनस्य वस्नसौ ८ । १ । २१**

**उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः । वांनावोरपवादः ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, बहुबचनस्य, वस्नसौ)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः शब्दयोः बहुवचनस्य स्थाने क्रमेण वस् नस् इत्यादेशौ भवतः तौ च अनुदात्तौ स्तः ।

### ते मे इत्यादेशविधायकं विधिसूत्रम्-

**तेमयावेकवचनस्य ८ । १ । २२**

**उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, एकवचनस्य, तेमयौ)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः शब्दयोः एकवचनस्य स्थाने क्रमेण ते मे इत्यादेशौ भवतः तौ च अनुदात्तौ स्तः ।

**त्वा मा इत्यादेशविधायकं विधिसूत्रम्-**

**त्वामौ द्वितीयायाः ८ । १ । २३**

**द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, द्वितीयायाः, त्वामौ)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः द्वितीयायाः एकवचनान्तयोः शब्दयोः स्थाने क्रमेण त्वा मा इत्यादेशौ भवतः तौ च अनुदात्तौ स्तः ।

**श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ।**
**स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥**
**सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।**
**सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥**

**पदात्परयोः किम् - वाक्यादौ मा भूत् - त्वां पातु । मां पातु ।**

**अपादादौ किम् - 'वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु' ।**

**स्थग्रहणाच्छ्रूयमाणविभक्तिकयोरेव, नेह - इति युष्मत्पुत्रो ब्रवीति । इत्यस्मत्पुत्रो ब्रवीति ।**

**"समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः" (वा) । "एकतिङ् वाक्यम्" (वा) तेनेह न - ओदनं पच तव भविष्यति ।**

**इह तु स्यादेव - शालीनां ते ओदनं दास्यामि इति ।**

**"एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः" (वा) अन्वादेशे तु नित्यं स्युः, धाता ते भक्तोऽस्ति/धाता तव भक्तोऽस्ति वा । तस्मै ते नम इत्येव ।**

पदात्परस्थितानाम् अपादादौ स्थितानां युष्मदस्मच्छब्दयोः सिद्धरूपाणां द्वितीयाया एकवचने त्वा मा इत्यादेशौ भवतः । तथैव षष्ठीचतुर्थ्येकवचने ते मे इत्यादेशौ भवतः । द्वितीयाचतुर्थीषष्ठी-विभक्त्यन्तानां बहुवचने वस् नस् इत्येतावादेशौ भवतः । तेषामेव द्विवचनान्तानां वां नौ इत्येतावादेशौ भवत इत्यर्थः ।

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| द्वितीयायाम् | त्वा मा | वां नौ | वः नः |
| चतुर्थ्याम् | ते मे | वां नौ | वः नः |
| षष्ठ्याम् | ते मे | वां नौ | वः नः |

### वांनावाद्यादेशनिषेधविधायकं सूत्रम्-

**न चवाहाऽहैवयुक्ते ८ । १ । २४**

**चादिपञ्चकयोगे नैत आदेशाः स्युः । हरिस्त्वां मां च रक्षतु, कथं त्वां मां वा न रक्षेदित्यादि । युक्तग्रहणात् साक्षाद्योगेऽयं निषेधः । परम्परासंबन्धे त्वादेशः स्यादेव । हरो हरिश्च मे स्वामी ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, वांनावौ, बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयायाः, न)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः शब्दयोः स्थाने **च वा ह अह एव** एतेषां प्रयोगे वांनावादयः आदेशाा न भवन्ति ।

'हरो हरिश्च मे स्वामी' इत्यत्र चशब्दस्य हरिहरयोः साक्षादन्वयः, समुच्चितयोर्हरिहरयोः स्वामीत्यत्रान्वयः स्वामीत्यस्य मे इत्यत्रान्वयः । अतः चशब्दस्य अस्मच्छब्देन साक्षादन्वयाभावाद् मे आदेशस्य निषेधो नेति भावः ।

यत्र समुच्चयादिभिः चाद्यर्थैः युष्मदस्मदर्थयोस्साक्षात्सम्बन्धः तत्रैवायं निषेधः ।

### वांनावाद्यादेशनिषेधविधायकं सूत्रम्-

**पश्यार्थैश्चानालोचने ८ । १ । २५**

**अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः । चेतसा त्वां समीक्षते । परम्परासम्बन्धेऽप्ययं निषेधः, भक्तस्तव रूपं ध्यायति । आलोचने तु - भक्तस्त्वां पश्यति चक्षुषा ।**

(पदस्य, पदात्, अनुदात्तं सर्वमपदादौ, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, वांनावौ, बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयायाः, पश्यार्थैः, च, अनालोचने, न)

**सरलार्थः–** पदात् परयोः अपादादौ स्थितयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाविभक्त्यन्तयोः शब्दयोः स्थाने अचाक्षुषज्ञानार्थैर्धातुभिर्योगे वांनावादयः आदेशा न भवन्ति ।

### विभाषया वांनावाद्यादेशविधायकं सूत्रम्-

**सपूर्वायाः प्रथमाया विभाषा ८ । १ । २६**

**विद्यमानपूर्वात् प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येत आदेशा वा स्युः । भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्, त्वा मा इति वा ।**

(सपूर्वायाः, प्रथमायाः, विभाषा, युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः वांनावौ, बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयायाः)

### आमन्त्रितसंज्ञाविधायकं सूत्रम्-

**सामन्त्रितम् २ । ३ । ४८**

**सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात् ।**

**सरलार्थः-** सम्बोधने एकवचनान्तस्य पदस्य आमन्त्रितसंज्ञा भवति ।

### अविद्यमानवद्भावविधायकमतिदेशसूत्रम्-

**आमन्त्रितं पूर्वमविद्यमानवत् ८ । १ । ७२**

**स्पष्टम् । अग्ने तव । देवास्मान् पाहि । अग्ने नय । अग्न इन्द्र वरुण । इह युष्मदस्मदोरादेशस्तिङन्तनिघात आमन्त्रितनिघातश्च न । "सर्वदा रक्ष देव ! नः" इत्यत्र तु देवेत्यस्याविद्यमानवद्भावेऽपि ततः प्राचीनं (पूर्वस्थं) रक्षेत्येतदाश्रित्यादेशः । एवम् "इमं मे गङ्गे यमुने" इति मन्त्रे यमुन इत्यादिभ्यः प्राचीनानाम् आमन्त्रितानामविद्यमानवद्भावेऽपि मेशब्दमेवाश्रित्य सर्वेषां निघातः ।**

(आमन्त्रितम्, पूर्वम्, अविद्यमानवत्)

**सरलार्थः-** वाक्यादौ आमन्त्रितस्य प्रयोगेऽपि तस्य अविद्यमानवद् व्यवहारो भवति । तेन "अग्ने ! तव श्रवो वयः" इत्यृचि अग्ने इत्यविद्यमानवत्त्वात् पदात्परत्वाभावेन तव इत्यस्य स्थाने ते आदेशो न भवतीति भावः ।

### अविद्यमानवद्भावविधायकमतिदेशसूत्रम्-

**नामन्त्रिते समानाधिकरणे सामान्यवचनम् ८ । १ । ७३**

**विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत् स्यात् । हरे दयालो नः पाहि । अग्ने तेजस्विन् । 'विभाषितं विशेषवचने' अत्र भाष्यम् 'बहुवचनमिति वक्ष्यामी'ति । बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवद्वा । यूयं प्रभवः । देवाः शरण्याः । युष्मान् भजे । वो भजे इति वा । इहान्वादेशेऽपि वैकल्पिका आदेशाः ।**

(न, आमन्त्रिते, समानाधिकरणे, सामान्यवचनम्, आमन्त्रितम्, पूर्वम्, अविद्यमानवत्, पदस्य)

**सरलार्थः-** क्रमेण विशेष्यविशेषणभावेन स्थितयोरमन्त्रितयोः प्रयोगे सति विशेष्यीभूतस्य आमन्त्रितस्य अविद्यमानवद्भावो न भवति । तेन 'हरे दयालो नः पाहि' इत्यत्र विशेषणस्य दयालो इति आमन्त्रितस्याविद्यमानवद्भावेऽपि विशेष्यस्य हरे इति पदस्य अविद्यमानवद्भावनिषेधात् तस्मात् परस्य नसादेश इति भावः ।

# अभ्यासः

## १. परस्परं मेलयत

(क)

| | |
|---|---|
| त्वा | मे |
| ते | नौ |
| वाम् | नः |
| वः | मा |

(ख)

| | |
|---|---|
| त्वम् | ते |
| माम् | मे |
| युवयोः | त्वा |
| आवाभ्याम् | मा |
| तुभ्यम् | वः |
| मम | नः |
| युष्मान् | वाम् |
| अस्मभ्यम् | नौ |

## २. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

त्वा, वाम्, वः, मा, नौ, नः, ते, मे ।

## ३. अधस्तनानां प्रश्नानामुत्तरं दत्त

(क) युस्मदस्मदोस्त्वामाद्यादेशाः कुत्र भवन्ति ?

(ख) वाक्यादौ त्वामादीनां प्रयोगः साधुर्न वा ? सकारणं लिखत ।

(ग) 'हरिः नः पातु' इत्यत्र 'नः' इति कस्य शब्दस्य रूपम् ?

(घ) 'सुखं वां नौ ददात्वीशः' इत्यत्र वां नौ कस्यां विभक्तौ वर्तेते ?

(ङ) आमन्त्रितमित्यस्य कोऽर्थः ?

(च) वांनावादय आदेशाः क्व विकल्पेन भवन्ति कुत्र च नित्यमेव भवन्तीति निर्दिशत ।

## ४. अधस्तनप्रयोगाणां ससूत्रं सिद्धिप्रक्रियां दर्शयत

त्वा, मा, वाम्, नौ, वः, नः, ते, मे ।

## ५. अधस्तनसूत्रवार्तिकानां सरलार्थं लिखत

(क) युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ।

(ख) बहुवचनस्य वस्नसौ ।

(ग) तेमयावेकवचनस्य ।

(घ) त्वामौ द्वितीयायाः ।

(ङ) समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः

(च) एकतिङ् वाक्यम्

(छ) एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः

(ज) पश्यार्थैश्चानालोचने

## ६. अन्वादेशः कः ? सोदाहरणं परिचयं दत्त ।

## ७. अधोलिखितश्लोकस्य भावार्थं प्रकाशयत

श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥

हलन्तपुँल्लिङ्गप्रकरणे

# दकारान्तादिशब्दानां रूपसिद्धिप्रक्रिया

**सुपात्/सुपाद्** । **सुपादौ** । **सुपादः** । **सुपादम्** । **सुपादौ** ।

सु = शोभनौ पादौ यस्येति बहुव्रीहौ "संख्यासुपूर्वस्य" इति पादशब्दान्त्यलोपे सुपात्शब्दः

### पदादेशविधायकं विधिसूत्रम्-

**पादः पत् ६ । ४ । १३०**

**पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्** । **सुपदः** । **सुपदा** । **सुपाद्भ्यामित्यादि** । **अग्निं मन्थतीति अग्निमत्/अग्निमद्** । **अग्निमथौ** । **अग्निमथः** । **अग्निमद्भ्यामित्यादि** । **"ऋत्विग्-" इत्यादिसूत्रेण अञ्चेः सुप्युपपदे क्विन्** ।

(भस्य, पादः,पत्, अङ्गस्य)

**सरलार्थः–** पाच्छब्दान्तस्य भसंज्ञकस्य अङ्गस्य स्थाने पदादेशो भवति ।

सुपाद् + शस् - सुपाद् + अस् - सुपद् + अस् - सुपदस् - सुपदरु - सुपदर् - **सुपदः** ।

अग्निमथ् + सु - अग्निमथ् + स् - अग्निमथ् - अग्निमद् - **अग्निमत्/अग्निमद्** ।

अग्निमथ् + भ्याम् - अग्निमद् + भ्याम् - **अग्निमद्भ्याम्** ।

### नकारलोपविधायकं विधिसूत्रम्-

**अनिदितां हल उपधायाः क्ङिति ६ । ४ । २४**

**हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः स्यात्किति ङिति च । "उगिदचाम्-" इति नुम्, संयोगान्तलोपः, नुमो नकारस्य "क्विन्प्रत्ययस्य कुः" इति कुत्वेन ङकारः, प्राङ्** । **अनुस्वारपरसवर्णौ, प्राञ्चौ** । **प्राञ्चः** । **प्राञ्चम्** । **प्राञ्चौ** ।

(अनिदिताम्, हलः, अङ्गस्य, उपधायाः, नलोपः, क्ङिति)

**सरलार्थः–** इत् इत् अस्ति येषां ते इदितः तेषामिदितां न इदितामिति अनिदिताम् इकारेत्सञ्ज्ञारहिताना हलन्तानाम् अङ्गानाम् उपधाभूतस्य नकारस्य लोपो भवति किति ङिति च प्रत्यये परे ।

प्र अञ्चतीत्यर्थे प्रपूर्वकाद् अञ्चुधातोरुकारस्येत्संज्ञायां लोपे ततः क्विनि अनुबन्धलोपे प्र अञ्च् व् इति जाते "वेरपृक्तस्य" इति वकारलोपेऽनेन सूत्रेण नलोपे सवर्णदीर्घे "प्राच्" इति शब्दस्य कृदन्तत्वेन प्रातिपदिकसंज्ञायां सौ ।

प्राच् + सु - प्राच् + स् - प्राच् - प्रान् (नुम्) च् - प्रान् (संयोगान्तलोपः) - **प्राङ्** (कुत्वम्) । प्राच् + औ - प्रान्च् + औ - प्रांच् + औ - प्राञ्च् + औ - **प्राञ्चौ** ।

### अकारस्य लोपविधायकं विधिसूत्रम्-

**अचः ६ । ४ । १३८**

**लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात् ।**

(अचः, भस्य, अङ्गस्य, अल्लोपः)

**सरलार्थः–** नकारस्य लोपो यत्र भवति तादृशस्य अञ्च्धातोः भस्य अकारस्य लोपो भवति ।

### अणः दीर्घादेशविधायकं विधिसूत्रम्-

**चौ ६ । ३ । १३८**

**लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात् । प्राचः । प्राचा । प्राग्भ्यामित्यादि । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चम् । प्रत्यञ्चौ । "अचः" इति लोपस्य विषयेऽन्तरङ्गोऽपि यण् न प्रवर्तते, "अकृतव्यूहा-" इति परिभाषया । प्रतीचः । प्रतीचा ।**

(चौ, पूर्वस्य, अणः, दीर्घः)

**सरलार्थः–** अकारस्य नकारस्य च लोपो यत्र तादृशे अञ्चधातौ परे पूर्वस्य अणः स्थाने दीर्घादेशो भवति ।

प्र अच् + शस् - प्र अच् + अस् - प्रच् + अस् (अकारलोपः) - प्रच् + अस् (दीर्घे) - प्राचस् - प्राचरु - प्राचर् - **प्राचः** ।

शसादिषु भसंज्ञाप्रयोजिकासु विभक्तिषु "अचः" इत्यनेन अल्लोपद्वारा यणो निमित्तस्य विनाशसंभवेन प्रति + अञ्च् इत्यत्र अकृतव्यूहपरिभाषया यण् न भवतीत्यर्थः । तेन शसादौ "प्रति अच्" इति स्वरूपादेव विभक्तिकार्याणि जायन्ते । अत्राल्लोपानन्तरं 'चौ' इति दीर्घश्च सिद्ध्यति ।

प्रत्यच् + सु - प्रत्यच् + स् - प्रत्यच् - प्रत्यन्च् - प्रत्यन् - **प्रत्यङ्** ।

प्रति अच् + शस् - प्रति अच् + अस् - प्रति च् + अस् - प्रतीच् + अस् प्रतीचस् - प्रतीचरु - प्रतीचर् - **प्रतीचः** ।

**अमुमञ्चति इति विग्रहे अदस् अञ्च् इति स्थिते -**

### अद्र्यादेशविधायकं विधिसूत्रम्-

**विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ६ । ३ । ९२**

**अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्ते अञ्चतौ परे । 'अदद्रि + अञ्च्' इति स्थिते, यण् ।**

(विश्वग्देवयोः, च, टेः, अद्रि, अञ्चतौ, अप्रत्यये)

**सरलार्थः–** विष्वग्-देवशब्दयोः सर्वनाम्नश्च टेः अद्रि इत्यादेशो भवति लुप्तप्रत्ययके अञ्चतौ परे ।

### उत्वमत्वविधायकं विधिसूत्रम्-

**अदसोऽसेर्दादुदो मः ८ । २ । ८०**

**अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च ।**

**उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः । आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घः । अमुमुयङ् । अमुमुयञ्चौ । अमुमुयञ्चः । अमुमुयञ्चम् । अमुमुयञ्चौ । अमुमुईचः । अमुमुईचा । अमुमुयग्भ्यामित्यादि । मुत्वस्यासिद्धत्वान्न यण् ।**

(असे, अदस, दाद्, उ, दः, मः)

**सरलार्थः–** सान्तभिन्नस्य अदस्शब्दस्य दकाराद् उत्तरस्य वर्णस्य स्थाने उकारादेशः, दकारस्य स्थाने मकारादेशश्च भवतः । तत्र प्रमाणकृतेन आन्तर्येण ह्रस्वस्य उकारस्य उत्वम्, दीर्घस्य च ऊत्वं बोध्यम् ।

अमुम् अञ्चति इत्यर्थे द्वितीयाविभक्त्यन्ताद् अदस् अम् इत्युपपदाद् अञ्च्धातोः क्विनि सर्वापहारलोपे उपपदसमासे, सुब्लुकि नलोपे, अदसः टेः अद्रि आदेशे "अदसो-" इति मुत्वे अमुमुइ अच् इत्यत्र यणि अमुमुयच् इत्यस्मात् सौ, तस्य लोपे, नुमि संयोगान्तलोपे नकारस्य कुत्वेन ङकारे अमुमुयङ् इति रूपम् । शसादौ अचि अल्लोपे दीर्घे च कृते त्रिपादीत्वेन यणं प्रति मुत्वस्यासिद्धत्वाद् यणभावे अमुमुईचः इत्यादिरूपाणि ।

**"अन्त्यबाधेऽन्त्यसदेशस्य" (परि.) इति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते "अदमुयङ्" । "अःसेः सकारस्य स्थाने यस्य सः असिः तस्य असेः" इति व्याख्यानात् 'त्यदाद्यत्वविषय एव मुत्वं नान्यत्र' इति पक्षे 'अदद्रङ्' उक्तं च (भाष्ये) -**

**अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।**
**केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ॥ इति**

अदसः अद्रि आदेशे सति उत्वमत्वविषये पक्षत्रयं विद्यते । अदसः अद्रि आदेशे अदद्रिशब्दस्य दकारयोः स्थाने मकारादेशौ तदुत्तरयोः स्थाने उत्वमिति प्रथमपक्षः । तेषां मते अमुमुयङ् इति रूपम् । अन्त्यस्य आदेशाप्राप्ते अन्त्यसमीपवर्तिन एवादेशो भवतीति द्वितीयपक्षः । अत्र पक्षे द्वितीयदकारस्य मत्वे ततः परस्य रेफस्य उत्वे 'अदमुयङ्' इति रूपम् । सकारस्य स्थाने यत्र अकारादेशः तस्मिन् अदस्शब्दे एव उत्वम् मकारादेशश्च नान्यत्रेति तृतीयपक्षः । तेनात्र त्यदाद्यत्वाभावान्न मुत्वम् । अतः 'अदद्र्यङ्' इति रूपमिति ।

**विष्वग्देवयोः किम् - अश्वाची । अञ्चतौ किम् - विष्वग्युक् । अप्रत्यये किम् - विष्वगञ्चनम् । अप्रत्ययग्रहणं ज्ञापयति 'अन्यत्र धातुग्रहणे तदादिविधिः' इति । तेनायस्कारः ।**

**'अतः कृकमि-' इति सः । उदङ् । उदञ्चौ । उदञ्चः । शसादावचि -**

### ईकारादेशविधायकं विधिसूत्रम्-

**उद ईत् ६ । ४ । १३९**

**उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् स्यात् ।**

**उदीचः । उदीचा । उदग्भ्यामित्यादि** । अकारलोपं निषिध्यानेन ईकारादेशः ।

(उदः, अचः, भस्य, ईत्)

**सरलार्थः–** उद्शब्दाद् उत्तरस्य नकारलोपवतः अञ्च्धातोः भस्य अकारस्य स्थाने ईत् आदेशो भवति ।

उदच् + शस् - उदच् + अस् - उदीच् + अस् - उदीचस् - उदीचरु - उदीचर् - **उदीचः** ।

### समि-आदेशविधायकं विधिसूत्रम्-

**समः समि ६ । ३ । ९३**

**अप्रत्ययान्तेऽञ्चतौ परे समः समिरादेशः स्यात् ।**

**सम्यङ् । सम्यञ्चौ । सम्यञ्चः । समीचः । समीचा ।**

(अप्रत्यये, अञ्चतौ, उत्तरपदे, समः, समि)

**सरलार्थः–** अप्रत्ययान्ते अञ्च्धातौ परे सम्शब्दस्य स्थाने समि इत्यादेशो भवति ।

सम्यच् + सु - सम्यच् + स् - सम्यच् - सम्यन्च् - सम्यन् - **सम्यङ्** । समि अच् + शस् - समि अच् + अस् - समि च् + अस् - समीच् + अस् - समीचस् - समीचरु - समीचर् - **समीचः** ।

### सध्रि-आदेशविधायकं विधिसूत्रम्-

**सहस्य सध्रिः ६ । ३ । ९५**

**अप्रत्ययान्तेऽञ्चतौ परे । सध्र्यङ् ।**

(अप्रत्यये, अञ्चतौ, उत्तरपदे, सहस्य, सध्रि)

**सरलार्थः–** अप्रत्ययान्ते अञ्चधातौ परे सहस्य सध्रि इत्यादेशो भवति ।

### तिर्यादेशविधायकं विधिसूत्रम्-

**तिरसस्तिर्यलोपे ६ । ३ । ९४**

**अलुप्ताकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात् । तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । तिर्यञ्चम् । तिर्यञ्चौ । तिरश्चः । तिरश्चा । तिर्यग्भ्यामित्यादि ।**

(अप्रत्यये, अलोपे, अञ्चतौ, उत्तरपदे, तिरसः, तिरि)

**सरलार्थः–** अलुप्ताकारवति अप्रत्ययान्ते अञ्चतौ परे तिरसः तिरि इत्यादेशो भवति ।

### नलोपस्य निषेधविधायकं सूत्रम्-

**नाञ्चेः पूजायाम् ६ । ४ । ३०**

**पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात् । अलुप्तनकारत्वान्न नुम् । प्राङ् । प्राञ्चौ । प्राञ्चः । नलोपाभावादकारलोपो न । प्राञ्चः । प्राञ्चा । प्राङ्भ्याम् । प्राङ्ख्षु/प्राङ्क्षु/प्राङ्षु । एवं पूजार्थे प्रत्यङ्ङादयः । 'क्रुञ्च कौटिल्याल्पीभावयोः' । अस्य "ऋत्विग्" आदिना क्विन् नलोपाभावोऽपि निपात्यते । क्रुङ् । क्रुञ्चौ । क्रुङ्भ्याम् इत्यादि ।**

(पूजायाम्, अञ्चेः, अङ्गस्य, उपधायाः, नलोपः, न, क्ङिति)

**सरलार्थः–** पूजार्थकस्य अञ्चतेर्धातोः उपधायां स्थितस्य नकारस्य लोपो न भवति ।

प्राञ्च् + सु - प्राञ्च् + स् - प्राञ्च् - प्रान् (चलोपे ञकारस्य नकारः) - **प्राङ्** (कुत्वम्) ।

प्राञ्च् + शस् - प्राञ्च् + अस् - प्राञ्चस् - प्राञ्चरु - प्राञ्चर् - **प्राञ्चः** ।

प्राञ्च् + सुप् - प्राञ्च् + सु - प्रान् + सु - प्राङ् क् (कुगागमः) + सु - प्राङ्ख् + सु - प्राङ्ख + षु - **प्राङ्ख्षु** (चयोरिति द्वितीयाक्षरादेशः) । तस्याभावे - प्राङ्क् + षु - **प्राङ्क्षु** (क् + षु = क्षु) कुगागमाभावे - प्राङ् + षु - **प्राङ्षु** ।

| सुपाद्शब्दस्य रूपावली | | | अग्निमथ्शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| सुपात्-द् | सुपादौ | सुपादः | अग्निमत्/द् | अग्निमथौ | अग्निमथः |
| सुपादम् | सुपादौ | सुपदः | अग्निमथम् | अग्निमथौ | अग्निमथः |
| सुपदा | सुपाद्भ्याम् | सुपाद्भिः | अग्निमथा | अग्निमद्भ्याम् | अग्निमद्भिः |
| सुपदे | सुपाद्भ्याम् | सुपाद्भ्यः | अग्निमथे | अग्निमद्भ्याम् | अग्निमद्भिः |
| सुपदः | सुपाद्भ्याम् | सुपाद्भ्यः | अग्निमथः | अग्निमद्भ्याम् | अग्निमद्भ्यः |
| सुपदः | सुपदोः | सुपदाम् | अग्निमथः | अग्निमथोः | अग्निमथाम् |
| सुपदि | सुपदोः | सुपात्सु | अग्निमथि | अग्निमथोः | अग्निमत्सु |
| हे सुपात्-द् ! | हे सुपादौ ! | हे सुपादः ! | हे अग्निमत्-द् ! | अग्निमथौ ! | हे अग्निमथः ! |

## रूपसाधनप्रकारः

**सुपदः**

सुपाद्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ अनुबन्धलोपे भसंज्ञायां "पादःपत्" इति सूत्रेण पदादेशे वर्णयोगे सुपदस् इति जाते सकाररस्य रुत्वे विसर्गे 'सुपदः' इति रूपं सिद्धम् ।

**प्राङ्**

प्राच्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सौ अनुबन्धलोपे "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इत्यनेन सकारस्य लोपे "उगिदचां सर्वनामस्थानेऽधातोः" इति सूत्रेण नुमागमेऽनुबन्धलोपे प्रान्च् इति जाते "संयोगान्तस्य लोपः" इति सूत्रेण चकारस्य लोपे "क्विन्प्रत्ययस्य कुः" इति सूत्रेण कुत्वे नकारस्य ङकारे प्राङ् इति रूपं सिद्धम् ।

# अभ्यासः

## १. निम्नाङ्कितानां सूत्राणां सरलार्थं लिखत -

(क) पादः पत् । (ख) अचः । (ग) अदसोऽसेर्दादुदो मः ।

(घ) उद ईत् । (ङ) सहस्य सध्रिः ।

## २. अधोलिखितानां प्रश्नानामुत्तराणि लिखत -

(क) अदसः टेः अद्रिः इत्यादेशः केन सूत्रेण भवति ?

(ख) 'प्रतीचः' इत्यत्र 'प्रति + अच्' इत्यवस्थायां कया परिभाषया यण्निषेधः ?

(ग) 'अमुमुईचः' इत्यत्र 'इको यणचि' इत्यनेन यण् कथं न भवति ?

(घ) 'नाञ्चेः पूजायाम्' इत्यनेन केन प्राप्तस्य नलोपस्य निषेधः ?

(ङ) 'उद ईत्' इत्यनेन कस्य स्थाने ईकारादेशो भवति ?

(च) अदसः अद्रि इत्यादेशे सति उत्वमत्वविषये कति पक्षाः निर्दिष्टाः सन्ति ? के च ते ?

(छ) 'क्रुञ्च' इत्यस्यार्थं निर्दिश्य नलोपाभावो केन निपात्यत इति दर्शयत ।

## ३. अधःप्रदत्तानां प्रयोगाणां ससूत्रं रूपसाधनप्रकारः प्रदर्शनीयः -

सुपादम् । अग्निमत्सु । प्रतीचः । अमुमुईचा । सध्र्यङ् ।

## ४. रिक्तस्थानं पूरयत -

| | | |
|---|---|---|
| प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः । |
| ....... | प्रत्यञ्चौ | ... ... । |
| प्रतीचा | प्रत्यग्भ्याम् | प्रत्यग्भिः । |
| ........ | प्रत्यग्भ्याम् | ......... । |
| प्रतीचः | प्रत्यग्भ्याम् | प्रत्यग्भ्यः । |
| प्रतीचः | ... ... | प्रतीचाम् । |
| ... ... | प्रतीचोः | प्रत्यक्षु । |
| हे प्रत्यङ् ! | हे प्रत्यञ्चौ ! | हे प्रत्यञ्चः ! |

हलन्तपुँल्लिङ्गप्रकरणे

# चान्तादिशब्दानां रूपसिद्धिप्रक्रिया

**'चोः कुः' पयोमुक् / पयोमुग् । पयोमुचौ । पयोमुचः । 'व्रश्च-' इति षत्वम् 'स्कोः -' इति सलोपः । जश्त्वचर्त्वे सुवृट्/ सुवृड् । सुवृश्चौ । सुवृश्चः । सुवृट्त्सु / सुवृट्सु ।**

सुवृश्च्शब्दस्य प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे सकारस्य हल्ङ्यादिलोपे 'व्रश्च-' इति षत्वे सुवृश्ष् इत्यत्र 'स्कोः -' इति सूत्रापेक्षया 'स्तोः श्चुना-' इत्यस्य परत्रैपादिकत्वेन असिद्धत्वात् "स्कोः संयोगाद्योरन्ते च" इति सूत्रेण सकारस्य लोपेः । ततः जश्त्वे चर्त्वे च कृते **सुवृट्/सुवृड्** इति रूपद्वयम् ।

सुवृश्च् + सु - सुवृश्च् + स् - सुवृश्च् - सुवृश्ष् - सुवृष् - सुवृड् - **सुवृट्/सुवृड्** ।

सुवृश्च् + सुप् - सुवृश्च् + सु - सुवृश्ष् + सु - सुवृष् + सु - सुवृड् + सु - सुवृड् + ध् (धुट्) सु - सुवृड् + त् सु - **सुवृट्त्सु/सुवृट्सु** ।

**"वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च" (उ.सू.) एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात् । उगित्त्वान्नुम् 'सान्तमहतः संयोगस्य' इति दीर्घः । मह्यते - पूज्यते इति, महान् । महान्तौ । महान्तः । हे महन् ! महतः । महता । महद्भ्याम् । इत्यादि ।**

महत् + सु - महत् + स् - महन्त् (नुम्) + स् - महान्त् + स् - महान्त् - **महान्** । महत् + औ - महन्त् + औ - महान्त् + औ - **महान्तौ** । महत् + सु - महत् + स् - महन्त् - महनत् - महन् - **हे महन्** । महत् + भ्याम् - महद् + भ्याम् - **महद्भ्याम्** ।

### दीर्घादेशविधायकं विधिसूत्रम्-

**अत्वसन्तस्य चाधातोः ६ । ४ । १४**

**अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे । परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः, ततो नुम्-धीमान् । धीमन्तौ । धीमन्तः । हे धीमन् ! शसादौ महद्वत् ।**

(अधातोः, असन्तस्य, अतु, अङ्गस्य, उपधायाः, दीर्घः, असम्बुद्धौ सौ)

**सरलार्थः–** अत्वन्तस्य अङ्गस्य, धातुभिन्नस्य असन्तस्य च उपधायाः स्थाने दीर्घादेशो भवति, असम्बुद्धौ सौ परे ।

धीमदित्यादीनां मतुबन्तानामुगित्त्वेन "उगिदचां-" इत्यनेन परत्वान्नित्यत्वाच्च नुम् प्राप्नोति, कृते च नुमि उपधायां ह्रस्वत्वाभावाद् अनेन दीर्घविधानं व्यर्थं स्यात्, अतः परं नित्यमपि नुमं बाधित्वा पूर्वं दीर्घः ततो नुम्विधीयते इति भावः ।

धीमत् + सु - धीमत् + स् - धीमात् + स् - धीमान्त् (नुम्) + स् - धीमन्त् - **धीमान्** ।

धीमत् + औ - धीमन्त् + औ - **धीमन्तौ** ।

'अत्वसन्तस्य-' इत्यत्र अधातोरिति असन्तस्य इत्यत्रैवान्वेति न तु अत्वन्तस्य इत्यत्र, तेन अत्वन्तस्य धातोरपि दीर्घो भवति तेनाह -

**धातोरप्यत्वन्तस्य दीर्घः । गोमन्तमिच्छति, गोमानिवाचरतीति वा क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप् । 'उगिदचाम्-' इति सूत्रेऽज्ग्रहणं नियमार्थम् । 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति । तेन 'स्रत्, ध्वत्' इत्यादौ न । 'अधातोः' इति त्वधातुभूतपूर्वस्यापि नुमर्थम् । गोमान् । गोमन्तौ । गोमन्तः इत्यादि । भातेर्डवतु भवान् । भवन्तौ । भवन्तः । शत्रन्तस्य त्वत्वन्तत्वाभावान्न दीर्घः । भवतीति भवन् ।**

ननु 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यत्र अचामिति अञ्चुधातोः निर्देशः, अस्यापि उगित्वेनैव नुमि सिद्धे पृथग्ग्रहणं धातोश्चेदुगित्कार्यं भवति तर्हि अञ्चतेरेव इति ज्ञापनार्थमस्तीति स्वीक्रियते तेन 'स्रंसु ध्वंसु' इत्युगितौ धातू, ताभ्यां क्विपि 'अनिदितां हल उपधायाः -' इति नलोपे सुबुत्पत्तौ सोर्हल्ङ्यादिलोपे "वसुस्रंसुध्वंस्वनडुहां दः" इति दत्वे **"स्रत्, ध्वत्"** इति सिद्धचतः । उगितः सर्वनामस्थाने इत्युक्ते तु अत्रापि नुम् स्यात् । कृते त्वज्ग्रहणे उक्तनियमलाभादत्र नुम् न भवतीत्यर्थः । तर्हि 'उगिदचां सर्वनामस्थाने' इत्यनेनैव सिद्धे पुनरन्त्ये अधातोरिति ग्रहणं व्यर्थमिति जिज्ञासायामाह - सम्प्रति धातुरूपत्वेन वर्तमानोऽपि उगिदवस्थायामधातुरासीत् चेत्तर्हि तस्यापि नुमागमो भवतीत्यर्थविशेषलाभाय अधातुग्रहणं सार्थकमस्ति । अत एव "गोमच्छब्दस्य आचारक्विबन्तस्य धातुत्वेऽपि मतुप्प्रत्ययविधानकाले धातुत्वाभावाद् अस्य नुमागमो भवत्येव ।

भाधातोर्डवतुप्रत्ययेन निष्पन्नस्य भवत्शब्दस्य अत्वन्तत्वेन "अत्वसन्तस्य-" इति दीर्घे **भवान्** इति रूपम् । भूधातोः शतृप्रत्ययेन निष्पन्नस्य भवत्- शब्दस्य तु **भवन्** इत्येव रूपमिति विवेकः ।

भवत् + सु - भवत् + स् - भवात् + स् - भवान्त् + स् - भवान्त् - भवान् । भवत् + सु - भवत् + स् - भवन्त् + स् - भवन्त् - **भवन्** । (शतृपक्षे) । शेषविभक्तिषु तुल्यान्येव रूपाणि जायन्ते ।

### अभ्यस्तसंज्ञाविधायकं सूत्रम्-

**उभे अभ्यस्तम् ६ । १ । ५**

**षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः ।**

(द्वे, उभे, अभ्यस्तम्)

**सरलार्थः-** षष्ठाध्याये द्वित्वविधायकानि यानि सूत्राणि सन्ति, तैः यत्र द्वित्वं विधीयते तत्र द्विरुक्तः समुदायः अभ्यस्तसंज्ञको भवति ।

### नुमागमनिषेधकं सूत्रम्-

**नाभ्यस्ताच्छतुः ७ । १ । ७८**

**अभ्यस्तात्परस्य शतुर्नुम् न स्यात् । ददत्/ददद् । ददतौ । ददतः ।**

(अभ्यस्तात्, शतुः, नुम्, न)

**सरलार्थः-** अभ्यस्तसंज्ञकात् परस्य शतृप्रत्ययस्य नुमागमो न भवति ।

दाधातोः लटः शत्रादेशे दा + अत्, शपि तस्य 'जुहोत्यादिभ्यः श्लुः' इति श्लुः (लोपः) "श्लौ" इति द्वित्वम् दादा + अत् - अभ्यासह्रस्वः, आल्लोपः ददत् इति, ततः सौ 'उगिदचां-' इति नुमि प्राप्ते तस्य अनेन निषेधः इति ।

ददत् + सु - ददत् + स् - ददत् - ददद् - **ददत्/ददद्** ।

हलादौ विभक्तौ जश्त्वम्, अजादौ वर्णयोगे पदकार्यञ्च ।

### अभ्यस्तसंज्ञाविधायकं सूत्रम्-

**जक्षित्यादयः षट् ६ । १ । ६**

**षड्धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः । जक्षत्, जक्षद् । जक्षतौ, जक्षतः । एवं जाग्रत्, दरिद्रत्, शासत्, चकासत् । दीधीवेव्योर्ङित्वेऽपि छान्दसत्वाद्व्यत्ययेन परस्मैपदम् । दीध्यत्, वेव्यत् ।**

**गुप्, गुब्, । गुपौ, गुपः । गुब्भ्यामित्यादि ।**

(जक्षित्यादयः षट् अभ्यस्तम्)

**सरलार्थः-** जक्षि, जागृ, दरिद्रा, शास्, दीधीङ्, वेवीङ् चकास् एते सप्त धातवः अभ्यस्तसंज्ञकाः भवन्ति ।

जक्षधातोः शतरि - **जक्षत्/जक्षद्** । **जक्षतौ** । **जक्षतः** । एवं **जाग्रत्** । **दरिद्रत्** । **चकासत्** । दीधीवेव्योर्ङित्वेऽपि छान्दसत्वाद्व्यत्ययेन परस्मैपदम् । दीध्यत् । वेव्यत् ।

परस्मैपदिनो धातुभ्य एव जायमानशतृप्रत्ययः दीधीङ् वेवीङ् इत्यात्मनेपदिनोऽपि छान्दसत्वात् "छन्दसि बहुलम्" इति व्यत्ययेन भवत्येव ।

गुप्शब्दस्य - गुप्/गुब् । गुपौ । गुपः । गुपा । गुब्भ्यामित्यादिरूपाणि ज्ञेयानि ।

### कञ्प्रत्ययविधायकं विधिसूत्रम्-

**त्यदादिषु दृशोऽनालोचने कञ्च ३ । २ । ६०**

**त्यदादिषूपपदेष्वज्ञानार्थाद् दृशेर्धातोः कञ् स्यात्, चात् क्विन् ।**

(त्यदादिषु, दृशः, अनालोचने, कञ्, क्विन् च)

**सरलार्थः–** त्यदादिषु शब्देषु उपपदेषु अज्ञानार्थकाद् दृश्धातोः कञ्प्रत्ययो भवति, चात् क्विन्प्रत्ययश्च भवति ।

### आकारान्तादेशविधायकं विधिसूत्रम्-

**आ सर्वनाम्नः ६ । ३ । ६१**

**सर्वनाम्न आकारोऽन्तादेशः स्याद् दृग्दृश्वतुषु ।**

(सर्वनाम्नः, आ, दृग्दृश्वतुषु)

**सरलार्थः–** सर्वनाम्नः आकारोऽन्तादेशो भवति क्विन्कञ्प्रत्ययान्ते दृश्धातौ परे वतुप्रत्यये परे च ।

**कुत्वस्यासिद्धत्वात् 'व्रश्च-' इति षः । तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य चर्त्वेन पक्षे कः - तादृक्/तादृग् । तादृशौ । तादृशः । 'षत्वापवादत्वात् कुत्वेन खकारः' इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्वं प्रति कुत्वस्यासिद्धत्वात् । 'दिगादिभ्यो यत्' इति निर्देशान्नासिद्धत्वमिति वा बोध्यम् । व्रश्च... इति षत्वम्, जश्त्वचर्त्वे । विट्, विड् । विशौ । विशः । विशम् ।**

स इवायं पश्यति इत्यर्थे क्विन्प्रयये सर्वापहारिलोपे तद्शब्दस्य आकारान्तादेशे, सवर्णदीर्घे तादृश्शब्दात् सौ तस्य हल्ङ्यादिलोपे 'व्रश्च-' इत्यनेन षत्वे, झलां जशोऽन्ते' इति जश्त्वेन डकारे, तस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन गः, तस्य "वावसाने" इति पाक्षिकचर्त्वेन कः ।

विश्शब्दस्य "व्रश्च-" इति षत्वम्, जश्त्वचर्त्वे । **विट्/विड्** । **विशौ** । **विशः** । **विशम्** ।

विश्शब्दः क्विबन्तः, तेन 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् न भवतीति विवेकः । विश् + औ - **विशौ** । विश् + जस् - विश् + अस् - विशस् - विशरु - विशर् - **विशः** । विश् + भ्याम् - विष् + भ्याम् - विड् + भ्याम् - **विड्भ्याम्** ।

### नशेः कवर्गान्तादेशविधायकं विधिसूत्रम्-

**नशेर्वा ८ । २ । ६३**

**नशेः कवर्गोऽन्तादेशो वा स्यात्पदान्ते । नक्, नग्/नट्, नड् । नशौ । नशः । नग्भ्याम्/ नड्भ्यामित्यादि ।**

(नशेः, वा, कुः, पदस्य, अन्ते)

**सरलार्थः–** नश्धातोः विभाषया कवर्गान्तादेशो भवति पदान्ते ।

नश्शब्दस्य क्विप्प्रत्ययान्तत्वेन "क्विन्प्रत्ययस्य कुः" इति अप्राप्ते, चवर्गान्तत्वाभावात् "चोः कुः" इत्यनेन चाप्राप्तेऽनेन सूत्रेण विकल्पेन कुत्वं विधीयते ।

नश् + सु - नश् + स् - नश् - नष् - नड् - नग् - **नक्/नग्**। (कुत्वपक्षे ।)
(कुत्वाभावपक्षे-) नश् + सु - नश् + स् - नश् - नष् - नड् - **नट् /नड्**।
नश् + औ - **नशौ**। नश् + जस् - नश् + अस् - नशस् - नशरु - नशर् - **नशः**।
नश् + भ्याम् - नष् + भ्याम् - नड् + भ्याम् - नग् + भ्याम् (कुत्वम्) - **नग्भ्याम्**।
कुत्वाभावे - नश् + भ्याम् - नष् + भ्याम् - नड् + भ्याम् - **नड्भ्याम्**।

### क्विन्प्रत्ययविधायकं विधिसूत्रम्-

**स्पृशोऽनुदके क्विन् ३ । २ । ५८**

**अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्/घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम् स्पृक्। षडगकाः प्राग्वत्।**

(अनुदके, सुपि, स्पृशः, क्विन्)

**सरलार्थः-**उदकभिन्ने सुबन्ते उपपदे स्पृश्धातोः क्विन् प्रत्ययो भवति।

घृतं स्पृशतीति विग्रहे क्विन्प्रत्यये, उपपदसमासे, सुब्लुक्। घृतस्पृश्शब्दात् सौ हल्ङ्यादिलोपे "क्विन्प्रत्ययस्य कुः" इति कुत्वस्यासिद्धत्वात् पूर्वं 'व्रश्च-' इति षत्वे, तस्य जश्त्वेन डः, ततः कुत्वेन गः तस्य चर्त्वविकल्पेन कादेशे **घृतस्पृक्/घृतस्पृग्** इति रूपद्वयं सिद्धम्।

"क्विन्प्रत्यस्य कुः" इत्यत्र क्विन् प्रत्ययो यस्मादिति बहुव्रीहिसमासाश्रयणेन यस्मात् क्विन् प्रत्ययो भवति तस्माद्धातोः क्विपि अपि कुत्वम् भवतीति व्याख्याने केवलस्य स्पृश्शब्दस्यापि (क्विबन्तस्यापि) कुत्वम् भवति, तेन **स्पृक्/स्पृग्**। **स्पृशौ**। **स्पृशः**। इत्यादीनि रूपाणि जायन्ते।

| महच्छब्दस्य रूपावली | | | धीमच्छब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| महान् | महान्तौ | महान्तः | धीमान् | धीमन्तौ | धीमन्तः |
| महान्तम् | महान्तौ | महतः | धीमन्तम् | धीमन्तौ | धीमतः |
| महता | महद्भ्याम् | महद्भिः | धीमता | धीमद्भ्याम् | धीमद्भिः |
| महते | महद्भ्याम् | महद्भ्यः | धीमते | धीमद्भ्याम् | धीमद्भ्यः |
| महतः | महद्भ्याम् | महद्भ्यः | धीमतः | धीमद्भ्याम् | धीमद्भ्यः |
| महतः | महतोः | महताम् | धीमतः | धीमतोः | धीमताम् |
| महति | महतोः | महत्सु | धीमति | धीमतोः | धीमत्सु |
| हे महन्! | हे महान्तौ! | हे महान्तः! | हे धीमन्! | हे धीमन्तौ! | हे धीमन्तः! |

| तादृश्शब्दस्य रूपावली | | | भवत्शब्दस्य (शत्रन्तस्य) रूपावली | | |
|---|---|---|---|---|---|
| तादृक्-ग् | तादृशौ | तादृशः | भवन् | भवन्तौ | भवन्तः |
| तादृशम् | तादृशौ | तादृशः | भवन्तम् | भवन्तौ | भवतः |
| तादृशा | तादृग्भ्याम् | तादृग्भिः | भवता | भवद्भ्याम् | भवद्भिः |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः | भवते | भवद्भ्याम् | भवद्भ्यः |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः | भवतः | भवद्भ्याम् | भवद्भ्यः |
| तादृशः | तादृशोः | तादृशाम् | भवतः | भवतोः | भवताम् |
| तादृशि | तादृशोः | तादृक्षु | भवति | भवतोः | भवत्सु |
| हे तादृक्-ग् ! | हे तादृशौ ! | हे तादृशः ! | हे भवन् ! | हे भवन्तौ ! | हे भवन्तः ! |

## रूपसाधनप्रकारः

### धीमान्

"धीमत्"शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे परं नित्यमपि नुमं बाधित्वा "अत्वसन्तस्य चाधातोः" इति सूत्रेण उपधादीर्घे धीमात् + स् इति जाते "उगिदचां सर्वनामस्थानेऽधातोः" इति सूत्रेण नुमि अनुबन्धलोपे धीमान्त् + स् इति जाते सकारस्य "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इत्यनेन लोपे "संयोगान्तस्य लोपः" इति सूत्रेण तकारस्य लोपे धीमान् इति जाते "न लोपः प्रातिपदिकान्तस्य" इति सूत्रदृष्ट्या संयोगान्तलोपस्य परत्रिपादीत्वेन असिद्धत्वाद् अत्र नलोपः न प्राप्नोति अतः धीमान् इति रूपं सिद्धम् ।

### घृतस्पृक्/घृतस्पृग्

घृतं स्पृशतीति विग्रहे द्वितीयान्ताद् घृतोपपदात् स्पृश्धातोः "स्पृशोऽनुदके क्विन्" इति सूत्रेण क्विन्प्रत्यये अनुबन्धलोपे घृत अम् स्पृश् + व् इति जाते "वेरपृक्तस्य" इति सूत्रेण वकारस्यापि लोपे "उपपदमतिङ्" इति सूत्रेण समासे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि घृतस्पृश् इत्यस्मात् सुविभक्तौ अनुबन्धलोपे सकारस्य "हल्ङयाब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण लोपे "व्रश्च-" इति सूत्रेण शकारस्य षत्वे "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे डकारे "क्विन्प्रत्ययस्य कुः" इत्यनेन कुत्वेन गकारे "वावसाने" इति सूत्रेण विकल्पेन चर्त्वे घृतस्पृक् इति रूपं चर्त्वाभावपक्षे घृतस्पृग् इति च रूपद्वयं सिद्धम् ।

**भवान्**

भवत्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सौ अनुबन्धलोपे भवत् + स् इति जाते डवतुप्रत्ययान्तस्यास्य "भवत्"शब्दस्य अत्वन्तत्वात् "अत्वसन्तस्य चाधातोः" इत्यनेन उपधादीर्घे भवात् + स् इति जाते "उगिदचां सर्वनामस्थानेऽधातोः" इति सूत्रेण नुमि अनुबन्धलोपे भवान्त् + स् इति जाते सकारस्य हल्ङ्यादिलोपे तकारस्य संयोगान्तलोपे भवान् इति रूपं सिद्धम् । शत्रन्तस्य भवत्शब्दस्य तु अत्वन्तत्वाभावान्न दीर्घः तेन भवन् इत्येव रूपं भवतीति ज्ञेयम् ।

## अभ्यासः

### १. निम्नाङ्कितानां सूत्राणां सरलार्थं लिखत

(क) अत्वसन्तस्य चाधातोः ।

(ख) उभे अभ्यस्तम् ।

(ग) जक्षित्यादयः षट् ।

(घ) त्यदादिषु दृशोऽनालोचने कञ्च ।

(ङ) स्पृशोऽनुदके क्विन् ।

### २. अधोलिखितानां प्रश्नानामुत्तराणि लिखित

(क) "महत्"शब्दस्य कस्यामवस्थायां दीर्घो भवति ?

(ख) 'उगिदचां-" इत्यत्र अज्ग्रहणस्य प्रयोजनं किम् ?

(ग) 'नाभ्यस्ताच्छतुः" इति सूत्रं केन प्राप्तं नुमं निषेधति ?

(घ) विट्/विड् इत्यत्र कुत्वाभावे कारणं किमस्ति ?

(ङ) उपपदसमासविधायकं सूत्रं किमस्ति ?

(च) उगिदचामिति सूत्रेऽ धातोरित्यस्य प्रयोजनं विलिखत ।

## ३. युक्तकथनेषु ✓ इति चिह्नं तथाऽयुक्तकथनेषु × इति चिह्नं योजयत

(क) 'व्रश्च-' इत्यनेन पदान्ते शकारस्य षत्वम् भवति ।

(ख) "क्विन्प्रत्ययस्य कुः" इत्यनेन क्विप्प्रत्यये कुत्वं भवति ।

(ग) 'चोःकुः' इत्यनेन पदान्ते चवर्गस्य कवर्गादेशो विधीयते ।

(घ) "अत्वसन्तस्य-" इत्यत्र अत्वन्त इत्यनेन "अत्" अन्त्यत्वे सति उकारेत्संज्ञकप्रत्ययान्तस्य ग्रहणं भवति ।

(ङ) भ्यामादिहलादौ विभक्तौ पदान्तत्वप्रयुक्तं जश्त्वं न भवति ।

## ४. परस्परं मेलयत

| **(अ)** | **(आ)** |
|---|---|
| नशेर्वा | दीर्घः । |
| आ सर्वनाम्नः | अभ्यस्तसंज्ञा |
| जक्षित्यादयः षट् | कुत्वम् । |
| सान्तमहतः संयोगस्य | आकारान्तादेशः । |

हलन्तपुँल्लिङ्गप्रकरणे

# षकारान्तशब्दानां रूपसिद्धिप्रक्रिया

**'ञिधृषा प्रागल्भ्ये', अस्माद् 'ऋत्विग्-' आदिना क्विन् । द्वित्वमन्तोदात्तत्वं च निपात्यते । कुत्वात्पूर्वं जश्त्वेन डः, गः, कः । धृष्णोतीति दधृक्/दधृग् । दधृषौ । दधृषः । दधृग्भ्यामित्यादि ।**

दधृष् + सु - दधृष् + स् - दधृष् - दधृड् - दधृग् - **दधृक्/दधृग्** । दधृष् + औ - **दधृषौ** । दधृष् + जस् - दधृष् + अस् - दधृषस् - दधषरु - दधृषर् - **दधृषः** । दधृष् + भ्याम् - दधृड् + भ्याम् - दधृग् + भ्याम् - **दधृग्भ्याम्** ।

**रत्नाति मुष्णातीति - रत्नमुट् /रत्नमुड् । रत्नमुषौ । रत्नमुषः ।**

रत्नमुष्शब्दः क्विप्प्रत्ययान्तः ।

**'षड्भ्यो लुक्' इति जश्शसोर्लुक् - षट् /षड् । षड्भिः । षड्भ्यः । 'षट्चतुर्भ्यश्च' इति नुट् । 'अनाम्' इति पर्युदासान्न ष्टुत्वनिषेधः 'यरोऽनुनासिके-' इति विकल्पं बाधित्वा 'प्रत्यये भाषायां नित्यम्' इति वचनान्नित्यमनुनासिकः । षण्णाम् । षट्त्सु/षट्सु । तदन्तविधिः, परमषट् । परमषण्णाम् । गौणत्वे - प्रियषषः । प्रियषषाम् । रुत्वं प्रति षत्वस्यासिद्धत्वात् "ससजुषो रुः" इति रुत्वम् ।**

**षष्शब्दो बहुत्वसंख्याया वाचकस्तेन बहुवचने एवास्य प्रयोगः ।**

षष् + जस् - षष् + अस् - षष् - षड् - **षट्/षड्** ।

षष् + शस् - षष् + अस् - षष् - षड् - **षट्/षड्** ।

षष् + भिस् - षड् + भिस् - षड्भिरु - षड्भिर् - **षड्भिः** ।

षष् + आम् - षष् + न् (नुट्) आम् - षष् + नाम् - षड् + नाम् - षड् + णाम् (ष्टुत्वम्) - **षण्णाम्** (अनुनासिकादेशः) । षष् + सुप् - षष् + सु - षड् + सु - षड् + ध् (धुडागमः) सु + षड् + त्सु - **षट्त्सु** । धुडागमाभावे - **षट्सु** । प्रियाः षड् यस्येति बहुव्रीहौ प्रियषष्शब्दस्य तु एकद्विवहुवचने प्रयोगो भवत्येव । अस्य षट्संज्ञाभावाद् जश्शसोर्लुक् नुडागमश्च न भवतः । प्रियषष् + सु - प्रियषष् + स् - प्रियषष् - प्रियषष् - प्रियषड् - **प्रियषट्/प्रियषड्** । प्रियषष् + औ - **प्रियषषौ** । प्रियषष् + जस् - प्रियषष् + अस् - प्रियषषस् - प्रियषषरु - प्रियषषर् - **प्रियषषः** । प्रियषष् + आम् - **प्रियषषाम्** । रुत्वं प्रति षत्वस्यासिद्धत्वात् "ससजुषो रुः" इति रुत्वम् ।

### दीर्घादेशविधायकं विधिसूत्रम्-

**र्वोरुपधाया दीर्घ इकः ८ । २ । ७६**

**रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्पदान्ते । पिपठीः । पिपठिषौ । पिपठिषः । पिपठीर्भ्याम् । 'वा शरि' इति वा विसर्जनीयः ।**

(र्वोः, धातोः, उपधायाः, इकः, दीर्घः, पदान्ते )

**सरलार्थः–** रेफान्तस्य वकारान्तस्य च धातोः उपधायाः दीर्घो भवति पदान्ते ।

पठितुमिच्छति इत्यर्थे पठ्धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सन्प्रत्यये "सन्यङोः" इति द्वित्वे हलादिशेषे "सन्यतः" इति अभ्यासस्य अकारस्य इत्वे सनः इडागमे पिपठिस इति जाते "आदेशप्रत्यययोः" इति षत्वे "सनाद्यन्ताः" इति धातुत्वे पिपठिष इत्यस्मात् क्विपि "अतो लोपः" पिपठिष् इति षकारान्तं प्रातिपदिकं, ततः सौ तस्य अनुबन्धलोपे कृते "ससजुषो रुः" इति सूत्रं प्रति "आदेशप्रत्यययोः" इत्यस्य असिद्धत्वात् सकारस्य रुत्वविसर्गौ ।

पिपठिष् + सु - पिपठिष् + स् - पिपठिष् - पिपठिरु - पिपठिर् - पिपठीर् - **पिपठीः** । पिपठिष् + औ - **पिपठिषौ** । पिपठिष् + भ्याम् - पिपठिरु + भ्याम् - पिपठिर् + भ्याम् - पिपठीर् + भ्याम् - **पिपठीर्भ्याम्** ।

सुपि पदसंज्ञायां रुत्वे विसर्गे च कृते 'विसर्जनीयस्य सः' इति सत्वे प्राप्ते- "वा शरि" इति वा विसर्जनीयः ।

### मूर्धन्यादेशविधायकं विधिसूत्रम्-

**नुम्विसर्जनीयशर्व्यवायेऽपि ८ । ३ । ५८**

**एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात् ।**

**ष्टुत्वेन पूर्वस्य षत्वम् । पिपठीष्षु/पिपठीःषु । 'प्रत्येकम्' इति व्याख्यानादनेकव्यवधाने षत्वं न, निंस्स्व । निंस्से । नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं व्याख्यानात् । तेनेह न, सुहिन्सु । पुंसु । अत एव न शर्ग्रहणेन गतार्थता ।**

(इण्कोः, सः, मूर्धन्यः, नुम्विसर्जनीयशर्व्यवाये, अपि)

**सरलार्थः–** इण्कुभ्यां परस्य सकारस्य स्थाने मूर्धन्यादेशो भवति नुमा, विसर्गेण, शरा च व्यवधानेऽपि ।

पिपठिष् + सुप् - पिपठिष् + सु - पिपठिर् + सु - पिपठिरु + सु - पिपठीर् + सु - पिपठीः + सु - **पिपठीःषु** ।
सत्वादेशपक्षे पिपठिष् + सुप् - पिपठिष् + सु - पिपठिरु + सु - पिपठीर् + सु - पिपठिर् + सु - पिपठीः + सु - पिपठीः + षु - पिपठीस् + षु - पिपठीस् + षु - **पिपठीष्षु** ।

प्रत्येकमिति ग्रहणाद् नुम्विसर्जनीयशर्षु एकस्य व्यवधाने एव षत्वम् न तु द्वयोर्बहूनां वा तेन 'निंस्स्व' इत्यत्र अनुस्वारस्य सकारस्य च व्यवधाने अन्त्यस्य सकारस्य न षत्वम्, तथैव निंस्से इत्यत्रापि । अत्र नुमा नुम्स्थानिकस्य अनुस्वारस्य ग्रहणं भवति, तेन सुहिन्सु इत्यत्र नुमा व्यवधानेऽपि षत्वं न । एवमेव पुंसु इत्यत्र अनुस्वारे

सत्यपि तस्य नुम्स्थानिकत्वाभावात् ततः परे च षत्वं न भवति । अत एव अयोगवाहानाम् (अनुस्वारादीनाम्) शर्प्रत्याहारेऽन्तर्भावेऽपि अत्र शर्ग्रहणेन अनुस्वारस्य गतार्थता न भवतीत्यपि बोध्यम् ।

**"रात्सस्य" इति सलोपे विसर्गः, चिकीः । चिकीर्षौ । चिकीर्षः । "रोः सुपि" इति नियमान्न विसर्गः, चिकीर्षु ।**

चिकीर्ष् इति सन्नन्तः शब्दः तस्मात् सौ हल्ङ्यादिलोपे षत्वस्य संयोगान्तलोपं प्रति असिद्धत्वाद् "रात्सस्य" इति नियमेन संयोगान्तस्य सकारस्य लोपे रेफस्य विसर्गे **चिकीः** इति रूपम् ।

चिकीर्ष् + सु - चिकीर्ष् + स् - चिकीर्ष् - चिकीर् - **चिकीः** । चिकीर्ष् + औ - **चिकीर्षौ** ।

चिकीर्ष् + भ्याम् - चिकीर् + भ्याम् - **चिकीर्भ्याम्** ।

चिकीर्ष् + सुप् - चिकीर्ष् + सु - चिकीर् + सु - **चिकीर्षु** ।

'रोः सुपि' सुपि परे रुस्थानिकस्यैव रेफस्य विसर्गो भवतीति नियम्यते तेनात्र खरि परे रेफस्य विसर्गो न भवतीति भावः ।

**"दमेर्डोस्" डित्त्वसामर्थ्याट्टिलोपः । षत्वस्यासिद्धत्वाद्रुत्वविसर्गौ । दोः । दोषौ । दोषः । 'पद्दन्नो-' इति वा दोषन् । दोष्णः/दोषः । दोष्णा । दोर्भ्याम् इत्यादि ।**

दम्धातोः डोस्प्रत्यये टिलोपे षत्वे दोष्शब्दात् सौ हल्ङ्यादिलोपे रुत्वं प्रति षत्वस्याद्धित्वाद् रुत्वे विसर्गे **दो**रिति रूपम् । शसादौ विकल्पेन दोषन्-आदेशे अल्लोपे णत्वे च **दोष्णः** इत्यादिरूपाणि ।

**'विश प्रवेशने' । सन्नन्तात् क्विप् । कत्वस्यासिद्धत्वात्संयोगान्तलोपः । "व्रश्च-" इति षः । जश्त्वचर्त्वे । विविट्/विविड् । विविक्षौ । विविक्षः ।**

विश्धातोः सनि द्वित्वादिकार्ये वि विश् + स इत्यत्र 'व्रश्च-' इति षत्वे 'षढोः कः सि' इति कादेशे विविक् + स इत्यत्र 'आदेशप्रत्यययोः' इति षत्वे, क्षत्वे, 'सनाद्यन्ताः-' इति धातुत्वे क्विपि तस्य सर्वापहारिलोपे अतो लोपे विविक्ष् इत्यस्मात् सौ तस्य हल्ङ्यादिलोपे "स्कोः-" इति कलोपे कर्तव्ये कादेशस्य असिद्धत्वात् 'संयोगान्तस्य लोपः' इति षकारस्य लोपे, संयोगान्तलोपे सति सकारस्य निमित्तस्य निवृत्त्या कत्वस्यापि निवृत्तौ, झल्परकत्वनिवृत्त्या पूर्वप्रवृत्तषत्वस्यापि निवृत्तौ, पदान्तत्वाद् 'व्रश्च-' इति शस्य षकारे, जश्त्वेन डकारे ततः चर्त्वेन वैकल्पिकः टकार इत्यर्थः ।

विविक्ष् + सु - विविक्ष् + स् - विविक्ष् - विविश् - विविष् - विविड् - **विविट् /विविड्** ।

**"स्कोः-" इति कलोपः । तट्/तड् । तक्षौ । तक्षः ।**

अत्र तु तक्ष्धातोः पदान्ते स्कोरिति कलोप एवेति भावः । तक्ष् + सु - तक्ष् + स् - तक्ष् - तष् - तड् - **तट्/तड्** ।

**गोरट्/गौरड्। गोरक्षौ। गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु "स्कोः" इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात्। "पूर्वत्रासिद्धे न स्थानिवत्" (वा) इति त्विह नास्ति "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" (वा) इति निषेधात्। तस्मात् संयोगान्तलोप एव। तक्/तग्। गोरक्/गोरग्। "स्कोः-" इति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तलोपः। पिपक्/पिपग्। एवं विवक्। दिधक्।**

| पिपठिष्शब्दस्य रूपावली | | | चिकीर्ष्शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| पिपठीः | पिपठिषौ | पिपठिषः | चिकीः | चिकीर्षौ | चिकीर्षः |
| पिपठिषम् | पिपठिषौ | पिपठिषः | चिकीर्षम् | चिकीर्षौ | चिकीर्षः |
| पिपठिषा | पिपठीर्भ्याम् | पिपठीर्भिः | चिकीर्षा | चिकीर्भ्याम् | चिकीर्भिः |
| पिपठिषे | पिपठीर्भ्याम् | पिपठीर्भ्यः | चिकीर्षे | चिकीर्भ्याम् | चिकीर्भ्यः |
| पिपठिषः | पिपठीर्भ्याम् | पिपठीर्भ्यः | चिकीर्षः | चिकीर्भ्याम् | चिकीर्भ्यः |
| पिपठिषः | पिपठिषोः | पिपठिषाम् | चिकीर्षः | चिकीर्षोः | चिकीर्षाम् |
| पिपठिषि | पिपठिषोः | पिपठीःषु/पिपठीष्षु | चिकीर्षि | चिकीर्षोः | चिकीर्षु |
| हे पिपठीः ! | हे पिपठिषौ ! | हे पिपठिषः ! | हे चिकीः ! | हे चिकीर्षौ ! | हे चिकीर्षः ! |

## रूपसाधनप्रकारः

### पिपठीः

पिपठिष्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे सकारस्य "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इत्यनेन लोपे पिपठिष् इति जाते रुत्वं प्रति षत्वस्यासिद्धत्वात् "ससजुषो रुः" इति सूत्रेण रुत्वेऽनुबन्धलोपे "र्वोरुपधाया दीर्घ इकः" इत्यनेन दीर्घे रेफस्य विसर्गे पिपठीः इति रूपं सिद्धम्।

### पिपक्/पिपग्

पिपक्ष् शब्दस्य "कृत्तद्धितसमासाच्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एवकचने सौ अनुबन्धलोपे हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण सकारस्य लोपे पिपक्ष् इति जाते "स्कोः संयोगाद्योरन्ते च" इति सूत्रं प्रति "चोःकुः" इति कुत्वस्यासिद्धत्वात् "संयोगान्तस्य लोपः" इत्यनेन अन्त्यस्य षकारस्य लोपे पिपक् इति जाते "झलां जशोऽन्ते" इत्यनेन जश्त्वेन गकारे तस्य "वावसाने" इति सूत्रेण विकल्पेन चर्त्वे पिपक् इति चर्त्वाभावे पिपग् इति च रूपद्वयं सिद्धम्।

**षण्णाम्**

षष्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ "ष्णान्ता षट्" इति सूत्रेण षट्संज्ञायां "षट्चतुर्भ्यश्च" इति सूत्रेण नुडागमे अनुबन्धलोपे षष् + नाम् इति जाते पदसंज्ञायां "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे षड् + नाम् इति जाते "ष्टुना ष्टुः" इति सूत्रेण ष्टुत्वे षड् + णाम् इति जाते "प्रत्यये भाषायां नित्यम्" इति वार्तिकेन अनुनासिके षण्णाम् इति रूपं सिद्धम् ।

## अभ्यासः

### १. निम्नाङ्कितानां सूत्राणां सरलार्थं लिखत -

(क) स्कोः संयोगाद्योरन्ते च ।

(ख) झलां जशोऽन्ते ।

(ग) ससजुषो रुः ।

(घ) संयोगान्तस्य लोपः ।

(ङ) र्वोरुपधाया दीर्घ इकः ।

### २. अधोलिखितानां प्रश्नानामुत्तराणि लिखत -

(क) क्विन्प्रत्ययान्तस्य केन सूत्रेण कुत्वं भवति ?

(ख) पिपठिष्शब्दस्य पदान्ते विधीयमानं रुत्वं प्रति षत्वस्य असिद्धत्वे कारणं किम् ?

(ग) "चिकीः" इत्यत्र षकारस्य लोपः केन सूत्रेण भवति ?

(घ) "रात्सस्य" इत्यनेन कीदृशो नियमः ?

(ङ) 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रे नुम् पदेन किं गृह्यते ?

(च) 'रोः सुपि' इत्यनेन कीदृशो नियमः ?

## ३. उपयुक्ते (✓) चिह्नम् अनुपयुक्ते (X) चिह्नं योजयत

(क) 'षण्णाम्' इत्यत्र "स्वादिष्वसर्वनामस्थाने" इति पदसंज्ञा भवति ।

(ख) षकारस्य जश्त्वेन डकारादेशो भवति ।

(ग) "चिकीर्भ्याम्" इत्यत्र पदान्तत्वाभावाद् विसर्गाभावः ।

(घ) 'षट्चतुर्भ्यश्च" इत्यनेन गौणेऽपि नुडागमो विधीयते ।

(ङ) पिपठिष्शब्दस्य प्रथमाया एकवचने पिपठिः इति रूपं भवति ।

## ४. अधःप्रदत्तानां शब्दानां ससूत्रं रूपसाधनप्रकारो दर्शनीयः

षट् । पिपठीर्भ्याम् । दोष्णा । चिकीर्षु । गोरक्षौ ।

## ५. परस्परं मेलयत

| (अ) | (आ) |
|---|---|
| चर् | ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् । |
| जश् | झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् ह् । |
| झल् | च् ट् त् क् प् श् ष् स् । |
| खर् | ज् ब् ग् ड् द् । |

## हलन्तपुँल्लिङ्गप्रकरणे

# सकारान्तशब्दानां रूपसिद्धिप्रक्रिया

**'पिस गतौ' सुष्ठु पेसतीति सुपीः । सुपिसौ । सुपिसः । सुपिसा । सुपीर्भ्याम् । सुपीःषु/सुपीष्षु । एवं सुतूः । 'तुस खण्डने'** ।

सुपिस् + सु - सुपिस् + स् - सुपिस् - सुपिरु - सुपिर् - सुपीर् - **सुपीः** । सुष्ठु तोसतीति सुतूः ।

**विद्वान्** । **विद्वांसौ** । **विद्वांसः** । **हे विद्वन्** ! **विद्वांसम्** । **विद्वांसौ** ।

वेत्तीति विद्वान् । विद्वस् + सु - विद्वन्स् + स् - विद्वन्स् (नुम्) + स् - विद्वन्स् + स् - विद्वान्स् - **विद्वान्** ।

विद्वस् + औ - विद्वस् + औ - विद्वन्स् + औ - **विद्वांसौ** ।

विद्वस् + सु - विद्वस् + स् - विद्वन्स् + स् - विद्वन्स् - विद्वन् - **हे विद्वन्** !

### सम्प्रसारणादेशविधायकं विधिसूत्रम्-

**वसोः सम्प्रसारणम् ६ । ४ । १३१**

**वस्वन्तस्य भस्य सम्प्रसारणं स्यात्** । **पूर्वरूपं षत्वम्** । **विदुषः** । **विदुषा** । **'वसुस्रंसु-" इति दत्वम्** । **विद्वद्भ्याम् इत्यादि** । **सेदिवान्** । **सेदिवांसौ** । **सेदिवांसः** । **सेदिवांसम्** । **अन्तरङ्गोऽपीडागमः सम्प्रसारणविषये न प्रवर्तते "अकृतव्यूहाः-" इति परिभाषया** । **सेदुषः** । **सेदुषा** । **सेदिवद्भ्याम् इत्यादि** । **"सान्तमहतः संयोगस्य" इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते न तु धातोः महच्छब्दसाहचर्यात्** । **सुष्ठु हिनस्तीति सुहिन्** । **सुहिन्सौ** । **सुहिन्सः** । **सुहिन्भ्याम् इत्यादि** । **सुहिन्त्सु/सुहिन्सु** । **ध्वत्/ध्वद्** । **ध्वसौ** । **ध्वसः** । **ध्वद्भ्याम्** । **एवं स्रत्** ।

(वसोः भस्य सम्प्रसारणम्)

**सरलार्थः-** वसुप्रत्ययान्तस्य भसंज्ञकस्याङ्गस्य सम्प्रसारणादेशो भवति । 'संप्रसारणाच्च' इति पूर्वरूपे "आदेशप्रत्यययोः' इति षत्वम् ।

विद्वस् + शस् - विद्वस् + अस् - विद् उ अस् + अस् - विद् उ स् + अस् - विदुष् + अस् - विदुषस् - विदुषरु - **विदुषः** । विद्वस् + भ्याम् - विद्वद् + भ्याम् - **विद्वद्भ्याम्** ।

सेदिवस् + सु - सेदिवस् + स् - सेदिवन्स् (नुम्) + स् - सेदिवान्स् + स् - सेदिवान्स् - **सेदिवान्**। सेदिवस्शब्दे वकारं निमित्तमादाय इडागमो भवति, सम्प्रसारणभाविस्थले सम्प्रसारणेन इडागमनिमित्तस्य वकारस्य विघातसंभवेन इडागमः पूर्वमेव न विधीयते इति 'अकृतव्यूह-' परिभाषाया भावो विद्यते। तेन शसाद्यजादौ विभक्तौ सेद्वस् इत्यस्मादेव रूपसिद्धिप्रक्रिया प्रारभ्यते। सेद्वस् + शस् - सेद्वस् + अस् - सेद् उ अस् + अस् - सेद् उ स् + अस् - सेदुष् + अस् - सेदुषरु - सेदुषर् - **सेदुषः**। सेदिवस् + भ्याम् - सेदिवद् + भ्याम् - **सेदिवद्भ्याम्**।

'सान्तमहतः -' इत्यत्र सान्तसंयोगः प्रातिपदिकस्येति गृह्यते तेन हिन्स् धातोर्निष्पन्ने सुहिन्स्शब्दे धात्वंशस्यैव सान्तसंयोगत्वेन न तेन सूत्रेण दीर्घ इत्यर्थः।

सुहिन्स् + सु - सुहिन्स् + स् - सुहिन्स् - **सुहिन्**।

सुहिन्स् + भ्याम् - सुहिन् + भ्याम् (संयोगान्तलोपः) - **सुहिन्भ्याम्**।

सुहिन्स् + सुप् - सुहिन्स् + सु - सुहिन् + सु - सुहिन् + ध् (धुट्) सु - सुहिन् + त्सु - **सुहिन्त्सु**।

'नश्च' इति विकल्पेन धुडागमाभावे **सुहिन्सु**।

ध्वस् + सु - ध्वस् + स् - ध्वस् - ध्वद् - **ध्वत्/ध्वद्** ("वसुस्रंसुध्वंस्वनडुहां दः")।

### असुङादेशविधायकं विधिसूत्रम्-

**पुंसोऽसुङ् ७। १। ८९**

**सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। असुङ उकार उच्चारणार्थः। 'बहुपुंसी' इत्यत्र 'उगितश्च' इति ङीबर्थं कृतेन "पूञो डुंसुन्' इति प्रत्ययस्योगित्त्वेनैव नुम्सिद्धेः। पुमान्। हे पुमन्! पुमांसौ। पुमांसः। पुंसः। पुंसा। पुम्भ्याम्। पुम्भिः इत्यादि पुंसि। पुंसु।**

(पुंसः, असुङ्, सर्वनामस्थाने)

**सरलार्थः–** सर्वनामस्थाने विभक्तौ विवक्षिते पुंस्शब्दस्यान्त्यस्य असुङादेशो भवति। अत्र उकार उच्चारणार्थः न तु इत्संज्ञकः फलाभावात्। उदित्त्वेन नुम्तु पूञ्धातोः कृतेन डुंसुन्प्रत्ययेनैव सिद्धेरिति भावः।

पुंस् + स् - पुंस् + स् - पुम् अस् (असुङ्) + स् - पुमन्स् (नुम्) + स् - पुमान्स् + स् - पुमान्स् - **पुमान्**। अत्र सकारस्थाने असुङादेशे निमित्तापाये नैमित्तिकस्याप्यपाय इति नियमेन अनुस्वारस्य मकारेणावस्थानम्। 'सान्तमहतः संयोगस्य' इति दीर्घः।

पुंस् + भ्याम् - पुम् + भ्याम् - **पुम्भ्याम्**।

**'ऋदुशनस्-" इत्यनङ्। उशना। उशनसौ। उशनसः।**

उशनस् + सु - उशनस् + स् - उशनन् + स् - उशनान् + स् - उशनान् - **उशना** । "सर्वनामस्थाने-" इति दीर्घः, हल्ङ्यादिलोपः, नलोपश्च ।

**"अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः" (वा) हे उशनन्/हे उशन/हे उशनः ! उशनोभ्याम्, इत्यादि ।**

अनेन विभाषया अनङादेशे नलोपे च, हे उशन ! इति रूपम् । नलोपाभावपक्षे **हे उशनन्** । इति रूपम् । अनङादेशाभावपक्षे हल्ङ्यादिलोपे सकारस्य रुत्वे विसर्गे च **हे उशनः !** इति रूपम् ।

उशनस् + भ्याम् - उशनरु + भ्याम् - उशनर् - भ्याम् - उशनउ + भ्याम् - **उशनोभ्याम्** । पदसंज्ञायां रुत्वे रेफस्य हशि चेति उत्वे आद् गुण इति गुणः ।

**अनेहा** । **अनेहसौ** । **अनेहसः** । **हे अनेहः** । **अनेहोभ्याम् इत्यादि** ।

अनेहस् + सु - अनेहस् + स् - अनेहन् + स् (अनङादेशः) - अनेहान् स् - अनेहान् - **अनेहा** ।

'ऋदुशनस्-" इति अनङादेशः, 'सर्वनामस्थाने-' इति दीर्घः ।

**वेधाः** । **वेधसौ** । **वेधसः** । **हे वेधः !** **वेधोभ्याम्, इत्यादि** ।

वेधस् + सु - वेधस् + स् - वेधास् + स् - वेधारु-वेधार्-**वेधाः** । "अत्वसन्तस्य-" इति दीर्घः ।

"अत्वसन्तस्य-" इत्यत्र **अधातोरित्युक्तेर्न दीर्घः** । **सुष्ठु वस्ते - सुवः** । **सुवसौ** । **सुवसः** ।

सुवस् + सु - सुवस् + स् - सुवस् - सुवरु - सुवर् - **सुवः** ।

**पिण्डं ग्रसते-पिण्डग्रः** । **पिण्डग्लः** । **'ग्रसु ग्लसु-अदने'** ।

पिण्डग्रस् + सु - पिण्डग्रस् + स् - पिण्डग्रस् - पिण्डग्ररु - पिण्डग्रर् - **पिण्डग्रः** । पिण्डग्लस् + सु - पिण्डग्लस् + स् - पिण्डग्लस् - पिण्डग्लरु - पिण्डग्लर् - **पिण्डग्लः** ।

### औकारान्तादेशविधायकं विधिसूत्रम्-

**अदस औ सुलोपश्च ७ । २ । १०७**

**अदस औकारोऽन्तादेशः स्यात्सौ परे सुलोपश्च । "तदोःसः सौ-" इति दस्य सः । असौ ।**

(अदसः, औ, सुलोपः, च)

**सरलार्थः–** अदस्शब्दस्य स्थाने औकारान्तादेशो भवति, सुप्रत्यये परे, सुप्रत्ययस्य लोपश्च ।

अदस् + सु - अदस् + स् - अद औ (सकारस्य औ, सुलोपश्च) - **अदौ** - **असौ** ।

**“औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च”** (वा) **प्रतिषेधसंनियोगशिष्टमुत्वं तदभावे न प्रवर्तते। असकौ। असुकः।**

अकच्प्रत्यययुक्तस्य अदकस्शब्दस्य औदादेशो विकल्पेन प्रतिषिध्यते। प्रतिषेधपक्षे सकारात्परस्य उकारादेशश्च भवति।

अदकस् + सु - अदकस् + स् - असकस् + स् - असुकस् + स् - असुकस् - असुकरु - असुकर् - **असुकः**। औदादेशस्य निषेधाभावपक्षे -

अदकस् + सु - अदकस् + स् - अदक औ - अदकौ - **असकौ**।

**त्यदाद्यत्वम्, पररूपत्वम्, वृद्धिः। “अदसोऽसेः-” इति मत्वोत्वे। अमू। “जशः शी” “आद्गुणः”।**

अदस् + औ - अद अ + औ - अद + औ - अदौ - **अमू** (दकारस्य मत्वम् औकारस्य ऊत्वम्)।

## ईत्वमत्वविधायकं विधिसूत्रम्-

### एत ईद् बहुवचने ८।२।८१

**अदसो दात्परस्य एत ईत् स्याद् दस्य च मो बह्वर्थोक्तौ। अमी। “पूर्वत्रासिद्धम्” इति विभक्तिकार्यं प्राक्, पश्चादुत्वमत्वे। अमुम्। अमू। अमून्। मुत्वे कृते घिसंज्ञायां नाभावः।**

(अदसः, दात्, एतः, ईत्, दः, मः, बहुवचने)

**सरलार्थः–** अदस्शब्दावयवाद् दकारात् परस्य एकारस्य स्थाने ईकारः, दकारस्य स्थाने मकारश्च भवतः।

अदस् + जस् - अदस् + अस् - अद अ + अस् - अद + अस् - अद + शी - अद + ई - अदे - अमी।

पूर्वत्रासिद्धमित्यत्र शास्त्रस्य = सूत्रस्य असिद्धत्वपक्षः स्वीक्रियते। तेन त्रैपादिकस्य उत्वमत्वादेरपेक्षया पूर्वं शी-आदेशादिविभक्तिकार्येषु कृतेषु पश्चादुत्वमत्वादिकमिति भावः।

अदस् + शस् - अदस् + अस् - अद अ + अस् - अद + अस् - अदास् - अदान् - **अमून्**।

## मुभावस्य असिद्धत्वनिषेधकं सूत्रम्-

### न मु ने ८।२।३

**नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्। अमुना। अमूभ्याम्। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः। अमीषाम्। अमुष्मिन्। अमुयोः। अमीषु।**

(मु, ने, पूर्वत्र, असिद्धम्, न)

**सरलार्थः-** नाभावस्य कर्तव्ये, नाभावे कृते च उत्वमत्वे असिद्धे न भवतः।

'न मु ने' इति सूत्रारम्भसामर्थ्याद् इनादेशात् प्राक् उत्वमत्वे घिसंज्ञायां नाभाव इति भावः। अन्यत्र तु विभक्त्यादेशेषु कृतेषु उत्वमत्वादिकम्

अदस् + टा - अदस् + आ - अद अ + आ - अद + आ - अमु + आ - **अमुना**।

अदस् + भ्याम् - अद अ + भ्याम् - अद + भ्याम् - अदा + भ्याम् - **अमूभ्याम्**।

अदस् + भिस् - अद अ + भिस् - अद + भिस् - अदे + भिस् - अमीभिस् - अमीभिरु - दअमीभिर् - **अमीभिः**। अदस् + ङे - अदस् + ए - अद अ + ए - अद + ए - अद + स्मै - अमु + स्मै - **अमुष्मै**।

अदस् + ओस् - अद अ + ओस् - अद + ओस् - अदे + ओस - अदयोस् - अमुयोस् - अमुयोरु - अमुयोर् - **अमुयोः**। 'अदस् + आम् - अद अ + आम् - अद + आम् - अद + स् (सुट्) आम् - अदे + साम् - अमी + साम् - **अमीषाम्**। अदस् + ङि - अदस् + इ - अद अ + इ - अद + इ - अद + स्मिन् - अमु + स्मिन् - **अमुष्मिन्**। अदस् + सुप् - अदस् + सु - अद अ + सु - अद + सु - अदे + सु - अमी + सु - **अमीषु**।

इति हलन्तपुँल्लिङ्गप्रकरणम्

| विद्वस्शब्दस्य रूपावली | | | पुंस्शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः | पुमान् | पुमांसौ | पुमांसः |
| विद्वांसम् | विद्वांसौ | विदुषः | पुमांसम् | पुमांसौ | पुंसः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः | पुंसा | पुम्भ्याम् | पुम्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः | पुंसे | पुम्भ्याम् | पुम्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः | पुंसः | पुम्भ्याम् | पुम्भ्यः |
| विदुषः | विदुषोः | विदुषाम् | पुंसः | पुंसोः | पुंसाम् |
| विदुषि | विदुषोः | विद्वत्सु | पुंसि | पुंसोः | पुंसु |
| हे विद्वन् ! | हे विद्वांसौ ! | हे विद्वांसः ! | हे पुमन् ! | हे पुमांसौ ! | हे पुमांसः ! |

**अदस्शब्दस्य रूपावली**

| | | |
|---|---|---|
| असौ | अमू | अमी |
| अमुम् | अमू | अमून् |
| अमुना | अमूभ्याम् | अमीभिः |
| अमुष्मै | अमूभ्याम् | अमीभ्यः |
| अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| अमुष्य | अमुयोः | अमीषाम् |
| अमुष्मिन् | अमुयोः | अमीषु |

## रूपसाधनप्रकारः

### विदुषः

विद्वस्-शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ अनुबन्धलोपे विद्वस् + अस् इति जाते "यचि भम्" इति सूत्रेण भसंज्ञायां "वसोः सम्प्रसारणम्" इति सूत्रेण सम्प्रसारणे विद्उ अस् + अस् इति जाते "सम्प्रसारणाच्च" इति पूर्वरूपे विद् उस् + अस् इति जाते वर्णयोगे विदुसस् इति जाते "आदेशप्रत्यययोः" इत्यनेन षत्वे विदुषस् इति स्थिते सकारस्य रुत्वे विसर्गे **विदुषः** इति रुपं सिद्धम् ।

### अमीषाम्

अदस्-शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ अदस् + आम् इति जाते "त्यदादीनामः" इति अत्वे, पररूपे च कृते, "आमि सर्वनाम्नः सुट्" इति सुडागमे अनुबन्धलोपे अद + साम् इत्यत्र "बहुवचने झल्येत्" इति सूत्रेण एत्वे अदे + साम् इत्यत्र "एत ईद् बहुवचने" इति ईत्वे, मत्वे च "आदेशप्रत्यययोः" इत्यनेन षत्वे अमीषाम् इति रूपं सिद्धम् ।

# अभ्यासः

## १. निम्नसूत्राणां सरलार्थं लिखत

(क) वसोः सम्प्रसारणम् ।

(ख) अदस औ सुलोपश्च ।

(ग) एत ईद् बहुवचने ।

(घ) न मु ने ।

(ङ) आदेशप्रत्यययोः ।

## २. अधोलिखितानां प्रश्नानामुत्तराणि लिखत

(क) 'विद्वान्' इत्यत्र केन सूत्रेण दीर्घः ?

(ख) "सान्तमहतः संयोगस्य" इति सूत्रेण सान्तसंयोगस्य धातोर्दीर्घो भवति न वा ?

(ग) "पुंसोऽसुङ्" इत्यनेन कासु विभक्तिषु असुङादेशः ?

(घ) "निमित्तापाये नैमित्तिकस्याप्यपायः" इत्यस्योदाहरणं किमस्ति ?

(ङ) "त्यदादीनामः" इत्यनेन अदसः कस्य वर्णस्य अकारादेशः ?

## ३. परस्परं मेलयत

| **(अ)** | **(आ)** |
|---|---|
| वसोः सम्प्रसारणम् | अमीषाम् । |
| अदस औ सुलोपश्च | पुमांसः । |
| एत ईद् बहुवचने | ध्वत् । |
| पुंसोऽसुङ् | विदुषः । |
| वसुस्रंसुध्वंस्वनडुहां दः | असौ । |

## ४. उपयुक्ते (✓) चिह्नम् अनुपयुक्ते (X) चिह्नं योजयत

(क) उशना इत्यत्र अनङादेशो भवति ।

(ख) 'वेधाः' इत्यत्र "सर्वनामस्थाने चाऽसम्बुद्धौ" इत्यनेन दीर्घः ।

(ग) 'अमुष्मात्' अत्र "आदेशप्रत्यययोः" इति सूत्रेण षत्वम् ।

(घ) "वसोः सम्प्रसारणम्" इत्यत्र वसुरिति धातुर्गृह्यते ।

## ५. ससूत्रं रूपसाधनं कुरुत

सेदुषः । पुम्भ्याम् । उशना । वेधोभ्याम् । अमुष्मिन् ।

अथ हलन्तस्त्रीलिङ्गप्रकरणे

# हलन्तस्त्रीलिङ्गशब्दानां रूपसिद्धिप्रक्रिया

धकारादेशविधायकं विधिसूत्रम्-

**नहो धः ८ । ३ । ३४**

**नहो हस्य धः स्याज्झलि पदान्ते च । उपानत् /उपानद् । उपानहौ । उपानहः । उपानद्भ्याम् । उपानत्सु ।**

(नहः, हः, धः, झलि, पदान्ते, धातोः)

**सरलार्थः–** नह्धातोः अन्त्यस्य हकारस्य धकारादेशो भवति, झलि परे पदान्ते च ।

'हो ढः' इति ढत्वस्यापवादः । उपानह् + सु - उपानह् + स् - उपानह् - उपानध् - उपानद् - **उपानत्/उपानद्** ।

**उत्पूर्वात् 'ष्णिह् प्रीतौ' इत्यस्माद् "ऋत्विग्-" आदिना क्विन् निपातनाद् दलोपषत्वे, क्विन्नन्तत्वात्कुत्वेन हस्य घः, जश्त्वचर्त्वे - उष्णिक्/उष्णिग् । उष्णिहौ । उष्णिहः ! । उष्णिग्भ्याम् । उष्णिक्षु ।**

दलोपषत्वे = उपसर्गदकारस्य लोपः, 'धात्वादेः षः सः' इत्यनेन विहितस्य धातोरादेः सकारस्य षकारादेशश्च इत्यर्थः ।

उष्णिह् + सु - उष्णिह् + स् - उष्णिह् - उष्णिघ् (कुत्वम्) - उष्णिग् - **उष्णिक्/उष्णिग्** ।

उष्णिह् + सुप् - उष्णिह् + सु - उष्णिघ् + सु - उष्णिग् + सु - उष्णिक् + सु - उष्णिक् + षु - **उष्णिक्षु** ।

**द्यौः । दिवौ । दिवः । द्युभ्याम् । द्युषु ।**

दिव् + सु - दिव् + स् - दि औत् + स् - दि औ + स् - द्यौ + स् - द्यौरु - द्योर् - **द्यौः** । "दिव औत्" इति वकारस्य औतादेशः । दिव् + भ्याम् - दि उत् + भ्याम् - दि उ + भ्याम् - **द्युभ्याम्** । "दिव उत्" इति उत् ।

**गीः । गिरौ । गिरः । एवं, पूः ।**

गिर् + सु - गिर् + स् - गिर् - गीर् - **गीः** । र्वोरुपधाया दीर्घः । पुर् + सु - पुर् + स् - पूर् - **पूः** ।

**चतुरश्चतस्रादेशः । चतस्रः । चतस्रः । चतसृणाम् । चतसृषु ।**

"त्रिचतुरोः स्त्रियां तिसृचतसृ" इत्यनेन चतुर्शब्दस्य चतसृ-आदेशः ।

चतुर् + जस् - चतुर् + अस् - चतस्रस् ("अचि र ऋतः" रेफादेशे) - चतस्ररु - चतस्रर् - **चतस्रः**।

चतुर् + आम् - चतसृ + आम् - चतसृ + न् (नुट्) आम् - चतसृ + णाम् - **चतसृणाम्**। 'न तिसृचतसृ' इति दीर्घनिषेधः।

**किमः कादेशे टाप्। का। के। काः। सर्वावत्।**

किम्शब्दात् विभक्तौ परे 'किमः कः' इत्यनेन कादेशे 'अजाद्यतष्टाप्" इति टाप्प्रत्ययेऽनुबन्धलोपे क + आ इत्यत्र सवर्णदीर्घे का इत्यस्मात् सकारस्य "हल्ङ्याब्भ्यो-" इति लोप इत्यर्थः। सर्वत्र विभक्तौ किमः कादेशे ततः टापि सवर्णदीर्घे का इति। अस्य सर्वाशब्दस्येव रूपाणि जायन्ते।

## यकारादेशविधायकं विधिसूत्रम्-

**यः सौ ७।२।११०**

**इदमो दस्य यः स्यात्सौ। "इदमो मः" इयम्। त्यदाद्यत्वम्, टाप् "दश्च" इति मः। इमे। इमाः। इमाम्। इमे। इमाः। अनया। "हलि लोपः" आभ्याम्। आभिः। अस्यै। अस्याः। अनयोः। आसाम्। अस्याम्। अनयोः। आसु।**

(इदमः, यः, सौ, विभक्तौ)

**सरलार्थः-** इदम्शब्दस्य दकारस्य स्थाने यकारादेशो भवति सौ परे।

इदम् सु - इदम् + स् - इयम् + स् (मकारस्य मकारः) सलोपः - **इयम्**। अत्र त्यदाद्यत्वं बाधित्वा मकारस्य मकारादेशः।

इदम् + औ इत्यत्र त्यदाद्यत्वे पररूपे टापि सवर्णदीर्घे 'दश्च' इति दस्य मकारादेशे "औङ आपः" इति औकारस्य शी आदेशेऽनुबन्धलोपे गुणे च **इमे** इति रूपम्। जसि पूर्ववत् इमा + अस् इति जाते सवर्णदीर्घे सकारस्य रुत्वे विसर्गे **इमाः**। अमि इमा + अम् "अमि पूर्वः" इति पूर्वरूपम्। शसि इमा + अस् इत्यत्र पूर्वसवर्णदीर्घे स्त्रीत्वात् "तस्माच्छसोः नः पुंसि" इति नत्वाभावे सकारस्य रुत्वे विसर्गे च **इमाः** इत्येव रूपम्। टाविभक्तौ अत्वे पररूपे टापि सवर्णदीर्घे इदा + आ इति जाते "अनाप्यकः" इत्यनेन इद् इत्यस्य अन्-आदेशे "आङि चापः" इति आकारस्य एत्वे अयादेशे **अनया** इति रूपं सिद्धम्।

'इदम् + भ्याम्' इत्यत्र अत्वे पररूपे टापि सवर्णदीर्घे च "हलि लोपः" इत्यनेन इद्भागस्य लोपे **आभ्याम्** इति रूपम्। एवमेव आभिः। इदम् + ङे - इदम् + ए इत्यत्र अत्वपररूपटाप्सु कृतेषु इदा + ए इति जाते "सर्वनाम्नः स्याड्ढ्रस्वश्च" इत्यनेन स्याडागमे ह्रस्वे च कृते इद + स्या ए इत्यत्र वृद्धौ "हलि लोपः" इत्यनेन इद्भागस्य लोपे **अस्यै** इति रूपं सिद्धम्।

इदम् + ङसि - इदम् + अस् - इद अ + अस् - इद + अस् - इद टाप् + अस् - इदा + अस् - इद + स्या

(ट्) अस् - अ + स्यास् - अस्यारु - अस्यार् - **अस्याः** । एवमेव ङस्विभक्तावपि ।

इदम् + ओस् - इद अ + ओस् - इद + ओस् - इद टाप् + ओस् - इदा + ओस् - अना + ओस् - अने + ओस् - अनय् + ओस् - अनयोरु - अनयोर् - **अनयोः** ।

इदम् + आम् - इद अ + आम् - इद + आम् - इद टाप् + आम् - इदा + आम् - इदा + स् (सुट्) आम् - आ + साम् - आसाम् ।

इदम् + सुप् - इदम् + सु - इद अ + सु - इद + सु - इदा + सु - आ + सु - **आसु** ।

**अन्वादेशे तु-एनाम्** । **एने** । **एनाः** । **एनया** । **एनयोः** । **एनयोः** ।

अन्वादेशे "द्वितीयाटौस्स्वेनः" इत्यनेन द्वितीयायाः त्रिषु वचनेषु, टाविभक्तौ ओस्विभक्तौ च इद्भागस्य एनादेशे एतानि रूपाणि जायन्ते इत्यर्थः ।

**"ऋत्विग्-" आदिना सृजेः क्विन् अमागमश्च निपातितः । स्रक्/स्रग् । स्रजौ । स्रजः । स्रग्भ्याम् । स्रक्षु ।**

सृज्धातोः क्विनि, ऋकारात्परः, अमागमेऽनुबन्धलोपे सृ अ ज् इत्यत्र ऋकारस्य यणि रेफादेशे स्रज् इति कृदन्तः शब्दः । ततः सौ हल्ङ्यादिलोपे "क्विन्प्रत्ययस्य कुः" इति कुत्वे गकारे "वावसाने" इति विकल्पेन चर्त्वे स्रक्/स्रग् इति रूपे ।

स्रज् + सु - स्रज् + स् - स्रज् - स्रग् - **स्रक्/स्रग्** ।

**त्यदाद्यत्वम् टाप्** । **स्या** । **त्ये** । **त्याः** । **एवं, तद्, यद्, एतद्** ।

त्यद्शब्दस्य विभक्तौ "त्यदादीनामः" इति अत्वे पररूपे सति स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे "तदोः सः सावनन्त्ययोः" इत्यनेन तकारस्य सकारे हल्ङ्यादिलोपे **स्या** इति रूपम् ।

त्यद् + सु - त्यद् + स् - त्य अ + स् - त्य + स् - त्या + स् - **स्या** ।

क्विप्वचि - इति क्विपि दीर्घे संप्रसारणाभावे च कृते निष्पन्नो वाच्-शब्दः, **वाक्/वाग्** । **वाचौ** । **वाचः** । **वाग्भ्याम्** । **वाक्षु** ।

वाच् + सु - वाच् + स् - वाच् - वाग् - **वाक्/वाग्** । 'चोःकुः' इति कुत्वम् ।

वाच् + सुप् - वाच् + सु - वाक् + सु - वाग् + सु - वाक् + सु - वाक् + षु - **वाक्षु** ।

**अप्शब्दो नित्यं बहुवचनान्तः । "अप्तृन्तृच्" इति दीर्घः । आपः, अपः ।**

अप् + जस् - अप् + अस् - आप् + अस् - आपरु - आपर् - **आपः** । अप् + शस् - अपरु - अपर् - **अपः** ।

### तकारादेशविधायकं विधिसूत्रम्-

**अपो भि ७ । ४ । ४८**

**अपस्तकारः स्याद्भादौ प्रत्यये परे । अद्भिः । अद्भ्यः । अद्भ्यः । अपाम् । अप्सु ।**

(अपः, अङ्गस्य, भि, त)

**सरलार्थः-** अपः पकारस्य तकारादेशो भवति भकारादौ प्रत्यये परे । "झलां जशोऽन्ते" इति जश्त्वेन तकारस्य दकारः ।

अप् + भिस् - अत् + भिस् - अद्भिरु - अद्भिर् - अद्भिः ।

दिश्शब्दस्य क्विन्प्रत्ययान्तत्वेन कुत्वम् - **दिक्/दिग्** । **दिशौ** । **दिशः** । **दिग्भ्याम्** । **दिक्षु** ।

दिश् + सु - दिश् + स् - दिश् - दिष् - दिड् - दिग् - दिक्/दिग् । दिश् + औ - **दिशौ** ।

**"त्यदादिषु-" इति दृशेः क्विन् विधानादन्यत्रापि कुत्वम् । दृक्/दिग् । दृशौ । दृशः ।**

"त्यदादिषु-" इत्यनेन त्यदादिषूपपपदेषु दृशेः क्विन्प्रत्ययविधानात्, कुत्वविधायकसूत्रे क्विन्प्रत्ययो यस्मादिति विग्रहेण क्विन्प्रत्यययोग्यधातोः कुत्वमिति विशेषव्याख्यया क्विप्प्रत्ययान्तस्य दृश्शब्दस्यापि कुत्वमिति भावः ।

**त्विट् / त्विड् । त्विषौ । त्विषः । त्विड्भ्याम् । त्विट्त्सु / त्विट्सु ।**

त्विष्शब्दस्य सौ हल्ङ्यादिलोपे षकारस्य जश्त्वे चर्त्वे च **त्विट्** । **विड्** ।

**सह जुषते इति सजुष्शब्दः । सजूः । सजुषौ । सजुषः । सजूर्भ्याम् । सजूष्षु/सजूः षु ।**

"ससजुषो रुः" इति पदान्तस्य षकारस्य रुत्वम् । "र्वोरुपधायाः-" इति दीर्घः ।

सजुष् + सु - सजुष् + स् - सजुष् - सजुरु - सजुर् - सजूर् - **सजूः** ।

**षत्वस्यासिद्धत्वाद्रुत्वम्, आशीः । आशिषौ । आशिषः । आशीर्भ्याम् । आशीर्भिः ।**

आशिष्शब्दे "आदेशप्रत्यययोः" इत्यनेन विहितस्य षत्वस्य "ससजुषो रुः" इत्यस्य दृष्ट्या परत्रैपादिकत्वेन असिद्धत्वेन सकारस्य रुत्वमिति भावः ।

आशिष् + सु - आशिष् + स् - आशिष् - आशिरु - आशिर् - आशीर् - **आशीः** । "र्वोरुपधाया दीर्घः" इत्यनेन दीर्घः ।

**असौ** । -"अदस औ सुलोपश्च" इति सकारस्य औकारादेशे सकारस्य लोपे च कृते वृद्धौ "तदोः सः सावनन्त्ययोः" इति सकारादेशः ।

**त्यदाद्यत्वम् । टाप्, औङः शी । उत्वमत्वे । अमू । अमूः ।**

**अमूम् । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै ।**

**अमूभ्याम् । अमूभ्यः । अमुष्याः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूषु ।**

सुविभक्तिं विहाय विभक्तौ परतः अत्वम् पररूपम्, टाप् इत्येते सर्वत्र ज्ञेयम् । अदा इति स्वरूपे जाते सर्वाशब्दस्येव प्रक्रिया ज्ञेया उत्वमत्वमात्रमत्र विशेषः ।

अदस् + औ - अद अ + औ - अद + औ - अद टाप् + औ - अदा + औ - अदा + शी - अदा + ई - अदे - **अमू** । अदस् + जस् - अदस् + अस् - अद अ + अस् - अद + अस् - अद टाप् + अस् - अदा + अस् - अदास् - अमूस् - अमूरु - अमूर् - **अमूः** । अदस् + टा - अदस् + आ - अद अ + आ - अद + आ - अद टाप् + आ - अदा + आ - अदे + आ अदया - **अमुया** । अदस् + ङे - अदस् + ए - अद अ + ए - अद + ए - अद टाप् + ए - अदा + स्या (ट्) ए - अद + स्यै - अमुस्यै - **अमुष्यै** ।

| उपानह्शब्दस्य रूपावली | | |
|---|---|---|
| उपानत्-द् | उपानहौ | उपानहः |
| उपानहम् | उपानहौ | उपानहः |
| उपानहा | उपानद्भ्याम् | उपानद्भिः |
| उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानहोः | उपानहाम् |
| उपानहि | उपानहोः | उपानत्सु |
| हे उपानत्-द् ! | हे उपानहौ ! | हे उपानहः ! |

| उष्णिष्शब्दस्य रूपावली | | |
|---|---|---|
| उष्णिक्-ग् | उष्णिहौ | उष्णिहः |
| उष्णिहम् | उष्णिहौ | उष्णिहः |
| उष्णिहा | उष्णिग्भ्याम् | उष्णिग्भिः |
| उष्णिहे | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| उष्णिहः | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| उष्णिहः | उष्णिहोः | उष्णिहाम् |
| उष्णिहि | उष्णिहोः | उष्णिक्षु |
| हे उष्णिक्/ग् ! | हे उष्णिहौ ! | हे उष्णिहः ! |

| गिर्शब्दस्य रूपावली | | |
|---|---|---|
| गीः | गिरौ | गिरः |
| गिरम् | गिरौ | गिरः |
| गिरा | गीर्भ्याम् | गीर्भिः |
| गिरे | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गिरोः | गिराम् |
| गिरि | गिरोः | गीर्षु |
| हे गीः ! | हे गिरौ ! | हे गिरः ! |

| किम्शब्दस्य रूपावली | | |
|---|---|---|
| का | के | काः |
| काम् | के | काः |
| कया | काभ्याम् | काभिः |
| कस्यै | काभ्याम् | काभ्यः |
| कस्याः | काभ्याम् | काभ्यः |
| कस्याः | कयोः | कासाम् |
| कस्याम् | कयोः | कासु |
| त्यदादित्वात् सम्बोधनेऽप्रयोगः ! | | |

| इदम्शब्दस्य रूपावली | | | दिश्शब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| इयम् | इमे | इमाः | दिक्-ग् | दिशौ | दिशः |
| इमाम् | इमे | इमाः | दिशम् | दिशौ | दिशः |
| अनया | आभ्याम् | आभिः | दिशा | दिग्भ्याम् | दिग्भिः |
| अस्यै | आभ्याम् | आभ्यः | दिशे | दिग्भ्याम् | दिग्भ्यः |
| अस्याः | आभ्याम् | आभ्यः | दिशः | दिग्भ्याम् | दिग्भ्यः |
| अस्याः | अनयोः | आसाम् | दिशः | दिशोः | दिशाम् |
| अस्याम् | अनयोः | आसु | दिशि | दिशोः | दिक्षु |
| | | | हे दिक्/ग् ! | हे दिशौ ! | हे दिशः ! |

## रूपसाधनप्रकारः

### इयम्

इदम्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे "त्यदादीनामः" इत्यनेन अत्वे प्राप्ते तं प्रबाध्य "इदमो मः" इत्यनेन मकारस्य मकारादेशे एव कृते "यः सौ" इति सूत्रेण दकारस्य यकारादेशे सकारस्य "हलङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण लोपे **इयम्** इति रूपं सिद्धम् ।

### वाक्षु

वाच्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण सप्तम्या बहुवचने सुप्विभक्तौ अनुबन्धलोपे "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायां "चोः कुः" इत्यनेन कुत्वे वाक् + सु इति जाते "आदेशप्रत्यययोः" इति सूत्रेण षत्वे कषसंयोगे क्ष इति जाते **वाक्षु** इति रूपं सिद्धम् ।

### अद्भिः

अप्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया बहुबचने भिस्विभक्तौ "अपो भि" इति सूत्रेण पकारस्य तकारादेशे अत् + भिस् इति जाते "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायां "झलां जशोऽन्ते" इति सूत्रेण जश्त्वेन दकारादेशे सकारस्य रुत्वे विसर्गे च अद्भिः इति रूपं सिद्धम् ।

# अभ्यासः

## १. निम्नसूत्राणां सरलार्थं लिखत

(क) नहो धः । (ख) यः सौ ।

(ग) अपो भि । (घ) त्यदादीनामः ।

(ङ) त्रिचतुरोः स्त्रियां तिसृचतसृ ।

## २. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत

(क) उष्णिह्शब्दे ष्णिह्धातोः षकारादिसत्वेऽपि निपातनात् षत्वविधानं किमर्थम् ?

(ख) 'चतसृणाम्' इत्यत्र प्राप्तस्य दीर्घस्य केन सूत्रेण निषेधः ?

(ग) सजुष्शब्दस्य षकारस्य रुत्वं केन सूत्रेण भवति ?

(घ) स्या इति कस्य शब्दस्य रूपम् ?

(ङ) आशिष् + भ्याम् इत्यत्र केन सूत्रेण कस्य वर्णस्य रुत्वम् ?

(च) 'त्यदादिषु-' इति दृशेः क्विन् विधानादन्यत्रापि कुत्वम् अस्याः पङ्क्तेराशयः कः ?

## ३. परस्परं मेलयत

| (अ) | (आ) |
|---|---|
| द्यौः | उपधादीर्घः । |
| अमुया | कुत्वम् । |
| आपः | ऊत्वमत्वे । |
| स्रक् | औतादेशः । |
| अमू | उत्वमत्वे । |

## ४. निम्नाङ्कितानां ससूत्रं रूपसाधनप्रकारं प्रदर्शयत

इमाः । वाचः । अमुष्यै । अद्भ्यः । दिग्भ्याम् ।

## ५. रिक्तस्थानं पूरयत

| | | |
|---|---|---|
| वाक् | वाचौ | वाचः |
| ... ... | वाचौ | ... ... |
| ... ... | वाग्भ्याम् | ... ... |
| वाचे | ... ... | वाग्भ्यः |
| ... ... | वाग्भ्याम् | वाग्भ्यः |
| वाचः | ... ... | ... ... |
| ... ... | वाचोः | ... ... |
| हे वाक्/ग् ! | हे वाचौ ! | हे वाचः ! |

अथ हलन्तनपुंसकलिङ्गप्रकरणे

# हलन्तनपुंसकशब्दानां रूपसिद्धिप्रक्रिया

**स्वमोर्लुक्** । **दत्वम्** । **स्वनडुत्/स्वनडुद्** । **स्वनडुही** । **"चतुरनडुहोः-" इत्याम्** । **स्वनड्वांहि** । **पुनस्तद्वत्** । **शेषं पुंवत्** ।

सु = शोभनाः अनड्वाहो यस्य कुलस्येति बहुव्रीहौ स्वनडुह्शब्दः । स्वनडुह्शब्दाद् विहितयोः स्वमोः "स्वमोर्नपुंसकात्" इत्यनेन लुग्विधानात् "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रेण प्राप्तस्य प्रत्ययलक्षणस्य "न लुमताङ्गस्य" इति सूत्रेण निषेधात् "चतुरनडुहोः-" इत्याम् "अम् संबुद्धौ" इत्यम् "सावनडुहः" इति नुम् इत्यादिकानि विभक्तिनिमित्तकानि अङ्गकार्याणि न भवन्तीत्यर्थः । पदान्ते "वसुस्रंसु-" इत्यनेन दत्वम् ।

स्वनडुह् + सु - स्वनडुह् + स् - स्वनडुह् - स्वनडुद् - **स्वनडुत्/स्वनडुद्** ।

औविभक्तौ "नपुंसकाच्च" इत्यौङः शीभावे **स्वनडुही** इति रूपम् ।

जसि "जश्शसोः शिः" इति शिभावे तस्य "शि सर्वनामस्थानम्" इत्यनेन सर्वनामस्थानसंज्ञायां "चतुरनडुहोः-" इति आमागमे "नपुंसकस्य झलचः" इति नुमि "नश्चापदान्तस्य झलि" इति अनुस्वारे **स्वनड्वांहि** इति रूपम् । द्वितीयाविभक्तौ प्रथमायामिव रूपाणि जायन्ते, अन्यासु विभक्तिषु पुँल्लिङ्गे इव भवन्ति ।

स्वनडुह् + औ - स्वनडुह् + शी - स्वडुह् + ई - **स्वनडुही** ।

स्वनडुह् + जस् - स्वडुह् + अस् - स्वनडुह् + शि - स्वनडुह् + इ - स्वनडु आ (म्) ह् + इ - स्वनडु आ न् ह् + इ - स्वनड्वान्ह् + इ - स्वनड्वांह् + इ - **स्वनड्वांहि** ।

**"दिव उत्" अहर्विमलद्यु । अन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम् 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः" (वा) इति प्रत्ययलक्षणं न । विमलदिवी । विमलदिवि । 'अपदादिविधौ' किम् - दधिसेचौ । इह षत्वनिषेधे कर्तव्ये पदत्वमस्त्येव । चकारस्य कुत्वे तु न ।**

विमला द्यौः = आकाशं यस्मिन्नहनि तदिति विग्रहे बहुव्रीहौ विमलदिव्शब्दः, तस्मात् सौ तस्य स्वमोर्नपुंसकादिति लुकि "दिव उत्" इत्यनेन वकारस्य उकारादेशे, यणि **विमलद्यु** इति रूपं जायते ।

विमलदिव् + सु - विमलदिव् + स् - विमलदिव् - विमलदि उ - **विमलद्यु** ।

विमलदिव्शब्दाद् औविभक्तौ, समासप्रक्रियायां "सुपो धातु-" इत्यनेन लुप्तां दिव्शब्दोत्तरां विभक्तिं प्रत्ययलक्षणेनाश्रित्य दिव् इत्यस्य पदत्वाद् "दिव उत्" इत्यनेन वकारस्य उकारादेशो न शङ्कनीयः "उत्तरपदत्वे चापदादिविधौ प्रतिषेधः" इति वार्तिकेन पदादिविधिं वर्जयित्वा अन्यत्र उत्तरपदस्य प्रत्ययलक्षणेन पदसंज्ञा न भवतीति निषेधात्। न चात्र "सुपो धातु-" इत्यनेन लुक्शब्देन लुप्तत्वाद् "न लुमताङ्गस्य" इत्यनेन प्रत्ययलक्षणनिषेधादेव पदत्वाभावे पदान्तस्य उकारादेशप्राप्तिरेव नास्ति किमनेन शङ्कासमाधानप्रयासेनेति वाच्यम्, पदसंज्ञायाः सुबन्तधर्मतया अङ्गधर्मत्वाभावेन तत्र "न लुमताङ्गस्य" इति निषेधाप्रवृत्तेः अनेन वार्तिकेनात्र पदत्वनिषेध आवश्यक एव।

विमलदिव् + औ - विमलदिव् + शी - विमलदिव् + ई - **विमलदिवी**।

विमलदिव् + जस् - विमलदिव् + अस् - विमलदिव् + शि - विमलदिव् + इ - **विमलदिवि**।

"उत्तरपदत्वे चापदादिविधौ प्रतिषेधः" इति वार्तिकेन अपदादिविधावेव प्रत्ययलक्षणाभावेन पदत्वनिषेधो भवति, पदादिविधौ तु निषेधो न भवति तेन 'दधिसेचौ' इत्यत्र दधिसेचोः समासे "आदेशप्रत्यययोः" इत्यनेन इणः परस्य आदेशावयवस्य सस्य षत्वे प्राप्ते प्रत्ययलक्षणेन 'सेच्' इत्यस्य पदसंज्ञायां सकारस्य पदादित्वेन "सात्पदाद्योः" इति षत्वनिषेध उपपद्यते। पदादिविधावपि वार्तिकेन प्रत्ययलक्षणनिषेधे तु अत्र 'सेच्' इत्यस्य पदत्वाभावात् "सात्पदाद्योः" इत्यनेन षत्वनिषेधो न स्यादिति भावः। अत्रैव चकारस्य पदान्तत्वेन "चोःकुः" इत्यनेन कुत्वप्रसङ्गे तु प्रत्ययलक्षणनिषेधो भवत्येव।

**वाः। वारी। अझलन्तत्वान्न नुम्, वारि। चत्वारि।**

वार्शब्दात् सौ स्वमोर्लुक् रेफस्य विसर्गे **वाः** इति रूपम्।

वार् + सु - वार् + स् - वार् - **वाः**। वार् + औ - वार् + शी - वार् + ई - **वारी**।

वार् + जस् - वार् + अस् - वार् + शि - वार् + इ - **वारि**। झलन्तत्वाभावेन "नपुंसकस्य झलचः" इत्यनेन नुमभाव इत्यर्थः। रुस्थानिकरेफस्याभावेन भ्यामादौ यकारादेशो न भवति। एवं चतुर्शब्दस्यापि नुमभावः।

चतुर् + जस् - चतुर् + अस् - चतुर् + शि - चतुर् + इ - चतु आ (म्) र् + इ - चत्वार् + इ - **चत्वारि**।

**"न लुमताङ्गस्य" इति कादेशो न। किम्। के। कानि।**

किम्शब्दाद्विहितयोः सु-अम्विभक्त्योः लुक्शब्देन लुप्तत्वात् "न लुमताङ्गस्य" इत्यनेन अङ्गकार्ये (कादेशे) कर्तव्ये प्रत्ययलक्षणनिषेधात् "किमः कः" इत्यनेन कादेशो न भवति। अन्यत्र विभक्तिषु कादेशे सर्वशब्दवद्रूपाणि जायन्ते।

किम् + सु - किम् - स् - **किम्**।

किम् + औ - क + औ - क + शी - क + ई - **के**।

किम् + जस् - किम् + अस् - किम् + शि - किम् + इ - क + इ - क न् (नुम्) + इ

कान् + इ - **कानि** । कादेशे 'नपुंसकस्य झलचः" इति नुमि, "सर्वनामस्थाने चासम्बुद्धौ" इति उपधादीर्घः ।

**इदम्** । **इमे** । **इमानि** ।

स्वमोर्लुकि 'इदम्' इति रूपम् । औङि अत्वम्, पररूपम्, "दश्च" इति दस्य मः, "नपुंसकाच्च" इति शीभावः गुणः । जसि जश्शसोः शिः, अत्वम्, पररूपम्, 'दश्च' इति मः, 'नपुंसकस्य झलचः' इति नुम्, 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घः, इति भावः ।

इदम् + सु - इदम् + स् - **इदम्** ।

इदम् + औ - इद अ + औ - इद + औ - इम + औ - इम + शी - इम + ई - **इमे** ।

इदम् + जस् - इदम् + अस् - इदम् + शि - इदम् + इ - इद अ + इ - इद + इ - इम + इ - इम न् (नुम्) + इ - इमान् + इ - **इमानि** ।

**"अन्वादेशे नपुंसके एनद्वक्तव्यः" (वा) एनत्** । **एने** । **एनानि** । **एनेन** । **एनयोः** । **एनयोः** ।

अन्वादेशविषये नपुंसकलिङ्गे इदमेतदोः एनत् आदेशो भवतीत्यर्थः । एनदादेशश्च अम्येव भवति । "एनदिति नपुंसकैकवचने वक्तव्यम्" इति पठित्वा "कुण्डमानय प्रक्षालयैनत्" इत्युदाहरणं प्रदत्तमस्ति तेन औट्शसोः, टाविभक्तौ ओसि च "द्वितीयाटौस्स्वेनः" इति एनादेश इति विवेकः ।

**ब्रह्म** । **ब्रह्मणि** । **ब्रह्माणि "सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः"** । **हे ब्रह्मन्, हे ब्रह्म** ।

ब्रह्मन्शब्दात्सौ तस्य लुकि "नलोपः प्रातिपदिकान्तस्य" इति नलोपे **ब्रह्म** इति रूपम् । औविभक्तौ, औङः शीभावे, णत्वे च **ब्रह्मणी** इति रूपम् । अत्र ब्रह्मन् + ई इत्यवस्थायां "विभाषा ङिश्योः" इति अल्लोपे प्राप्ते "न संयोगाद्वमन्तात्" इत्यनेन निषिध्यते । जस् विभक्तौ जश्शसोः शिः तस्य सर्वनामस्थानत्वाद् नान्तलक्षणे दीर्घे णत्वे च **ब्रह्माणि** इति रूपम् । अत्र अल्लोपस्य प्राप्तिस्तु न सर्वनामस्थानत्वेन भसंज्ञाभावात् । एवमेव द्वितीयायामपि । सम्बोधनस्य एकवचने नकारस्य लोपो विकल्पेन भवति ।

ब्रह्मन् + सु - ब्रह्मन् + स् - ब्रह्मन् - **ब्रह्म** ।

ब्रह्मन् + औ - ब्रह्मन् + शी - ब्रह्मन् + ई - ब्रह्मण् + ई - **ब्रह्मणी** ।

**"रोऽसुपि" अहर्भाति** । **"विभाषा ङिश्योः" अह्नी/अहनी** । **अहानि** ।

अहन्शब्दात्सौ तस्य लुकि प्रत्ययलक्षणाभावात् सुप्परत्वाभावे 'रोऽसुपि' इत्यनेन नकारस्य रेफादेशे, विसर्गे **अहः** इति रूपम् । **अत्र भाति इति भकारे परे 'हशि च' इत्युत्वं न रेफस्य रुस्थानिकत्वाभावात्** । औविभक्तौ विकल्पेन अल्लोपे **अह्नी/अहनी** इति द्वे रूपे ।

अहन् + सु - अहन् + स् - अहन् - अहर् - **अहः** ।

## रुत्वविधायकं विधिसूत्रम्-

**अहन् ८ । २ । ६८**

**'अहन्' इत्यस्य रुः स्यात् पदान्ते । अहोभ्याम् अहोभिः ।**

(अहन्, रु, पदस्य अन्ते)

**सरलार्थः-** अहन् इत्यस्य नकारस्य स्थाने रु इत्यादेशो भवति पदान्ते ।

भ्यामादिहलादौ विभक्तौ पूर्वस्य पदसंज्ञात्वादनेन सूत्रेण नकारस्य रुत्वम्, "हशि च" इत्यनेन हशि परे उत्वमिति भावः ।

अहन् + भ्याम् - अहरू + भ्याम् - अहर् + भ्याम् - अह उ + भ्याम् - अहो + भ्याम् - **अहोभ्याम्** ।

**इह 'अहः' अहोभ्याम्' इत्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते 'अहन्' इत्यावर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः ।**

अत्र 'रोऽसुपि, अहन्' इत्यनयोः "नलोपः-" सूत्रापेक्षया परत्रैपादिकत्वेन असिद्धत्वान् नलोपे प्राप्ते "अहन्" इति सूत्रं द्विरावृत्य नलोपस्य परिहारः कर्तव्यः । आवृत्तयोः तयोः प्रथमस्य "अहन्" इत्यस्य "पदान्ते अहन् इत्येव स्यात्, न तु नलोपः" इत्यर्थः करणीयः । द्वितीयस्य "अहन्" इत्यस्य तु अहन्नित्यस्य रुः स्यात्पदान्ते, इत्यर्थः करणीयः ।

**तदन्तस्यापि रत्वरुत्वे, दीर्घाण्यहानि यस्मिन् स दीर्घाहा निदाघः । इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन 'असुपि' इति निषेधात् रत्वाभावे रुः । तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः । सम्बुद्धौ तु हे दीर्घाहो निदाघ । दीर्घाहानौ । दीर्घाहानः । दीर्घाह्ना । दीर्घाहोभ्याम् ।**

निदाघः = ग्रीष्मकालः, अत्र दीर्घाहन्शब्दो निदाघविशेषणं पुँल्लिङ्गे वर्तते । रत्वरुत्वविधायकसूत्रयोः पदाधिकारस्थत्वात् तदन्तेऽपि प्रवृत्तिर्भवति । अतो दीर्घाहन्शब्दात्सौ तस्य हल्ङ्यादिलोपे "प्रत्ययलोपे इत्यनेन प्रत्ययलक्षणेन सुपः परत्वं मत्वा रत्वाप्राप्ते "अहन्" इत्यनेन पदान्तस्य रुत्वम् अहर् इति जाते "सर्वनामस्थाने चासम्बुद्धौ" इत्यपेक्षया "अहन्" इत्यस्य त्रैपादिकत्वेन असिद्धत्वाद् नान्तलक्षणदीर्घे रेफस्य विसर्गे । दीर्घाहाः, इति रूपम् । निदाघपदे परे तु रेफस्य यत्वं तस्य "हलि सर्वेषाम्" इति लोप इति भावः । सम्बोधने तु सम्बुद्धौ उपधादीर्घाभावाद् ह्रस्वाकारात्परस्य रेफस्य विसर्गे हे **दीर्घाहः** इति रूपम् । निदाघशब्दे परे तु "हशि च" इत्यनेन रेफस्य उत्वम् गुण इति भावः ।

दीर्घाहन् + सु - दीर्घाहन् + स् - दीर्घाहन् - दीर्घाहरू - दीर्घाहर् - दीर्घाहार् - **दीर्घाहा** । दीर्घाहन् + औ - दीर्घाहान् + औ - **दीर्घाहानौ** ।

दीर्घाहन् + जस् - दीर्घाहन् + अस् - दीर्घाहान् + अस् - दीर्घाहानरु - दीर्घाहानर् - **दीर्घाहानः** ।

**दण्डि । दण्डिनी । दण्डीनि । स्रग्वि । स्रग्विणी । स्रग्वीणि । वाग्ग्मि । वाग्ग्मिनी । वाग्ग्मीनि ।**

दण्डिन्स्रग्विन्वाग्ग्मिन्शब्देभ्यः सौ तस्य "स्वमोर्नपुंसकात्" इति लुकि नलोपः । औङः शि-आदेशेऽनुबन्धलोपे वर्णयोगे, जसः शी-आदेशे तस्य "शि सर्वनामस्थानम्" इति सर्वनामस्थानत्वे "इन्हन्पूषार्यम्णां शौ" इत्यनेन उपधादीर्घः ।

**बहुवृत्रह । बहुवृत्रघ्नी/बहुवृत्रहणी । बहुवृत्रहाणि । बहुपूष । बहुपूष्णी/बहुपूषणी । बहुपूषाणि । बह्वर्यम । बह्वर्यम्णी/बह्वर्यमणी । बह्वर्यमाणि ।**

अत्र औङः श्यां "विभाषा ङिश्योः" इत्यनेन विकल्पेन अल्लोपः । वृत्रहन्शब्दे अल्लोपे जाते "हो हन्तेः -" इति कुत्वेन हकारस्य घकारश्च ।

| किम्शब्दस्य रूपावली | | |
|---|---|---|
| किम् | के | कानि |
| किम् | के | कानि |
| शेषं पुंवत् । | | |

| इदम्शब्दस्य रूपावली | | |
|---|---|---|
| इदम् | इमे | इमानि |
| इदम् | इमे | इमानि |
| शेषं पुंवत् । | | |

| ब्रह्मन्शब्दस्य रूपावाली | | |
|---|---|---|
| ब्रह्म | ब्रह्मणी | ब्रह्माणि |
| ब्रह्म | ब्रह्मणी | ब्रह्माणि |
| ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः |
| ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु |
| हे ब्रह्मन्/हे ब्रह्म ! | हे ब्रह्मणी ! | हे ब्रह्माणि ! |

| अहन्शब्दस्य रूपावली | | |
|---|---|---|
| अहः | अह्नी/अहनी | अहानि |
| अहः | अह्नी/अहनी | अहानि |
| अह्ना | अहोभ्याम् | अहोभिः |
| अह्ने | अहोभ्याम् | अहोभ्यः |
| अह्नः | अहोभ्याम् | अहोभ्यः |
| अह्नः | अह्नोः | अह्नाम् |
| अह्नि/अहनि | अह्नोः | अहःसु |
| हे अहः ! | हे अह्नी/अहनी ! | हे अहानि |

| दण्डिन्शब्दस्य रूपावाली | | |
|---|---|---|
| दण्डि | दण्डिनी | दण्डीनि |
| दण्डि | दण्डिनी | दण्डीनि |
| | | शेषं पुंवत् । |

| वाग्मिन्शब्दस्य रूपावली | | |
|---|---|---|
| वाग्ग्मि | वाग्ग्मिनी | वाग्ग्मीनि |
| वाग्ग्मि | वाग्ग्मिनी | वाग्ग्मीनि |
| हे वाग्ग्मि ! | हे वाग्ग्मिनी ! | हे वाग्ग्मीनि ! |
| हे वाग्ग्मिन् ! | | शेषं पुंवत् । |

## रूपसाधनप्रकारः

### विमलद्यु

विमलदिव्शब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे विमलदिव् + स् इति जाते "स्वमोर्नपुंसकात्" इति सूत्रेण सकारस्य लुकि "दिव उत्" इत्यनेन वकारस्य उकारादेशे यणि विमलद्यु इति रूपं सिद्धम् ।

### अहोभ्याम्

अहन्शब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया द्विवचने भ्याम्विभक्तौ "स्वादिष्वसर्वानाम-स्थाने" इति सूत्रेण पदसंज्ञायाम् "अहन्" इत्यनेन रुत्वे अनुबन्धलोपे अहर् + भ्याम् इति जाते "हशि च" इत्यनेन रेफस्य उत्वे "आद् गुणः" इति सूत्रेण गुणे अहोभ्याम् इति रूपं सिद्धम् ।

## अभ्यासः

**१. अधोऽङ्कितानां सूत्राणां सरलार्थं लिखत**

(क) स्वमोर्नपुंसकात् ।
(ख) जश्शसोः शिः ।
(ग) शि सर्वनामस्थानम् ।
(घ) रोऽसुपि
(ङ) अहन् ।

**२. निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" "स्वमोर्नपुंसकात्" इत्यनयोरेकत्र प्राप्तौ किं सूत्रं प्रवर्तते ?

(ख) नपुंसके प्रथमाविभक्ताविव द्वितीयायामपि रूपाणि समानानि भवन्ति, अत्र कारणं किम् ?

(ग) "रोऽसुपि" इत्यनेन रेफादेशो भवति "अहन्" इत्यनेन "रु" इत्यादेशो भवति तत्र रेफादेशे रुत्वे च को विशेषः ?

(घ) "उत्तरपदत्वे चापदादिविधौ प्रतिषेधः" इत्यस्यार्थः कः ?

(ङ) वार्शब्दाद् भ्यामि रेफस्य उत्वं भवति न वा ?

(च) किम्शब्दस्य नपुंसकलिङ्गे कादेशः कथन्न भवति ?

(छ) रत्वरुत्वविधायकसूत्रयोः तदन्ते प्रवृत्तिस्वीकारस्य फलं किम् ?

## ३. परपरं मेलयत -

| **(अ)** | **(आ)** |
| --- | --- |
| हशि च | अल्लोपनिषेधः । |
| नपुंसकस्य झलचः | विकल्पेन अल्लोपः । |
| न संयोगाद्वमन्तात् | शी-आदेशः |
| विभाषा ङिश्योः | उत्वम् । |
| नपुंसकाच्च | नुमागमः । |

## ४. उपयुक्ते (✓) चिह्नम् अनुपयुक्ते (X) चिह्नम् निर्दिशत

(क) अहोभ्याम् इत्यत्र "हशि च " इत्यनेन रेफस्य उकारादेशः ।

(ख) ब्रह्म इत्यत्र "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इत्यनेन सकारस्य लोपः ।

(ग) 'दश्च' इत्यनेन "इमे" इत्यत्र दकारस्य मकारादेशः ।

(घ) 'इमानि' इत्यत्र "प्रथमयोः पूवसवर्णः" इत्यनेन दीर्घः ।

(ङ) 'दण्डीनि' इत्यत्र "शि सर्वनामस्थानम्" इति सूत्रेण सर्वनामस्थानसंज्ञा भवति ।

## ५. ससूत्रं रूपसाधनप्रकारं दर्शयत

के । इमानि । अहः । हे ब्रह्म/हे ब्रह्मन् !

हलन्तनपुंसकलिङ्गप्रकरणे

# चान्तादिशब्दानां रूपसिद्धिप्रक्रिया

असृजः पदान्ते कुत्वम् सृजेः क्विनो विधानात् । विश्वसृडादौ तु न । 'सृजिदृशोः' इति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात् । यद्वा 'व्रश्च-' आदि सूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः । स्रगृत्विक्छब्दयोस्तु निपातनादेव कुत्वम् । असृक्छब्दस्तु अस्यतेरौणादिके ऋज्प्रत्यये बोध्यः । असृक्, असृग् । असृजी । असृञ्जि, 'पद्दन्-' इति वा असन्, असानि । असृजा । अस्ना । असृग्भ्याम्/असभ्याम् । ऊर्क्, उर्ग् । ऊर्जी । ऊर्न्जि । नरजानां संयोगः । 'बहूर्जि नुम्प्रतिषेधः' अन्त्यात् पूर्वो वा नुम्, बहूर्जि/बहूर्न्जि वा कुलानि ।

त्यत्/त्यद् । त्ये । त्यानि । तत्/तद् । ते । तानि । यत्/यद् । ये । यानि । एतत्/एतद् । एते । एतानि । अन्वादेशे तु एनत् । बेभिद्यतेः क्विप् बेभित्/बेभिद् । बेभिदी । शावल्लोपस्य स्थानिवत्त्वादझलन्तत्वान्न नुम् । अजन्तलक्षणस्तु नुम् न, स्वविधौ स्थानित्वाभावात् । बेभिदि ब्राह्मणकुलानि । चेच्छिदि ।

गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥
स्वम्सुप्सु नव षड् भादौ षड्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ॥

तथाहि । गामञ्चतीति विग्रहे 'ऋत्विग्-' आदिना क्विन् । गतौ नलोपः । 'अवङ् स्फोटायनस्य' इत्यवङ् । गवाक्/गवाग् । 'सर्वत्र विभाषा-' इति प्रकृतिभावे गोअक्/गोअग् । पूर्वरूपे गोऽक्/गोऽग् । पूजायां नस्य कुत्वेन ङः, गवाङ् । गोऽङ्/गोअङ् । अम्यपि एतान्येव नव ।

औङः शी, भत्वाद् 'अचः' इत्यल्लोपः । गोची । पूजायां तु गवाञ्ची/गोअञ्ची/ गोऽञ्ची । 'जश्शसोःशिः' शेस्सर्वनामकस्थानत्वान्नुम्, गवाञ्चि/गोअञ्चि/गोऽञ्चि । गतिपूजनयोस्त्रीण्येव । गोचा । गवाञ्चा । गोअञ्चा । गोऽञ्चा । गवाग्भ्याम्/गोअग्भ्याम्/ गोऽग्भ्याम् । गवाङ्भ्याम्/गोअङ्भ्याम्/गोऽङ्भ्याम् इत्यादि । सुपि तु ङान्तानां पक्षे 'ङ्णोः कुक् -' इति कुक् । गवाङ्क्षु/गोअङ्क्षु/गोऽङ्क्षु/गवाक्षु/गोअक्षु/ गोऽक्षु । न चेह 'चयो द्वितीया' इति पक्षे ककारस्य खकारेण षण्णामाधिक्यं शङ्क्यम्, चर्त्वस्यासिद्धत्वात् । कुक्पक्षे तु तस्यासिद्धत्वाज्जश्त्वाभावे पक्षे चयो द्वितीयादेशात्त्रीणि रूपाणि वर्धन्त एव ।

ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् ।
रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः ॥

**तिर्यक् । तिरश्ची । तिर्यञ्चि । पूजायां तु तिर्यङ् । तिर्यञ्ची । तिर्यञ्चि ।**

**यकृत् । यकृती । यकृन्ति । 'पद्दन्' इति वा यकन् । यकानि । यक्ना/यकृता । शकृत्, शकृती, शकृन्ति, शकानि । शक्ना, शकृता, ददत्, ददती ।**

### विभाषया नुमागमविधायकं विधिसूत्रम्-

**वा नपुंसकस्य ७ । १ । ७९**

**अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम्वा स्यात्सर्वनामस्थाने । ददन्ति/ददति । तुदत् ।**

(अभ्यस्तात्, शतुः, नुम्, वा, नपुंसकस्य)

**सरलार्थः-** अभ्यस्तसंज्ञकाद् धातोः परो यः शतृप्रत्ययः तदन्तस्य नपुंसकशब्दस्य सर्वनामस्थाने परे विभाषया नुमागमो भवति ।

### नुमागमविधायकं विधिसूत्रम्-

**आच्छीनद्योर्नुम् ७ । १ । ८०**

**अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नित्यं नुम् स्याच्छीनद्योः परतः । तुदन्ती/तुदती/तुदन्ति/भात्/भान्ती/भाती । भान्ति । पचत् ।**

(आत्, शतुः, नुम्, वा, शीनद्योः)

**सरलार्थः-** अवर्णान्ताद् अङ्गाद् उत्तरे स्थितो यः शतृप्रत्ययावयवः तदन्तस्य शीनद्योः परतः नित्यं नुमागमो भवति ।

### नुमागमविधायकं विधिसूत्रम्-

**शप्श्यनोर्नित्यम् । ७ । १ । ८१**

**शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः ।**

(शप्श्यनोः, आत्, शतुः, नित्यम्, नुम्)

**सरलार्थः-** शप्श्यनोर्विकरणप्रत्यययोः योऽकारः तस्मात्परः यः शतृप्रत्ययावयवः तदन्तस्य शीनद्योः परतः नित्यं नुमागमो भवति ।

**पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति ।**

**स्वप्/स्वब् । स्वपी । नित्यात्परादपि नुमः प्राक् 'अप्तृन्' इति दीर्घः, प्रतिपदोक्तत्वाद् नुम्, स्वाम्पि । 'निरवकाशत्वं**

**प्रतिपदोक्तत्वम्' इति पक्षे तु प्रकृते तद्विरहान्नुमेव । स्वम्पि । स्वपा । 'अपो भि' स्वद्भ्याम् । स्वद्भिः ॥**

**'अर्तिपृवपि (उ) इत्यादिना धनेरुस् । षत्वस्यासिद्धत्वाद्रुत्वम् धनुः । धनुषी । 'सान्त-' इति दीर्घः । 'नुम्विसर्जनीय' इति षत्वम् । धनूंषि । धनुषा । धनुर्भ्याम् । एवं चक्षुर्हविरादयः ।**

**पिपठिषते क्विप्, 'र्वोः-' इति दीर्घः । पिपठीः । पिपठिषी । अल्लोपस्य स्थानिवत्त्वाज्झलन्तलक्षणो नुम् न । स्वविधौ स्थानिवत्त्वाभावादजन्तलक्षणोऽपि नुम् न पिपठिषि । पिपठीर्भ्यामित्यादि पुंवत् ।**

**पयः । पयसी । पयांसि । पयसा । पयोभ्याम् इत्यादि । सुपुम् । सुपुंसी । सुपुमांसि । अदः विभक्तिकार्यम्, उत्वमत्वे - अमू । अमूनि । शेषं पुंवत् । इति सान्ताः ।**

इति हलन्तनपुंसकलिङ्गप्रकरणम्

**तुदत् - शब्दस्य रूपावली**

| | | |
|---|---|---|
| तुदत् | तुदन्ती/तुदती | तुदन्ति |
| तुदत् | तुदन्ती/तुदती | तुदन्ति |
| तुदता | तुदद्भ्याम् | तुदद्भिः |
| तुदते | तुदद्भ्याम् | तुदद्भ्यः |
| तुदतः | तुदद्भ्याम् | तुदद्भ्यः |
| तुदतः | तुदतोः | तुदताम् |
| तुदति | तुदतोः | तुदत्सु |
| हे तुदत् ! | हे तुदन्ती/तुदती ! | हे तुदन्ति ! |

**धनुष्शब्दस्य रूपावली**

| | | |
|---|---|---|
| धनुः | धनुषी | धनूंषि |
| धनुः | धनुषी | धनूंषि |
| धनुषा | धनुर्भ्याम् | धनुर्भिः |
| धनुषे | धनुर्भ्याम् | धनुर्भ्यः |
| धनुषः | धनुर्भ्याम् | धनुर्भ्यः |
| धनुषः | धनुषोः | धनुषाम् |
| धनुषि | धनुषोः | धनुष्षु / धनुःषु |
| हे धनुः ! | हे धनुषी ! | हे धनूंषि ! |

## रूपसाधनप्रकारः

**ददन्ति / ददति**

ददत्-शब्दात् "कृत्तद्धितसमसाश्च" इति प्रातिपदिकसंज्ञायां प्रथमाया बहुवचने जसि ददत् + जस् इत्यवस्थायां 'जश्शसोः शिः' इति जसः स्थाने 'शि' इत्यादेशे शस्य इत्संज्ञायां लोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे प्राप्ते 'नाभ्यस्ताच्छतुः' इति निषेधे 'वा नपुंसकस्य' इति विकल्पेन नुमि मित्त्वादन्त्यादचः परे 'नश्चापदान्तस्य झलि' इति अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णे ददन्ति इति, नुमभावे ददति इति द्वे रूपे साधु ।

## अभ्यासः

**१. निम्नाङ्कितसूत्राणामर्थं लिखत**

(क) वा नपुंसकस्य ।

(ख) आच्छीनद्योर्नुम् ।

(ग) शप्श्यनोर्नित्यम् ।

**२. अधोलिखितानां प्रश्नानामुत्तराणि लिखत**

(क) पचच्छब्दस्य रूपावलीं लिखत ।

(ख) वा नपुंसकस्य इत्यनेन किम् क्रियते ?

(ग) गवाक्-छब्दस्य ... ... ... इत्यादि श्लोकं पूरयत ।

(घ) तुदन्ती इत्यस्य रूपसिद्धिप्रकारं प्रदर्शयत ।

(ङ) पयश्शब्दस्य रूपाणि लिखत ।

अथ अव्ययप्रकरणे

# अव्ययशब्द-निरूपणम्

**अव्ययसंज्ञाविधायकं सूत्रम्-**

**स्वरादिनिपातमव्ययम् १ । १ । ३७**

**स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः ।**

(स्वरादिनिपातम्, अव्ययम्)

**सरलार्थः-** स्वरादिगणपठिताः शब्दाः, निपाताश्च अव्ययसंज्ञकाः भवन्ति ।

**स्वर् । अन्तर् । प्रातर् । पुनर् । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । स्वयम् । वृथा । नक्तम् । नञ् । हेतौ । इद्धा । अद्धा । सामि । वत्- ब्राह्मणवत् । क्षत्रियवत् । सना । सनत् । सनात् । उपधा । तिरस् । अन्तरा । अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्वस्ति । स्वधा । अलम् । वषट् । श्रौषट् । वौषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रबाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्ष्णम् । साकम् । सार्धम् । नमस् । हिरूक् । धिक् । अथ । अम् । आम् । प्रताम् । प्रशाम् । प्रतान् । मा । माङ् । आकृतिगणोऽयम् ।**

**च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । किञ्चित् । यत्र । नह । हन्त । माकिः । माकिम् । नकिः । (आकिम् नकिम्) माङ् । नञ् । यावत् । तावत् । त्वै । द्वै । न्वै । रै । श्रौषट् । वौषट् । स्वाहा (ओम्) । स्वधा । वषट् । तुम् । तथाहि । खलु । किल । अथो । अथ । सुष्ठु । स्म । आदह 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' (ग) अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथाकथाच । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । द्य । विषु एकपदे । युत् । आतः । चादिरप्याकृतिगणः । इति चादयः ।**

स्वर् = स्वर्गे परलोके च । अन्तर् = मध्ये । प्रातर् = प्रत्यूषे । पुनर् = अप्रथमे विशेषे च । सनुतर् = अन्तर्ध्याने एते पञ्च रेफान्तास्तेन 'स्वर्गच्छति' इत्यादौ 'हशि च' इति नोत्वम् । उच्चैस् महति वा उच्चस्थाने, नीचैस् = अल्पे वा नीचस्थाने । शनैस् = क्रियामान्द्ये । ऋधक् = सत्ये । ऋते = वर्जने, विना वा युगपत् = एककाले । आरात् = दूरसमीपयोः । पृथक् = भिन्ने । ह्यस् = अतीतेऽह्नि । श्वस् = अनागतेऽह्नि । दिवा = दिवसे । रात्रौ = निशि । सायम् = निशामुखे । चिरम् = बहुकाले । मनाक् ईषद् = अल्पे । जोषम् = सुखे मौने च । तूष्णीम् = मौने । बहिस् अवस् = बाह्ये । समया = समीपे मध्ये च । निकषा = अन्तिके (सामीप्ये) च ।

वृथा = व्यर्थे । नक्तम् = रात्रौ । नञ् = निषेधे । हेतौ = निमित्ते । इद्धा = प्राकाश्ये । अद्धा = स्फुटावधारणयोः । सामि = अर्धे जुगुप्सिते च । वत् इत्यनेन 'तेन तुल्यं क्रिया चेद्वति', 'तत्र तस्येव' 'तदर्हम्' इति सूत्रैर्विहितो वतिप्रययो गृह्यते ब्राह्मणवत्, क्षत्रियवत् इति वतिप्रत्ययस्योदाहरणम् । सना, सनत्, सनात् एतत्त्रयं नित्ये । उपधा भेदे ।

तिरस् पराभवेऽन्तर्धाने तिर्यगर्थे च । अन्तरा = मध्ये विनार्थे च । अन्तरेण = वर्जने । ज्योक् = कालभूयस्त्वे, शीघ्रार्थे, सम्प्रति इत्यर्थे च । कम् = वारिमूर्धनिन्दासुखेषु । शम् = सुखे । सहसा = आकस्मिकाविमर्शयोः । विना = वर्जने । नाना = अनेक-विनार्थयोः । स्वस्ति = मङ्गले । स्वधा = पितृहविर्दाने । अलम् = भूषण-पर्याप्ति-शक्ति-वारण-निषेधेषु । वषट्, वौषट्, श्रौषट् एतत्पदत्रयं = देवहविर्दाने । अन्यद् = अन्यार्थे । अस्ति = सत्तायाम् । उपांशु = अप्रकाशोच्चारणे रहस्ये च । क्षमा = क्षान्तौ । विहायसा = आकाशे । दोषा = रात्रौ । मृषा = मिथ्या इति पदद्वयं वितथे (असत्ये) । मुधा = व्यर्थे । पुरा = पूर्वकाले । मिथो मिथस् एतौ रहसि सहार्थे च । प्रायस् = बाहुल्ये । मुहुस् = पुनरर्थे । प्रबाहुकम् = समकाले ऊर्ध्वार्थे च । प्रवाहिका इति पाठान्तरम् । आर्यहलम् = बलात्कारे । अभीक्ष्णं = पौनःपुन्ये । साकम् सार्थम् एतौ सहार्थे । नमस् = नतौ । हिरूक् = वर्जने । धिक् = निन्दाभर्त्सनयोः । अथ = प्रारम्भे । अम् = शैघ्र्ये अल्पे च । आम् = अङ्गीकारे । प्रताम् = ग्लानौ । प्रशाम् = समानार्थे । प्रतान् = विस्तारे । मा, माङ् एतौ निषेधे । स्वरादिराकृतिगणः । अन्येऽप्येवं जातीयकाः स्वरादिगणे ज्ञेयाः । कामम् = स्वाच्छन्द्ये । साक्षात् = प्रत्यक्षे । अवश्यम् = निश्चये । चिराय, चिररात्राय, चिरस्य, चिरम्, चिरेण चिरात् इति षट्कं चिरार्थके । इत्यादयो ज्ञेयाः ।

च = समुच्चयादौ । वा = विकल्पे । ह = प्रसिद्धौ । अह = अद्‌भुते खेदे च । एव = अवधारणे अनवल्कृप्तौ च । एवम् = उक्तपरामर्शे । नूनम् = निश्चये तर्के च । शश्वत् = पौनःपुन्ये, नित्ये सहार्थे च । युगपत् = एककाले । भूयस् = पुनरर्थे आधिक्ये च । कूपत् = प्रश्ने प्रशंसायां च । कुवित् = भूर्यर्थे, प्रशंसायां च । नेत् = शङ्कायाम्, प्रतिषेधविचारसमुच्चयेषु च । चेत् = यद्यर्थे । चण् चेदर्थे । कच्चित् = इष्टप्रश्ने । यत्र = अनवल्कृप्त्यमर्षगर्हाश्चयेषु । नह = प्रत्यारम्भे । हन्त = हर्षे विषादे, अनुकम्पायाम्, वाक्यारम्भे च । माकिः, माकिम् नकिः एते वर्जने । माङ् = निषेधे । नङ् = निषेधे । यावत् तावत् = शाकल्यावधिमानावधारणेषु । त्वै = विशेषवितर्कयोः । द्वै = वितर्के । न्वै पाठान्तरमिदम् । रै = दाने अनादरे च । श्रौषट्, वौषट्, स्वाहा एते = देवहविर्दाने । स्वधा = पितृदाने । तुम् = तुङ्कारे । तथाहि = निदर्शने । खलु निषेधवाक्यालङ्कारनिश्चयेषु । किल = इवार्थे वार्तायाम् अलीके च । अथो, अथ = मङ्गलानन्तरारम्भप्रश्नकात्स्न्यार्धिकार-प्रतिज्ञासमुच्चयेषु । सुष्ठु = प्रशंसायाम् । स्म = अतीते पादपूरणे च । आदह = उपक्रमहिंसाकुत्सनेषु । उपसर्गप्रतिरूपकाः विभक्त्यन्तप्रतिरूपकाः, अच्प्रतिरूपकाश्च चादिगणे पाठ्या इत्यर्थः । अवदत्तम् दत्तम् इत्यर्थे अत्र 'अव' इति उपसर्गप्रतिरूपकम् । अहंयुः = (अहङ्कारवान्) 'अहम्' इति सुबन्तप्रतिरूपकम् । अस्तिक्षीरा विद्यमानदुग्धा, 'अस्ति' इति तिङन्तप्रतिरूपकम् । अ = सम्बोधने । आ = वाक्यस्मरणयोः । इ = सम्बोधनजुगुप्साविस्मयेषु । ई, उ, ऊ, ए, ऐ, ओ, औ इति एते सम्बोधने । 'अ-अ-इ' इत्यादय स्वरप्रतिरूपकाणामुदाहरणानि । पशु = सम्यगर्थे ।

शुकम् = शीघ्रतायाम् । पाट्, प्याट्, अङ्ग, है, हे, भोः, अये एते सप्त सम्बोधने । द्य = हिंसाप्रतिलोमपादपूरणेषु । विषु नानार्थे । एकपदे = एकस्मादित्यर्थः । युत् = कुत्सायाम् । आत = इतोऽर्थे । चादिरप्याकृतिगण इति ।

### अव्ययसंज्ञाविधायकं सूत्रम्-

**तद्धितश्चासर्वविभक्तिः १ । १ । ३८**

**यस्मात्सर्वाविभक्तिर्नोपद्यते स तद्धितान्तोऽव्ययं स्यात् ।**

**परिगणनं कर्तव्यम् - 'तसिलादयः, प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः, अम्, आम्, कृत्वोऽर्थाः, तसिवती नानाञौ' इति । तेनेह न-पचतिकल्पम् । पचतिरूपम् ।**

(असर्वविभक्तिः, तद्धितः, च, अव्ययम्)

**सरलार्थः-** यस्मात् तद्धितप्रत्ययान्तशब्दात् सर्वे विभक्तिप्रत्ययाः न विधीयन्ते तस्य अव्ययसंज्ञा भवति ।

यस्मात् सर्वा विभक्तयो न भवन्ति इति असर्वविभक्तिः । असर्वविभक्तिस्तद्धितान्तः शब्दः अव्ययं भवति । 'पञ्चम्यास्तसिल्' इत्यारभ्य 'द्वित्र्योश्च धमुञ्' इति यावत् ये प्रत्यया विहितास्ते तसिलादयः । 'बह्वल्पार्थात्' इत्यारभ्य अव्यक्तानुकरणात् इति यावत् ये प्रत्यया विहिता ते शस्प्रभृतय इत्यर्थः । 'अमु च च्छन्दसि' इत्यस्मात् 'अम्' इति गृह्यते । 'किमेत्तिङव्यय-' इत्यस्मात् 'आम्' इति गृह्यते । 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्', 'द्वि-त्रि-चतुर्भ्यः सुच्' 'विभाषा बहोर्धा' इति सूत्रैर्विहिताः प्रत्ययाः कृत्वोऽर्थाः । 'तेनैकदिक् तसिश्च' इत्यनेन विहितस् 'तसि', 'तेन तुल्यं क्रिया चेद् वति' इत्यनेन विहितो वतिश्च गृह्येते । 'वि-नञ्-भ्यां नानाञौ न सह' इति विहितौ ना-नाञौ प्रत्ययौ गृह्येते । अव्ययसंज्ञाविधायकं सूत्रम्-

**कृन्मेजन्तः १ । १ । ३९**

**कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात् । स्मारं स्मारम् । जीवसे । पिबध्यै ।**

(कृद्-म-एजन्तः, अव्ययम्)

**सरलार्थः-** यः कृत्प्रत्ययः मकारान्तः एचप्रत्यहारान्तश्च अस्ति तदन्तः शब्दः अव्ययसंज्ञको भवति । यथा णमुलप्रत्ययस्य अनुबन्धलोपे अम् इति मान्तः प्रत्ययोऽवशिष्यते अतः तदन्तम् स्मारम् स्मारम् इति शब्दः अव्ययसंज्ञको भवति । तथैव असे, कध्यै इति प्रत्ययद्वयम् एजन्तम् अस्ति, तस्मात् जीवसे, पिबध्यै इत्यनयोः अव्ययसंज्ञा भवति ।

### अव्ययसंज्ञाविधायकं सूत्रम्-

**क्त्वातोसुन्कसुनः १ । १ । ४०**

**एतदन्तमव्ययं स्यात् ।**

**कृत्वा । उदेतोः । विसृपः ।**

(क्त्वातोसुन्कसुनः, अव्ययम्)

**सरलार्थः-** क्त्वान्तम्, तोसुन्कसुन्नन्तं च कृदन्तं पदम् अव्ययसंज्ञं भवति । यथा- क्त्वाप्रत्ययान्तस्य कृत्वा, तोसुन्प्रत्ययान्तस्य उदेतोः, कसुन्प्रत्ययान्तस्य विसृपः इति च उदाहरणानि ।

### अव्ययसंज्ञाविधायकं सूत्रम्-

**अव्ययीभावश्च १ । १ । ४१**

**अधिहरि ।**

(अव्ययीभावश्च अव्ययम्)

**सरलार्थः-** अव्ययीभावसमासस्य अव्ययसंज्ञा भवति ।

### आप्सुपो लुग्विधायकं विधिसूत्रम्-

**अव्ययादाप्सुपः २ । ४ । ८२**

**अव्ययाद् विहितस्यापः सुपश्च लुक् स्यात् ।**

**तत्र शालायाम् । विहितविशेषणान्नेह - अत्युच्चैसौ ।**

**अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति, तथापि न गौणे । आब्ग्रहणं व्यर्थम्, अलिङ्गत्वात् (वा) ।**

(अव्ययाद्, आप्सुपः, लुक्)

**सरलार्थः-** अव्ययशब्दाद् विहितस्य आपः सुपश्च लुक् भवति ।

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।**

**इति (भाष्योक्ता) श्रुतिर्लिङ्गकारकसङ्ख्याऽभावपरा ।**

**वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।**

**आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥**

**वगाहः - अवगाहः । पिधानम् - अपिधानम् ।**

यः शब्दः पुंलिङ्गेषु, स्त्रीलिङ्गेषु नपुंसकलिङ्गेषु च, सर्वासु विभक्तिषु, सर्वेषु वचनेषु च तुल्यरूपो भवति विकारं न प्राप्नोति स शब्दः अव्ययमिति कथ्यते । यथा 'प्रातर्' इति शब्दात् सर्वासु विभक्तिषु, सर्वेषु वचनेषु च स्वादिप्रत्यया जायन्ते । 'प्रातर्' इत्यस्य अव्ययत्वात् 'अव्यया दाप्सुपः' इति सुपो लुक् क्रियते । तेन प्रातः, इति रूपं सर्वासु विभक्तिषु सर्वेषु वचनेषु भवति । एवमेव सर्वेषु लिङ्गेषु च समानं रूपं दृश्यते । यथा नाना पुरुषाः । नाना वस्त्राणि । नाना नार्यः ।

भागुरिनामक आचार्यः अव्ययशब्दे ‘अव’ ‘अपि’ इत्युपसर्गयोः अकारस्य लोपं करोति । हलन्तानाम् आबन्तत्वम् इच्छति । यथा अवगाह इत्यस्य वगाहः अपिधानमित्यस्य पिधानम् । निश्-वाच् दिश्शब्दानां स्थाने निशा, वाचा दिशा इति । पाणिनिमते तु ‘अवगाहः’ ‘अपिधानम्’ इत्येव साधु निशा वाचा दिशा इति । इदं च ‘परिगणनम्’ इति केचित् कथयन्ति । उदाहरणमात्रम् इति अन्ये वदन्ति ।

## रूपसाधनप्रकारः

**स्वः**

‘स्वर्’ - शब्दात् सु-विभक्तौ ‘स्वरादिनिपातमव्ययम्’ इति सूत्रेण अव्ययसंज्ञायाम् ‘अव्ययादाप्सुपः’ इति सोर्लुकि रेफस्य ‘खरवसानयोर्विसर्जनीयः’ इति विसर्गे ‘स्वः’ इति रूपम् साधु ।

**जीवसे**

‘जीवसे’ इति कृदन्तात् सु-विभक्तौ ‘कृन्मेजन्तः’ इति सूत्रेण जीवसे इत्यस्य अव्ययसंज्ञायाम् ‘अव्ययादाप्सुपः’ इति सूत्रेण सोर्लुकि जीवसे इति रूपम् सिद्धम् ।

## अभ्यासः

१. 'अव्ययादाप्सुपः' इति सूत्रस्यार्थं लिखत ।

२. तोसुन्-कसुन्-क्त्वान्तानां शब्दानां केन सूत्रेण अव्ययसंज्ञा भवति ?

३. मान्ता एजन्ताश्च कृदन्तशब्दाः केन सूत्रेण अव्ययसंज्ञका भवन्ति ?

४. 'सदृशं त्रिषु लिङ्गेषु' इत्यादिश्लोकस्य सरलार्थं लिखत ।

५. कस्य मते 'पिधानम्' वगाहः शब्दौ साधू मन्येते ?

६. स्वरादिगणे पठितान् दश शब्दान् लिखत ।

७. 'तद्धितश्चासर्वविभक्तिः' इति सूत्रस्यार्थं लिखत ।

८. समानार्थेन सह परस्परं मेलयत

| (अ) | (आ) |
|---|---|
| प्रातः | सत्यम् । |
| श्वः | निशि । |
| ऋधक् | प्रत्यूषः । |
| रात्रौ | अतीतदिनम् । |
| ह्यः | आगामिदिनम् । |

९. अर्थं लिखत -

युगपत्, जोषम्, अन्तरा, भूयः, अभीक्ष्णम्, दोषा, प्रबाहुकम्, साक्षात् ।

१०. 'कृत्वा' इति शब्दस्य अव्ययप्रक्रियां प्रदर्शयत ।

११. प्रातर्, ईषत्, प्रायस् एतेषां वाक्येषु प्रयोगं कुरुत ।

अथ स्त्रीप्रत्ययप्रकरणे

# स्त्रीत्वबोधकयोर्टाब्ङीपोर्निरूपणम्

### अधिकारसूत्रम्

**स्त्रियाम् ४ । १ । ३**

**अधिकारोऽयम् । समर्थानामिति यावत् ।**

**सरलार्थः –** 'अजाद्यतष्टाप्' इत्याद्युत्तरसूत्रेष्वनुवृत्यर्थमिदं सूत्रम्, न तु स्वतन्त्रविधिः । 'समर्थानां प्रथमाद् वा' इति सूत्रतः प्राक् 'स्त्रियाम्' इत्यस्याधिकारो बोध्यः ।

### टाप्प्रत्ययविधायकं विधिसूत्रम्

**अजाद्यतष्टाप् ४ । १ । ४**

**अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् । अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय । अजा । अतः, खट्वा । अजादिभिः स्त्रीत्वस्य विशेषणान्नेह - पञ्चाजी । द्विगोः (४।१।२) इति ङीप् । अत्र हि समासार्थसमाहारनिष्ठं स्त्रीत्वम् । अजा । एडका । अश्वा । चटका । मूषिका । एषु जातिलक्षणो ङीष् प्राप्तः । बाला । वत्सा । होडा । मन्दा । विलाता । एषु, वयसि प्रथमे ४।१।२०) इति ङीप् प्राप्तः ।**

(अजाद्यतः, प्रातिपदिकात्, टाप्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** अजादिगणपठितात्, अकारान्तप्रातिपदिकाच्च स्त्रियां टाप्प्रत्ययो भवति । टाप् इत्यत्र पकारटकारौ इत्संज्ञकौ ।

अजादिगणे अज-अश्वादीनामदन्तशब्दानां पाठो व्यर्थः, अदन्तत्वादेव टाप्प्रत्ययसिद्धेरिति जिज्ञासायामाह - अजाद्युक्तिरिति । अस्यायम्भावः 'वयसि प्रथमे' 'जातेरस्त्रीविषयात्' इत्यादेः वक्ष्यमाणस्य ङीपो ङीषश्च अदन्तटाबपवादस्य बाधनार्थमजादिग्रहणमिति । तथा च अदन्तटाबपवादौ ङीप्ङीषौ, ङीप्ङीषोरप्यजादिटाबपवाद इति फलति । अजशब्दात् स्त्रीत्वविवक्षायां 'टाप्'प्रत्यये पकारटकारयोरित्संज्ञायां लोपे च कृते 'अज + आ' इति स्थिते सवर्णदीर्घे **'अजा'** इति भवति । अदन्तस्योदाहरणम् - **खट्वा** इति । खट्वशब्दात् टापि अनुबन्धलोपे सवर्णदीर्घे **'खट्वा'** इति । अजादिभिरिति अत्र सूत्रे अजाद्यत इति षष्ठीमाश्रित्य अजादीनामदन्तस्य च वाच्ये स्त्रीत्वे टाबित्येवं रूपेण अजादिभिः स्त्रीत्वस्य विशेषणात् 'पञ्चाजी' इत्यत्र टाब् न भवति । यतो हि - पञ्चानामजानां समाहार इति विग्रहे 'तद्धितार्थोत्तर-' इत्यादिना द्विगुसमासे "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः" इति स्त्रीत्वे 'द्विगोः' इति ङीप्यनुबन्धलोपे "यस्येति च" इत्यकारलोपे स्वादिकार्ये च **'पञ्चाजी'** इति भवति । अत्र समासे

अजशब्दस्य सत्त्वात्तद्वाच्यमेव स्त्रीत्वमिति तु न वक्तुं शक्यम् पञ्चाजशब्दे समासार्थभूतो यः समाहारस्तन्निष्ठं स्त्रीत्वं पञ्चाजेति समुदायस्य वाच्यं न त्वजशब्दस्येति स्वीकारात्, अतोऽत्र न टाबिति ज्ञेयम् । अजादि पञ्चसु 'जातेरस्त्री' इति ङीष् प्राप्तः, स अजादिटापा बाध्यते । एवं बालवत्सादिशब्दानां प्रथमवयोवाचकत्वाद् 'वयसि प्रथमे' इत्यनेन ङीप् प्राप्तः, स अजादिटापा बाध्यत इत्यर्थः ।

**सम्भस्त्राजिनशणपिण्डेभ्यः फलात्** (वा.)

**सम्फला । भस्त्रफला । 'ङ्यापोः-' इति ह्रस्वः ।**

**सरलार्थः –** सम्, भस्त्र, अजिन, शण, पिण्ड एतेभ्यः प्रातिपदिकेभ्यः परो यः फलशब्दः तस्मात् टाप् स्यात् । 'पाककर्ण' इति ङीषोऽपवादः । समृद्धानि फलानि यस्याः, इति विग्रहे सम्फलशब्दाट्टापि **'सम्फला'** इति, भस्त्रा चर्मप्रवेशिका) भस्त्रेव फलानि यस्या इति विग्रहे 'भस्त्राफला' इत्यवस्थायां "ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्" इति सूत्रेण ह्रस्वो भवतीति बोध्यम् ।

**सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्** (वा.)

**सत्पुष्पा । प्राक्पुष्पा । प्रत्यक्पुष्पा ।**

**सरलार्थः –** सत्, अच्, काण्ड, प्रान्त, शत, एक एतेभ्यः प्रातिपदिकेभ्यः परो यः पुष्पशब्दः तस्मात् टाप् स्यात् । 'पाककर्णपर्ण' इति ङीषोऽपवादः । सन्ति पुष्पाणि यस्या इति विग्रहेः, प्राञ्चि पुष्पाणि यस्या इति विग्रहे, प्रत्यञ्चि पुष्पाणि यस्या इति विग्रहे च सर्वत्रैव टापि स्वादिकार्ये रूपसिद्धिः ।

**शूद्रा चामहत्पूर्वा जातिः** (वा.)

पुंयोगे तु शूद्री । 'अमहत्पूर्वा' इति किम् ? **महाशूद्री । क्रुञ्चा । उष्णिहा । देवविशा । ज्येष्ठा । कनिष्ठा । मध्यमे**ति पुंयोगेऽपि । कोकिला जातावपि ।

**सरलार्थः –** अमहत्पूर्वः शूद्रशब्दः स्त्रियां टापं लभते जातौ गम्यमानायाम् । जातिलक्षणङीषोऽपवादः, शूद्रात् स्वभार्यायां विधिना ऊढायामुत्पन्ना स्त्री **शूद्रा** । 'शूद्रस्य स्त्री' इति विग्रहे तु जातिवाचित्वाभावान्न टाप्, किन्तु 'पुंयोगादाख्याम्' इति ङीषेव । महती च सा शूद्रा चेति विग्रहे तु महत्पूर्वत्वान्न टाप्, किन्तु जातिलक्षणङीषेवेति बोध्यम् । क्रुञ्च् - उष्णिह् - देवविश्शब्दानामदन्तत्वाभावात् पूर्वसूत्रेणाऽप्राप्तौ गणे पाठः, टाब्विधानायेति ज्ञेयम् । ज्येष्ठादिशब्दानां प्रथमोत्पन्नादौ तु अदन्तत्वादेव टाप् सिद्ध्यति, ज्येष्ठस्य स्त्रीत्वादिविवक्षायां तु "पुंयोगादाख्यायाम्" इति पुंयोगलक्षणङीषं निवार्य टाबर्थमजादिगणे पाठो बोध्यः ।

**मूलान्नञः** (वा.)

**अमूला ।**

**सरलार्थः –** नञः परो य मूलशब्दः तस्मात् टाप् स्यात्, 'पाककर्ण-' इति ङीषोऽपवादः । 'अविद्यमानं मूलं यस्या' इति विग्रहे अमूलशब्दाट् टापि स्वादिकार्ये **'अमूला'** इति भवति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**ऋन्नेभ्यो ङीप् ४ । १ । ५**

**कर्त्री । दण्डिनी ।**

(ऋन्नेभ्यः, ङीप्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् । तथा च कर्तृशब्दाद् ङीपि अनुबन्धलोपे कर्तृ + ई इति स्थिते यणि '**कर्त्री**' इति रूपम् । अस्य सूत्रस्य व्याख्यानमजन्तस्त्रीलिङ्गे एव विहितं प्रसङ्गतोऽत्र निर्देशः ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**उगितश्च ४ । १ । ६**

**उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात् । भवती । पचन्ती । शप्श्यनोः (७ । १ । ८१) इति नुम् । उगिदचाम् (७ । १ । ७०) इति सूत्रेऽज्ग्रहणेन 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति नियम्यते । तेनेह न उखास्रत् । क्विप् अनिदिताम् - (६ । ४ । २४) इति नलोपः पर्णध्वत् । अञ्चतेस्तु स्यादेव, प्राची प्रतीची ।**

(उगितः, च, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** उक् इति प्रत्याहारः, उक् इत् यस्य स उगित् उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति । उगिद् द्विविधं प्रातिपदिकं प्रत्ययश्च, तत्र प्रातिपदिकस्योदाहरणं भवतीति । सर्वादिगणे पठितस्य 'भवतु' इत्यव्युत्पन्नप्रातिपदिकस्यात्र ग्रहणम्, तस्य व्यपदेशिवत्त्वेन उगिदन्तत्वाद् ङीप्, ङपावितौ स्वादिकार्ये **भवतीति** । द्वितीयोदाहरणम् **पचन्ती**ति । पच् धातोर्लटि शतरि शपि पररूपे 'पचत्' इति । अत्र शतृप्रत्ययः उगित्, तदन्तं 'पचत्' इति प्रातिपदिकं तस्माद् ङीपि 'शप्श्यनोर्नित्यम्' इति नुम् भवतीत्याऽऽशयो बोध्यः । 'उगिदचाम्-' इति सूत्रेऽज्ग्रहणेन 'अञ्चुव्यतिरिक्तधातोरुगित्कार्याभावलाभेन' 'उखायाः' 'स्रंसते पर्णाद् ध्वंसते' इति विग्रहे 'उखास्रत् पर्णध्वत्' शब्दौ निष्पद्येते । प्रपूर्वाद् अञ्चतेः क्विन्प्रत्यये 'अनिदिताम्-' इति नलोपे उगिदन्ताद् ङीपि अकारलोपे 'चौ' इति दीर्घे प्राची एवमेव 'प्रतीची' इत्यपि ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**वनो र च ४ । १ । ७**

**वन्नन्तात्तदन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् स्यात्, रश्चान्तादेशः । वन्निति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणम् । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् (परि.) । तेन प्रातिपदिकविशेषणात् तदन्तान्तमपि लभ्यते । सुत्वानमतिक्रान्ता, अतिसुत्वरी । अतिधीवरी । शर्वरी ।**

(वनः, प्रातिपदिकाद्, स्त्रियाम्, ङीप्, र च)

**सरलार्थः –** ङ्वनिप् - क्वनिप् - वनिप् - प्रत्ययान्तं यत्तदादि तदन्तं यत् प्रातिपदिकं तस्मात् स्त्रियां ङीप् स्यात् रेफश्चान्तादेशः । प्रत्ययग्रहणपरिभाषाया अर्थस्तु - यस्मात् प्रकृतिभूतात् शब्दाद् यः प्रत्ययो विहितः,

स प्रकृतिभूतः शब्द आदिर्यस्य तस्य, स प्रत्ययः अन्तो यस्य समुदायस्य तस्य च ग्रहणमिति। परिभाषया प्रकृतिप्रत्ययसमुदायस्य तन्मध्यवर्तिनश्च ग्रहणं भवतीति बोध्यम्। 'सुत्वानमतिक्रान्ता' इति विग्रहे 'अत्यादयः-' इति समासे सुब्लुकि ङीपि नकारस्य रत्वे '**अतिसुत्वरी**ति' भवति। एवं धीवानमतिक्रान्ता इति विग्रहे समासे सुब्लुकि ङीपि नस्य रत्वे **अतिधीवरी**ति भवति। शॄ धातोर्वनिप्प्रत्यये गुणे रपरत्वे च 'शर्वन्' शब्दाद् वन्नन्ताद् ङीपि नकारस्य रत्वे च कृते '**शर्वरी**' इति भवति।

**वनो न हश इति वक्तव्यम्** (वा.)

हशन्ताद्धातोर्विहितो यो वन् तदन्तात्, तदन्तान्ताच्च प्रातिपदिकात् ङीप् रश्च नेत्यर्थः। 'ओणृ अपनयने' वनिप् 'विड्वनोः' इत्यात्वम्। **अवावा** ब्राह्मणी। **राजयुध्वा**।

ऋकारेत्संज्ञकाद् ओण्धातोः वनिप्प्रत्ययेऽनुबन्धलोपे 'विड्वनोरनुनासिकस्यात्' इति णकारस्य आत्त्वे ओकारस्यावादेशे 'अवावन्' इति अत्र 'हशन्ताद् वन् विहितः, तदन्तत्वान्न ङीब्रत्वे किन्तु राजवद्रूपमिति बोध्यम्। एवं राजानं योधितवतीत्यर्थे राजनि उपपदे युधेः क्वनिप्प्रत्ययेऽनुबन्धलोपे उपपदसमासे सुब्लुकि 'राजयुध्वन्' शब्दः। अत्र हशन्ताद्धातोर्विहितो वन् तदन्तो युध्वन्शब्दः तदन्तो 'राजयुध्वन्' शब्दः, अतो न ङीब्रादेशौ इति बोध्यम्।

**बहुव्रीहौ वा** (वा.)

**बहुधीवरी, बहुधीवा। पक्षे डाब्वक्ष्यते।**

**सरलार्थः** –'वनो र च' इति विधिः, बहुव्रीहौ वा भवति। 'बहवो धीवानो यस्याः' इति विग्रहे ङीब्रत्वे बहुधीवरीति रूपं भवति। ङीब्रत्वाभावपक्षे तु डाबुभाभ्यामन्यतरस्यामिति वक्ष्यमाणेन डाप्प्रत्ययेऽनुबन्धलोपे 'बहुधीवन् आ' इति स्थिते 'टेः' इति सूत्रेण टिलोपे बहुधीवाशब्दात् स्वादिकार्ये रमावद्रूपं बोध्यम्। ङीब्रत्वयोः डापश्चाभावे बहुधीवेत्येव राजवद्रूपं भवति।

### विभाषया ङीप्प्रत्ययविधायकं विधिसूत्रम्

**पादोऽन्यतरस्याम् ४।१।८**

**पाच्छब्दः कृतसमासान्तस्तदन्तात् प्रातिपदिकाद् ङीब्वा स्यात्। द्विपदी, द्विपाद्।**

(पादः, प्रातिपदिकात्, ङीप्, स्त्रियाम्, अन्यतरस्याम्)

**सरलार्थः** – कृतसमासान्तात् पाच्छब्दान्तात् प्रातिपदिकाद् विभाषया ङीप्प्रत्ययो भवति।

द्वौ पादौ यस्या इति विग्रहे बहुव्रीहिसमासे 'सङ्ख्यासुपूर्वस्य' इति पादशब्दान्तस्याकारस्य लोपे ङीपि भत्वात् 'पादः पत्' इति पदादेशे '**द्विपदी**ति' भवति। ङीबभावे तु **द्विपादि**ति।

### टाप्प्रत्ययविधायकं विधिसूत्रम्

**टाबृचि ४ । १ । ९**

**ऋचि वाच्यायां पादन्ताट्टाप् स्यात् । द्विपदा ऋक्, एकपदा ।**

(ऋचि, पादः, प्रातिपदिकात्, स्त्रियाम्, टाप्)

**सरलार्थः–** ऋचौ वाच्यायां सत्यां पादन्तात् प्रातिपदिकात् टाप्प्रत्ययो भवति ।

पादोऽन्यतरस्यामित्यस्यापवादोऽयं विधिः । एवञ्च द्वौ पादौ यस्या इति, एकः पादो यस्या इति च विग्रहे उभयत्रापि टाप्प्रत्यये अनुबन्धलोपे 'पादः पत्' इति पदादेशे **द्विपदा** । **एकपदा,** इति सिध्यतः ।

**न षट्स्वस्रादिभ्यः ४ । १ । १० पञ्च । चतस्रः ।**

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः । अस्य सूत्रस्य व्याख्यानमजन्तस्त्रीलिङ्गप्रकरणे विहितमस्ति तत एवावगन्तव्यम् ।

'पञ्च' इत्यत्र नलोपे कृतेऽपि "ष्णान्ता षट्" १ । १ । २४ इति षट्संज्ञां प्रति "नलोपः सुप्स्वर-" ८।२।२) इति नलोपस्यासिद्धत्वाद् 'न षट्स्वस्रादिभ्यः' इति न टाप् ।

'पञ्च' इत्यत्रान्तरङ्गत्वाद् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते षट्त्वान् 'न षट्स्वस्रादिभ्यः' इति निषेधे 'षड्भ्यो लुक्' इति जश्शसोर्लुकि नलोपो भवति । 'चतस्र' इत्यत्र चतस्रादेशे ऋदन्तत्वान्ङीपि प्राप्तौ 'न षट्स्वस्रादिभ्यः' इति निषेधः । ननु 'न षट्स्वस्रादिभ्यः' इति ङीबेव प्रतिषिध्यताम् किं टाबनुवृत्त्या, नान्तत्वात् टापः प्रसक्तेरभावेन तन्निषेधवैयर्थ्यादित्याशङ्कायामाह 'पञ्च' इत्यत्र नलोपे कृत इत्यादि । नान्तलक्षणङीपि प्रतिषिद्धे सति जश्शसोर्लुकि नलोपे कृते अदन्तत्वात् प्राप्तस्य टापः प्रतिषेधार्थमिह टाबनुवृत्तिरावश्यकीति बोध्यम् ।

## विशेषाध्ययनम्

१. **स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥**

इति लक्षणलक्षितम् अवयवसंस्थानविशेषात्मकं लौकिकं स्त्रीपुंसयोर्लिङ्गम् । तदभावे = तयोरुभयोरभावे सति यदुभयोरन्तरं = सदृशं तन्नपुंसकमित्यर्थः । तदिदं लौकिकं लिङ्गमस्मिन् शास्त्रे नोपयुज्यते, उपरि निर्दिष्टस्य स्त्रीत्वस्याचेतने खट्वामालादौ बाधात् स्त्रीप्रत्ययानापत्तेः, 'दारान्' इत्यादौ "तस्माच्छसो नः पुंसि" इति नत्वानापत्तेश्च । किन्तु सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वम्, अपचयः स्त्रीत्वम्, स्थितिमात्रं नपुंसकत्वं बोध्यम् । अत एव उत्कर्षापकर्षसत्त्वेऽपि स्थितिमात्रमादाय 'सामान्ये नपुंसकम्' इति भवति । उत्कर्षापकर्षसाम्यात्मकावस्थात्रयसाधारणस्थितिमात्रविवक्षायां नपुंसकं भवतीत्याऽऽशयस्तस्येत्यपि ज्ञेयम् ।

२. अजादीनामदन्तस्य च वाच्यं स्त्रीत्वं यत्र तत्र द्योत्ये टाप् भवतीत्यर्थस्वीकारेण 'पञ्चाजी' इत्यत्र अजशब्दस्य विद्यमानत्वेऽपि पञ्चाजशब्दे समासार्थभूतसमाहारनिष्ठस्य स्त्रीत्वस्य पञ्चाजेति समुदायवाच्यत्वादजशब्दवाच्यत्वाभावाच्च "अजाद्यतष्टाप्" इति सूत्रस्य प्रवृत्तिर्न भवति ।

## प्रयोगसिद्धिप्रकारः

### सम्फला

'समृद्धानि फलानि यस्या' इति विग्रहे 'सम्फल'शब्दात् स्त्रीत्वविवक्षायां 'सम्भस्त्राजिन-शणपिण्डेभ्यः फलात्' इति वार्तिकेन 'टाप्' प्रत्ययेऽनुबन्धलोपे सवर्णदीर्घे 'सम्फला' इत्यस्य लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वात् सौ हल्ङ्यादिलोपे 'सम्फला' इति सिद्ध्यति । अत्र 'पाककर्ण-' इति सूत्रेण ङीप् प्राप्तोऽनेन निषिध्यते ।

## अभ्यासः

### १. अधस्तनप्रश्नानामुत्तराणि दत्त

(क) 'अजाद्यतष्टाप्' इति सूत्रेण कुत्र टाप् भवति ।

(ख) 'शूद्रा चामहत्पूर्वा जातिः' इत्यत्र 'अमहत्पूर्वा' इत्यस्य किं प्रयोजनम् ।

(ग) बाला, वत्सा इत्यत्र केन ङीप् प्राप्तः ? 'अजाद्यतष्टाप्' इत्यनेन कथं निषिध्यते ।

(घ) 'उगिदचाम्-' इति सूत्रेऽज्ग्रहणेन किं नियम्यते ।

(ङ) 'पञ्च' इत्यत्र टाप्-प्रत्ययस्य निषेधः केन सूत्रेण ?

(च) 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' अस्याः परिभाषायाः कार्यं किम् ?

### २. अधस्तनशब्दानां सिद्धिप्रक्रियां दर्शयत

चटका, दण्डिनी, पचन्ती, शर्वरी, द्विपदी ।

### ३. अधस्तनसूत्राणामर्थं निर्दिशत

(क) अजाद्यतष्टाप् ।    (ख) उगितश्च ।

(ग) वनो र च ।

## ४. अधस्तनवार्तिकानामर्थं निर्दिशत

(क) सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् ।

(ख) मूलान्नञः ।

(ग) वनो न हश इति वक्तव्यम् ।

## ५. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं दर्शयत

(क) 'स्त्रियाम्' इत्यस्य 'समर्थानां प्रथमाद् वा' इति सूत्रपर्यन्तमधिकारः ।

(ख) अजादिभिः स्त्रीत्वस्य विशेषणात् 'पञ्चाजी' इत्यत्र टाप् न भवति ।

(ग) 'महाशूद्री' इत्यत्र टाप् भवति ।

(घ) 'ऋन्नेभ्यो ङीप्' इति सूत्रं ङीब्विधायकम् ।

(ङ) 'न षट्स्वस्रादिभ्यः' इति सूत्रेण टाब् भवति ।

(च) व्याकरणशास्त्रे लौकिकं लिङ्गमुपयुज्यते ।

## ६. रिक्तस्थानं पूरयत

(क) महती च सा शूद्रा इति विग्रहे ... ... ... भवति । (टाप्, जातिलक्षणङीष्)

(ख) कर्तृशब्दात् ... ... ... इति सूत्रेण ङीप् प्रत्यये ... ... ... इति रूपं भवति ।

(ग) 'पचन्ती' इत्यत्र ... ... ... इति सूत्रेण ङीप् भवति । (उगितश्च, ऋन्नेभ्यो ङीप्)

(घ) 'बहवो धीवानो यस्या' इति विग्रहे ... ... ... इति रूपं भवति । (बहुधीवरी, अतिधीवरी)

(ङ) 'अवावा' इत्यत्र 'अवावन्' इत्यवस्थायां 'विड्वनोरनुनासिकस्यात्' इति सूत्रेण ... ... ... भवति । (आत्वम्, टाप्)

स्त्रीप्रत्ययप्रकरणे

# आपि परे इकारादेशादिनिरूपणम्

### ङीप्प्रत्ययनिषेधविधायकम्

**मनः ४ । १ । ११**

**मन्नन्तान्न ङीप् । सीमा । सीमानौ ।**

(मनः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, न)

**सरलार्थः –** मन्नन्तात् प्रातिपदिकाद् ङीप् प्रत्ययो न भवति ।

सीमन्शब्दाद् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्तौ अनेन सूत्रेण निषेधे स्वादिकार्ये 'सीमा' इति रूपं स्यादेवेति ङीब्निषेधो व्यर्थ इति शङ्कासमाधानाय द्विवचनस्य रूपं निर्दिशति 'सीमानौ' इति अत्र डापि सति टिलोपे स्वादिकार्ये रमाशब्दवत् 'सीमे' इति रूपं स्यात् तन्माभूदित्येतदर्थम् अस्य सूत्रस्यारम्भः ।

### ङीप्प्रत्ययनिषधकं सूत्रम्

**अनो बहुव्रीहेः ४ । १ । १२**

**अन्नन्ताद् बहुव्रीहेर्न ङीप् । बहुयज्वा । बहुयज्वानौ ।**

(अनः, बहुव्रीहेः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, न)

**सरलार्थः–** अन्नताद् बहुव्रीहेः प्रातिपदिकाद् ङीप्प्रत्ययो न भवति ।

'बहवो यज्वानो यस्याः' इति विग्रहे 'बहुयज्वन्' शब्दात् स्त्रीत्वविवक्षायाम् - 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते तस्य निषेधे स्वादिकार्ये 'बहुयज्वा, बहुयज्वानौ' इति रूपे भवतः ।

### विभाषया डाप्प्रत्ययविधायकं विधिसूत्रम्

**डाबुभाभ्यामन्यतरस्याम् ४ । १ । १३**

**सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात् । सीमा । सीमे/सीमानौ । दामा । दामे/दामानौ । 'न पुंसि दाम' इत्यमरः । बहुयज्वा । बहुयज्वे/बहुयज्वानौ ।**

(उभाभ्याम्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, अन्यतरस्याम्, डाप्)

**सरलार्थः–** 'मनः' इति 'अनो बहुव्रीहेः' इति च सूत्रद्वयोपात्ताद् मन्नन्तादन्नन्तबहुव्रीहेश्च विभाषया डाप् प्रत्ययो भवति । तथा च सीमन् शब्दाड् डापि, टिलोपे सीमाशब्दात् सौ 'हल्ङ्याब्भ्यो दीर्घाद्' इति सोर्लोपे 'सीमा' इति भवति । डाबभावपक्षेऽपि 'मनः' इति ङीब्निषेधे 'सीमा' इत्येव रूपं भवति । डाब्विधेः फलं तु 'सीमे' 'सीमानौ' इति रूपद्वयम् । एवमेव दामन् शब्दाड् डापि 'दामा, दामे/दामानौ' इत्याद्यपि बोध्यम् ।

### विभाषया ङीप्प्रत्ययविधायकं विधिसूत्रम्

**अन उपधालोपिनोऽन्यन्तरस्याम् ४ । १ । २८**

**अन्नन्ताद् बहुव्रीहेरुपधालोपिनो वा ङीप् स्यात् । पक्षे डाब्ङीब्निषेधौ । बहुराज्ञी/बहुराजा । बहुराज्ञ्यौ/बहुराजे/बहुराजानौ ।**

(अनः, बहुव्रीहेः, उपधालोपिनोऽन्यन्तरस्याम्, ङीप्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** उपधालोपिनः अन्नन्ताद् बहुव्रीहेः प्रातिपदिकाद् ङीप्प्रत्ययो वा भवति । 'बहवो राजानो यस्याः' इति बहुव्रीहौ बहुराजन्शब्दाद् 'अनो बहुव्रीहेः' इति ङीब्निषेधे 'डाबुभाभ्याम्-' इति डापि च नान्तत्वमाकारान्तत्वं च प्राप्तम्, ङीबन्तत्वमपीष्टमित्येतदर्थम् 'अन उपधालोपिनः-' इति सूत्रमारब्धम् । आरब्धे चास्मिन् सूत्रे बहुयज्वादिशब्दे अनुपधालोपिनि सावकाशस्य 'अनो बहुव्रीहेः' इति ङीप्प्रतिषेधस्य, 'डाबुभाभ्याम्-' इति डापश्च बहुराजन्शब्दादावुपधालोपिनि अनवकाशत्वाद् ङीपा बाधः स्यादिति बोध्यम् । तथा च बहुराजन्-शब्दात् स्त्रीत्वे 'ऋन्नेभ्यो ङीप्' इति ङीपि अल्लोपे सोर्हल्ङ्यादिलोपे बहुराज्ञीति, डापि ङीब्निषेधे च सौ 'बहुराजा' इति, ङीप्पक्षे औङि यणि 'बहुराज्ञ्यौ' इति, डाप्पक्षे औङि 'बहुराजे' इति, ङीब्निषेधे औङि राजन्शब्दवद् 'बहुराजानौ' इति च भवति ।

### इकारादेशविधायकं विधिसूत्रम्

**प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ७ । ३ । ४४**

**प्रत्ययस्थात् ककारात् पूर्वस्याकारस्येकारः स्यादापि परे स आप् सुपः परो न चेत् । सर्विका । कारिका । अतः किम् ? नौका । प्रत्ययस्थात् किम् ? शक्नोतीति शका । असुपः किम् ? बहुपरिव्राजका नगरी । कात् किम् ? नन्दना । पूर्वस्य किम् ? परस्य मा भूत् । कटुका अतः इति तपरः किम् ? राका । आपि किम् ? कारकः ।**

(अङ्गस्य, प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इद्, आपि, असुपः)

**सरलार्थः –** प्रत्ययस्थात् 'क्' इतिवर्णात् पूर्वस्याकारस्येकारः स्याद् आपि परे स चेद् आप् सुपः परो न भवति । सर्वशब्दाट्टापि सवर्णदीर्घे 'सर्वा' इति जाते एकादेशस्य सवर्णदीर्घस्य पूर्वान्तत्वेन ग्रहणात् सर्वनामकार्यम्, ततश्च 'अव्ययसर्वनाम्नाम्' इति टेः प्रागकच्प्रत्ययेऽनुबन्धलोपे 'सर्वका' शब्दे ककारात् पूर्वस्य अत इत्त्वे 'सर्विका' इति । एवं कारकशब्दाट्टापि सवर्णदीर्घे कात् पूर्वस्य रेफादकारस्य इत्त्वे 'कारिका' इति च भवति ।

अत इति किमिति- नौ शब्दात् स्वार्थिके कप्रत्यये टापि 'नौका' इति भवति, अत्र ककारात् पूर्वस्य औकारस्य इत्वनिवृत्त्यर्थम् अत इति वचनं बोध्यम् । प्रत्ययस्थात् किमिति- शक्लृ धातोः पचाद्यचि टाप्प्रत्यये 'शका' इति, अत्र ककारस्य धात्ववयवस्य प्रत्ययस्थत्वाभावान्न ततः पूर्वस्य इत्वम् । असुपः किमिति - बहवःपरिव्राजका यस्यामिति बहुव्रीहौ सुपो लुकि बहुपरिव्राजक शब्दाट्टापि 'बहुपरिव्राजका' इति, अत्राकारस्य कात् पूर्वस्य इत्वं न प्रत्ययलक्षणेन आपः सुबपेक्षया परत्वात् । कात् किमिति - नन्दनशब्दाट्टापि 'नन्दना' इति, अत्र कात् पूर्वत्वाभावादत इत्वं नेति । पूर्वस्य किमिति - कटुशब्दात् स्वार्थे कप्रत्यये टापि सवर्णदीर्घे 'कटुका' इति, पूर्वस्येत्यनुक्तौ अत्र सवर्णदीर्घात् पूर्वं वार्णादाङ्गस्य बलीयस्त्वादपवादत्वाच्च द्वितीयककारादुत्तरस्य अकारस्य आपि परे इत्वं स्यादिति भावः । अत इति तपरः किमिति - राधातोः औणादिके कप्रत्यये टापि 'राका' इति, अत्र ककारात् पूर्वस्य दीर्घाकारत्वान्नेत्त्वमिति । आपि किमिति - कृधातो ण्वुलि निष्पन्ने कारकशब्दे टापोऽभावेन नेत्त्वमित्यपि बोध्यम् ।

**मामकनरकयोरुपसंख्यानम्** (वा.)

**मामिका । नरान् कायतीति नरिका ।**

**सरलार्थः –** मामकनरकशब्दयोः कात् पूर्वस्य इत्वं वक्तव्यम् । ममेयमिति विग्रहे 'अणि' ममकादेशे आदिवृद्धौ टापि प्रकृतवार्तिकेन इत्वे 'मामिका' इति, अत्र ककारस्य प्रत्ययस्थत्वाभावात् 'प्रत्ययस्थात्-' इति सूत्रेणाप्राप्तौ वचनमिदं ज्ञेयम् ।

**त्यक्त्यपोश्च** (वा.)

**दाक्षिणात्यिका । इहत्यिका ।**

**सरलार्थः –** त्यगन्ते त्यबन्ते च प्रत्ययस्थात् कात् पूर्वस्याकारस्य इत्वं वक्तव्यम् । अनेन दक्षिणस्यामदूरे इति विग्रहे 'दक्षिणादाच्' इत्याच् 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वम्, दक्षिणाशब्दाद् भवाद्यर्थे 'दक्षिणा - पश्चात् - पुरसस्त्यक्' इति त्यक्प्रत्ययेऽनुबन्धलोपे 'किति च' इत्यादिवृद्धौ, दाक्षिणात्यशब्दात् टाप्, ततः स्वार्थिके कप्रत्यये 'केऽणः' इति ह्रस्वे पुनष्टापि 'त्यक्त्यपोश्च' इति इत्वे 'दाक्षिणात्यिका' इति भवति ।

### इत्वनिषेधविधायकं सूत्रम्

**न यासयोः ७ । ३ । ४५**

**यत्तदोरस्येन्न स्यात् । यका । सका । यकाम् । तकाम् ।**

(यासयोः, अङ्गस्य, प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इद्, न, आपि, असुपः)

**सरलार्थः –** यत्तदोः प्रत्ययस्थात् 'क्' इतिवर्णात् पूर्वस्याकारस्येकारो न स्याद् आपि परे स चेद् आप् सुपः परो न भवति । यत्तच्छब्दयोष्टेः प्रागकचि सौ त्यदाद्यत्वे, पररूपे, टाप्प्रत्यये हल्ङ्यादिना सुलोपे 'यका' इति, तच्छब्दे

'तदोः सः सौ-' इति तकारस्य सत्वे पूर्ववत् प्रक्रियया 'सका' इति । उभयत्रापि 'प्रत्ययस्थात्-' इति सूत्रेण इत्वे प्राप्ते 'न यासयोः' इति सूत्रेण निषेधो भवतीति बोध्यम् ।

**त्यकनश्च निषेधः** (वा.)

**उपत्यका । अधित्यका ।**

**सरलार्थः –** त्यकन्प्रत्ययान्तस्यापि 'प्रत्ययस्थात्-' इति इत्वप्रतिषेधो वक्तव्यः । पर्वतस्यासन्नं स्थलमित्यर्थे "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इति त्यकन्प्रत्यये टापि सोर्हल्ङ्यादिलोपः । एवं पर्वतस्यारूढं स्थलमित्यर्थे 'अधित्यका' इति भवति । अत्रापि वार्तिकेन इत्वनिषेधो भवतीति बोध्यम् ।

**आशिषि वुनश्च न** (वा.)

**जीवका । भवका ।**

**सरलार्थः –** आशीरर्थे विहितस्य वुन्प्रत्ययस्यात इत्वं न भवति । जीवताद् इत्यर्थे "जीवति भवतिभ्याम् आशिषि च" इति वुन्प्रत्यये तस्याकादेशे टापि जीवका भवकेति । अत्र प्रत्ययस्थादिति इत्वे प्राप्ते अनेन निषेधः ।

**उत्तरपदलोपे न** (वा.)

**देवदत्तिका, देवका ।**

**सरलार्थः –** उत्तरपदलोपेऽपि इत्वं नेति वक्तव्यम् । देवदत्तशब्दात् स्वार्थे कप्रत्यये 'ठाजादावूर्ध्वं द्वितीयादचः' 'अनजादौ च विभाषा लोपो वक्तव्यः' इति दत्तशब्दलोपे देवकशब्दात् टापि 'देवका' इति भवति । देवदत्तिकेति तु दत्तपदस्य लोपाभिव्यक्तये दत्तं बोध्यम् ।

**क्षिपकादीनां च न** (वा.)

**क्षिपका । ध्रुवका । कन्यका । चटका ।**

**सरलार्थः –** क्षिपकादिशब्दानामित्वं नेति वक्तव्यम् । अनेन क्षिपाशब्दात् स्वार्थे कप्रत्यये 'केऽणः' इति ह्रस्वे टापि 'क्षिपका' इति, एवमेवान्यत्रापि बोध्यम् । क्षिपकादेराकृतिगणत्वात् - अलका, इष्टका इत्यादीनामपि साधुत्वम् ।

**तारका ज्योतिषि** (वा.) **अन्यत्र तारिका ।**

**सरलार्थः –** ज्योतिषि वाच्ये तारकेति भवति, इत्वं न तु इत्वेन तारिका । ज्योतिषोऽन्यत्र वाच्ये तु तारिका इति भवति ।

**वर्णका तान्तवे** (वा.)

**अन्यत्र वर्णिका ।**

**सरलार्थः –** तान्तवे गम्ये वर्णकेति भवति, इत्वं न भवति । तन्तूनां विकारस्तान्तवम् । वर्णकेति प्रावरणविशेषो वर्णिकेति ग्रन्थविशेषरूपसंज्ञा स्तोत्री वेति ।

**वर्तका शकुनौ प्राचाम्** (वा.)

**उदीचां तु वर्तिका** ।

**सरलार्थः –** शकुनिः = पक्षी, तत्र गम्ये प्राचां मते वर्तकेति भवति, इत्वं न भवति । उदीचां मते तु शकुनौ गम्ये वर्तिकेति इत्त्वं भवतीत्यर्थः ।

**अष्टका पितृदेवत्ये** (वा.)

**अष्टिकान्या** ।

**सरलार्थः –** पित्रर्थे कर्मणि वाच्ये अष्टकेति भवति, इत्वं न भवतीत्याशयः । अश्नन्ति पित्रर्थे ब्राह्मणा यस्यामित्यर्थे अष्टकशब्दात् टाप् । अन्यत्र तु अष्टौ अध्यायाः परिमाणमस्या अष्टिका पाणिनीयाष्टाध्यायी 'अष्टौ' इति सुबन्तात् कन्प्रत्यये टापि इत्वे 'अष्टिका' इति भवति ।

**सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्** (वा.)

**इह वा अ इति छेदः । कात् पूर्वस्याकारादेशो वेत्यर्थः । तेन पुत्रिकाशब्दे ङीनः, इवर्णस्य पक्षेऽकारः । अन्यत्रेत्त्वबाधनार्थमकारस्यैव पक्षेऽकारः । सूतिका, सूतका इत्यादि ।**

वार्तिके 'वेति' इत्यत्र वा + अ इतिच्छेदे सति पाक्षिकमत्वं विधीयते न त्वित्वविकल्प इत्याशयेन 'अत्र वा अ इति छेदः' इत्युक्तम् । पुत्रशब्दात् 'शार्ङ्गरवाद्यञो ङीन्' इति सूत्रेण ङीनि स्वार्थिके कप्रत्यये 'केऽणः' इति ह्रस्वे टापि पुत्रिकाशब्दो निष्पन्नः । अत्र इकारस्य इत्वविकल्पविधौ पुत्रिका पुत्रीकेति इन्मध्यः ईन्मध्यश्च प्रयोगः स्यात्, अत्वविधौ तु पुत्रका पुत्रिकेति अकारमध्यः, इकारमध्यश्च भवतीति ज्ञेयम् । सूतकाशब्दे वृन्दारकाशब्दे च कात् पूर्वस्याकारस्य अकारविधिः किमर्थमिति जिज्ञासायामाह - अन्यत्रेत्त्वबाधनार्थमित्यादि । अयम्भावो यत् सूतकाशब्दे वृन्दारकाशब्दे च 'प्रत्ययस्थात्-' इति नित्यमित्त्वे प्राप्ते तद्विकल्पार्थमकारस्यैवाऽकार इति ।

### विभाषया इत्वविधायकं विधिसूत्रम्

**उदीचामातः स्थाने यकपूर्वायाः ७ । ३ । ४६**

**यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात् पूर्वस्येद्वा स्यादापि परे । केऽणः (७।४।१३) इति ह्रस्वः । आर्यका, आर्यिका । चटकका, चटकिका । आतः किम् ? साङ्काश्ये भवा साङ्काश्यिका । यक इति किम् ? अश्विका । स्त्रीप्रत्यय इति किम् ? शुभं यातीति शुभंयाः । अज्ञाता शुभंयाः शुभंयिका ।**

(उदीचाम्, आतः स्थाने, यकपूर्वायाः, अतः, इत्, अङ्गस्य)

**सरलार्थः –** उदीचामाचार्याणां मतेन यकारपूर्वस्य ककारपूर्वस्य च आतः स्थाने योऽकारः, तस्य स्थाने इकारादेशो न भवति । उदीचामिति कथनाद् विकल्पः सिद्ध्यति ।

यश्च कश्च यकौ तौ पूर्वौ यस्या इति विग्रहः । यकाविति वर्णग्रहणम् अकारद्वयमप्युच्चारणार्थम् । उदीचां ग्रहणं विकल्पार्थमेव न तु देशतो व्यवस्थार्थम् । आर्याशब्दात् स्वार्थिके कप्रत्यये यकाराकारस्य 'केऽणः' इति ह्रस्वे पुनष्टापि आर्यकाशब्दः, तत्र यकारादकारस्य आकारस्थानिकत्वादित्वविकल्पः । 'प्रत्ययस्थात्-' इत्यनेन नित्ये प्राप्ते तस्यापवादोऽयम् । तथा च आर्यका, आर्यिका इति रूपद्वयं बोध्यम् । आतः किमिति । साङ्काश्यशब्दाद् भवार्थे 'धन्वयोपधाद् वुञ्' इति वुञ्प्रत्यये अकादेशे 'यस्येति चेति' अकारलोपे टापि 'प्रत्ययस्थात्-' इति नित्यमित्वे 'साङ्काश्यिका' इति भवति । इह यकारादकारस्य आकारस्थानिकत्वाभावादित्त्वविकल्पो न भवति । आत इत्यस्याभावे तु विकल्पः प्राप्नोतीति । यक इति किमिति - अश्वाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे टापि अश्वकाशब्दो निष्पन्नः, अत्र अकारस्य आकारस्थानिकत्वेऽपि यकपूर्वत्वाभावादित्त्वविकल्पो न किन्तु 'प्रत्ययस्थात्-' इति नित्यमित्त्वमिति । स्त्रीप्रत्यय इति किमिति - शुभमिति मान्तमव्ययम्, तस्मिन्नुपपदे 'याधातोः' विच् प्रत्यये सर्वापहारिलोपे शुभंया शब्दात् स्वार्थे कप्रत्यये 'केऽणः' इति ह्रस्वे टापि शुभंयकाशब्दो निष्पन्नः । अत्र धात्ववयवस्य यकारस्य स्त्रीत्ववाचकत्त्वाभावादित्वविकल्पो न, किन्तु नित्यमेव इत्त्वं 'प्रत्ययस्थात्' इत्यनेन ।

**धात्वन्तयकोस्तु नित्यम्** (वा.)

**सुनयिका । सुपाकिका ।**

धात्वन्तयकारककारयोरुपरि विद्यमानस्य अकारस्य नित्यमित्त्वम् न तु विकल्प इत्यर्थः । सु = शोभनो नयः यस्या सा सुनया, ततः स्वार्थे कप्रत्यये 'केऽणः' इति ह्रस्वे टापि 'सुनयका' इति स्थिते अत्र यकारस्य धात्वन्तत्वान्न ततः परस्याकारस्येत्त्वविकल्पः किन्तु नित्यमेव इत्त्वे 'सुनयिका' इति भवति ।

### विभाषया इत्वविधायकं विधिसूत्रम्

**भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ७ । ३ । ४७**

**स्वेत्यन्तं लुप्तषष्ठीकं पदम् । एषामत इद् वा स्यात् । तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थम् । भस्त्राग्रहणमुपसर्जनार्थम्, अन्यस्य तूत्तरसूत्रेण सिद्धम् । एषा द्वा एतयोस्तु सपूर्वयोर्नेत्त्वम् । अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात् । अनेषका । परमैषका । अद्वके । परमद्वके । स्वशब्दग्रहणं संज्ञोपसर्जनार्थम् । इह हि 'आतः स्थाने' इत्यनुवृत्तं स्वशब्दस्यातो विशेषणम्, न तु द्वैषयोरसम्भवात् । नाप्यन्येषाम्, अव्यभिचारात् । स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः । अर्थान्तरे तु न स्त्री । संज्ञोपसर्जनीभूतस्तु कप्रत्ययान्तत्वाद् भवत्युदाहरणम् । एवं चात्मीयायां स्विका । परमस्विकेति नित्यमेवेत्वम् । निर्भस्त्रका/निर्भस्त्रिका । एषका/एषिका । कृतषत्वनिर्देशान्नेह विकल्पः, एतिके । एतिकाः । अजका/अजिका । ज्ञका/ ज्ञिका । द्वके/द्विके, निःस्वका/निःस्विका ।**

(भस्त्रैषाजाज्ञाद्वास्वाः, नञ्पूर्वाणाम्, अपि, अतः, इत्, उदीचाम्, आतः, स्थाने)

**सरलार्थः –** भस्त्रा, एषा, अजा, ज्ञा, द्वा, स्वा एषां षण्णामत इद् वा भवति, अङ्गत्वात्तदन्तविधौ भस्त्रादिशब्दान्तानामिति लभ्यते, व्यपदेशिवद्भावेन केवलानामपि ।

एवञ्च नञ्पूर्वाणां तद्भिन्नपूर्वाणां केवलानाञ्च सिद्धे नञ्पूर्वाणामिति तु स्पष्टार्थमेव। भस्त्राशब्दस्य नित्यस्त्रीलिङ्गतया 'अभाषितपुंस्काच्च' इत्युत्तरसूत्रेणैव इत्त्वविकल्पसिद्धेरिह भस्त्राग्रहणं व्यर्थमिति जिज्ञासायामाह- भस्त्राग्रहणमिति । निर्भस्त्रिका इत्युपसर्जनत्वे त्रिलिङ्गतया भाषितपुंस्कत्वेन तत्र 'अभाषितपुंस्काच्च' इत्यस्याप्रवृत्तेर्भस्त्राग्रहणस्य सार्थक्यम् । उपसर्जनादन्यस्य भस्त्राशब्दस्य तु 'अभाषितपुंस्काच्च' इत्युत्तरसूत्रेणैव पाक्षिकमित्त्वं सिद्धम् । एषा द्वा एतयोस्त्विति- एषा द्वा एतयोस्तु पूर्वपदसहितयोरिदं पाक्षिकमित्त्वं न । कुत इति चेद् अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात् । 'अनेषका' इति अज्ञाता एषा एषका, न एषका अनेषका, अज्ञाता अनेषा अनेषकेति लौकिकविग्रहे 'नञ् सु एतकद् सु' इति स्थिते नञ् तत्पुरुषे कृते 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति न्यायेन त्यदाद्यत्वप्रवृत्तेः प्रागेव समासत्वात् सुब्लुकि 'अनेतकद्' शब्दात् पुनः सौ सत्वे, त्यदाद्यत्वे पररूपे टापि सवर्णदीर्घे सोर्हल्ङ्यादिलोपे अनेषकेति भवति । अत्र सवर्णदीर्घप्रवृत्तेः प्राक् समासात् पूर्वोत्पन्नसुपः पर एव टाप् भवतीति बोध्यम् । स्वशब्दग्रहणमिति । स्वशब्दस्य सर्वनामत्वाभावादकजभावे स्त्रियां टापि सौ स्वार्थिके कप्रत्यये 'अन्तरङ्गानपि' परिभाषया हल्ङ्यादिलोपं प्रबाध्य प्रातिपदिकावयवत्वात् सोर्लुकि 'केऽणः' इति ह्रस्वे पुनष्टापि स्वकाशब्दो निष्पद्यते । निर्गता स्वका इति विग्रहे 'निरादयः' इति समासे सुब्लुकि 'गोस्त्रियोः' इति ह्रस्वे टापि सुपि स्वार्थिके कप्रत्यये ह्रस्वे पुनष्टापि निस्स्वका शब्दः । एतद् द्वयमेव 'भस्त्रैषा-' इति स्वशब्दस्योदाहरणम् । आत्मीयायां तु स्वशब्दो न संज्ञाभूतः, नाप्युपसर्जनीभूत इति नोदाहरणमित्याऽऽशयः । कुत इति जिज्ञासायामाह - इह हि आतः स्थाने इत्यादि । अत्र सूत्रे 'उदीचामातः-' इति पूर्वसूत्राद् आतः स्थाने इत्यनुवृत्तम्, तच्च स्वशब्दस्यैव अतो विशेषणम् । तथा च स्वशब्दस्य आत्स्थानिकस्य अत इद् वा स्यादित्यर्थलाभः । द्वा एषा इत्येतयोस्तु विषये 'आतः स्थाने' इति न सम्बध्यते असम्भवादिति । भस्त्राजाज्ञाशब्दानामपि 'आतः स्थाने' इति विशेषणं न अव्यभिचारादिति बोध्यम् । अनुपसर्जनात्मीयवाची स्वशब्दस्तु सर्वनामत्वाद् अकजर्हः । अतस्तदकारस्य आत्स्थानिकत्वाभावान्न प्रकृतसूत्रेण इत्त्वविकल्पशङ्का, किन्तु प्रत्ययस्थादित्यनेन नित्यमेवेत्त्वमिति । निर्भस्त्रिकेति, भस्त्राया निष्क्रान्तेति विग्रहे 'निरादयः-' इति समासे 'गोस्त्रियोः-' इति ह्रस्वे पुनष्टापि समासत्वात् सौ, कप्रत्यये 'केऽणः' इति ह्रस्वे, निर्भस्त्रकशब्दात् पुनष्टापि सवर्णदीर्घे 'निर्भस्त्रका' शब्दः । अत्र 'प्रत्ययस्थात्-' इति नित्यमित्त्वे प्राप्ते 'भस्त्रैषाजा-' इति इत्त्वविकल्पे 'निर्भस्त्रिका, निर्भस्त्रकेति' रूपद्वयं बोध्यम् । एवमन्यत्राप्यूह्यम् ।

### विभाषया इत्वविधायकं विधिसूत्रम्

**अभाषितपुंस्काच्च ७ । ३ । ४८**

**एतस्माद् विहितस्य आतः स्थाने अत इद् वा स्यात् । गङ्गका/गङ्गिका । बहुव्रीहेर्भाषितपुंस्कत्वात् ततो विहितस्य नित्यम् । अज्ञाता अखट्वा अखट्विका । शैषिके कपि तु विकल्प एव ।**

(अभाषितपुंस्कात्, अतः, इत्, उदीचाम्, आतः, स्थाते )

**सरलार्थः –** अभाषितपुंस्काद् विहितस्य आतः स्थाने अत इद् वा भवति । अयकपूर्वार्थमिदं सूत्रम् । तथा च - गङ्गाशब्दात् स्वार्थे कप्रत्यये 'केऽणः' इति ह्रस्वे वैकल्पिके इत्त्वे टापि 'गङ्गिका' इत्त्वाभावे 'गङ्गका' इति च रूपद्वयम् ।

### विभाषया आत्वविधायकं विधिसूत्रम्

**आदाचार्याणाम् ७ । ३ । ४९**

**पूर्वसूत्रविषये आद् वा स्यात्** । **गङ्गाका** । **उक्तपुंस्कात्तु, शुभ्रिका** ।

(आत्, आचार्याणाम्, अतः, स्थाने, अभाषितपुस्कात्, च)

**सरलार्थः –** अभाषितपुंस्काद् विहितस्यातः स्थाने अतः आद् वा स्यात् ।

## विशेषाध्ययनम्

१. पर्वतस्य आसन्नं स्थलम् इत्यर्थे उपत्यका भवति । पर्वतस्यारूढं स्थलम् इत्यर्थे 'अधित्यका' इति भवति ।

२. तारिकाशब्दे तारकशब्दे चार्थभेदो भवति ।

३. तन्तूनां विकार इत्यर्थे 'वर्णका' भवति, अन्यत्र तु 'वर्णिका' इति ।

४. पक्षिरूपेऽर्थे प्राचां मते वर्तका भवति, उदीचां तु 'वर्तिका' भवतीति बोध्यम् ।

५. पित्रर्थे कर्मणि वाच्ये 'अष्टका' भवति, अन्यत्र तु 'अष्टिका' इति भवतीति विशेषः ।

## प्रयोगसिद्धिप्रकारः

**आर्यका, आर्यिका**

आर्याशब्दात् स्वार्थिके कप्रत्यये यकारादाकारस्य 'केऽणः' इति ह्रस्वे पुनष्टापि सवर्णदीर्घे 'आर्यका' इति भवति अत्र यकारादकारस्य आकारस्थानिकत्वाद् "उदीचामातः स्थाने यकपूर्वायाः" इत्यनेन वैकल्पिके इत्त्वे 'आर्यिका' इति, इत्त्वाभावे 'आर्यका' इति च भवति । अत्र 'प्रत्ययस्थात्-' इति सूत्रेण नित्ये इत्त्वे प्राप्ते तस्यापवादोऽयमिति बोध्यम् ।

## अभ्यासः

### १. अधोऽङ्कितानां प्रश्नानामुत्तराणि देयानि

(क) सीमन्शब्दे ङीप् केन सूत्रेण प्राप्नोति ?

(ख) 'डाबुभाभ्यामन्यतरस्याम्' इति सूत्रं किं करोति ?

(ग) 'प्रत्ययस्थात्-' इति सूत्रेण कुत्र इत्त्वं भवति ?

(घ) 'प्रत्ययस्थात्-' इत्यत्र 'असुपः' इत्यस्य प्रयोजनं किम् ?

(ङ) 'यका' इत्यत्र इत्त्वनिषेधकं सूत्रं किम् ?

(च) तारकातारिकयोः को भेदः ?

(छ) अष्टका-अष्टिकयोरर्थभेदं निर्दिशत ।

(च) 'उदीचामातः स्थाने यकपूर्वायाः' इति सूत्रे 'आतः' इत्यस्य प्रयोजनम् किम् ?

(छ) 'भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि' इत्यत्र भस्त्राग्रहणस्य प्रयोजनं निर्दिशत ।

### २. अधस्तनशब्देषु विग्रहं दर्शयत

(क) बहुयज्वा । बहुराज्ञी । बहुपरिव्राजका । निर्भस्त्रिका । अनेषका ।

### ३. अधोऽङ्कितानां प्रयोगाणां सिद्धिप्रक्रियां दर्शयत

(क) सीमा ।

(ख) कारिका ।

(ग) नरिका ।

(घ) उपत्यका ।

(ङ) गङ्का ।

### ४. निर्दिष्टसूत्राणामर्थं लिखत

(क) अन उपधालोपिनोऽन्यतरस्याम् ।

(ख) प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ।

(ग) उदीचामातः स्थाने यकपूर्वायाः ।

(घ) भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ।

## ५. अधोनिर्दिष्टानां वार्तिकानामाशयं प्रकाशयत

(क) त्यक्त्यपोश्च ।

(ख) त्यकनश्च निषेधः ।

(ग) तारका ज्योतिषि ।

(घ) वर्णका तान्तवे ।

(ङ) वर्तका शकुनौ प्राचाम् ।

(च) धात्वन्तयकोस्तु नित्यम् ।

## ६. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं दर्शयत

(क) सीमन्शब्दे 'ऋन्नेभ्यो ङीप्' इति ङीप् न भवति ।

(ख) 'अनो बहुव्रीहेः' इत्यनेन ङीब्निषेधो भवति ।

(ग) प्रत्ययस्थात् ककारात् पूर्वस्यात इत्त्वविधायकं प्रत्ययस्थादिति सूत्रम् ।

(घ) नरान् कायतीति विग्रहे 'नारिका' इति भवति ।

(ङ) 'उपत्यका' अधित्यका शब्दयोरर्थभेदो नास्ति ।

(च) वर्तकावर्तिकयोरर्थे तुल्यता नास्ति ।

## ७. परस्परं यथौचिति मेलयत

| (अ) | (आ) |
|---|---|
| पर्वतस्यासन्नं स्थलम् | अधित्यका । |
| ज्योतिषि | उपत्यका । |
| तान्तवे | तारका । |
| पितृदेवत्ये | वर्णिका । |
| पर्वतस्यारूढं स्थलम् | अष्टका । |

स्त्रीप्रत्ययप्रकरणे

# स्त्रीत्वबोधकस्य ङीपो निरूपणम्

### अधिकारसूत्रम्

**अनुपसर्जनात् ४ । १ । १४**

**अधिकारोऽयम् । यूनस्तिः (४।१।७७) इत्यभिव्याप्य । अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति ।**

अयमधिकारो 'यूनस्तिः' इत्यत्रापि न तु ततः प्रागिति बोध्यम् । 'अनुपसर्जनाद्' इत्यधिकार एव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४ । १ । १५**

**अनुपसर्जनं यट्टिटादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात् । कुरुचरी नदट् - नदी । उपसर्जनत्वान्नेह । बहुकुरुचरा । वक्ष्यमाणेत्यत्र टित्वादुगित्वाच्च ङीप्प्राप्तः यासुटो ङित्त्वेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' (प.) इति ज्ञापनं भवति । श्नः शानचः शित्वेन क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधज्ञापनाद् वा । सौपर्णेयी । एन्द्री । औत्सी । ऊरुद्वयसी, उरुदघ्नी, उरुमात्री । पञ्चतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी ।**

(टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, अनुपसर्जनात्)

**सरलार्थः –** अनुपसर्जनात् टिदन्ताद्, ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप्, इत्येतत्प्रत्ययान्तान्तेभ्यश्च अदन्तेभ्यो प्रातिपदिकेभ्यः स्त्रियां ङीप्प्रत्ययो भवति । अनुपसर्जनमित्यस्य टिदादिषु सर्वत्रान्वयो बोध्यः । तत्र टित् त्रिविधः प्रत्ययः प्रातिपदिकम्, धातुश्च तत्राद्यस्योदाहरणं कुरुचरीति । कुरुषु चरतीति विग्रहे अधिकरणे उपपदे 'चरेष्टः' इति टप्रत्ययेऽनुबन्धलोपे उपपदसमासे 'कुरुचर'शब्दान् ङीपि भसंज्ञायाम् 'यस्येति च' इत्यकारलोपे स्वादिकार्ये कुरुचरीति । प्रातिपदिकटित्त्वस्योदाहरणं नदीति । पचादिगणे पठितात् 'नदट्' इति प्रातिपदिकाद् ङीपि पूर्ववत् सिद्धिप्रक्रिया बोध्या । तृतीयोदाहरणम्- स्तनन्धयीति । अनुपसर्जनत्वविशेषणस्य प्रयोजनं बहुकुरुचरेति । बहवः कुरुचरा यस्यामिति विग्रहे बहुव्रीहिसमासस्यान्यपदार्थप्रधानत्वात्, ततश्च टित्प्रत्ययस्योपसर्जनत्वान्न ङीप् । अनुपसर्जनत्वस्य प्रातिपदिकविशेषणत्वे तु ङीबेव स्यात् । वक्ष्यमाणेत्यत्रेति । परिभाषणार्थकाद् 'वच्' धातोः कर्मणि लृट्लकारे

'लृटः सद्वा' इति तस्य शानजादेशे 'स्यतासी लृलुटोः' इति स्यप्रत्यये कुत्वे षत्वे च "आने मुक्" इति मुगागमे णत्वे टापि वक्ष्यमाणेतिरूपं भवति । अत्र लृडादेशस्य शानचष्टित्त्वात् "टिड्ढाणञ्-" इति उगित्वाच्च 'उगितश्चेति' ङीप् प्राप्तो न भवति । कुत इति जिज्ञासायामाह यासुटो ङित्त्वेनेति । "यासुट् परस्मैपषूदात्तो ङिच्च" इति लिङादेशानां तिप्तसादीनां यासुडागमस्य ङित्त्वं विहितम्, "यदागम-" परिभाषया यासुडागमस्य लिङादेशाावयवत्वेन स्थानिवद्भावेनैव ङित्त्वसिद्धेर्यासुटो ङित्करणं व्यर्थं सत् लादेशानामनुबन्धकार्यमादेशानां नेति परिभाषां ज्ञापयतीति । ज्ञापितायाञ्चास्यां प्रकृते लृडादेशस्य शानचः टिदुगित्कार्ये ङीपि कर्तव्ये स्थानिवत्त्वाभावान्न ङीबिति बोध्यम् । सौपर्णेयीति । सुपर्ण्या अपत्यं स्त्रीति विग्रहे 'स्त्रीभ्यो ढक्' इति ढकि, एयादेशे "यस्येति च " इतीकारलोपे "किति च" इत्यादिवृद्धौ सौपर्णेयशब्दाद् ङीपि अनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यकारलोपे सौपर्णेयीति रूपम् । एन्द्री - इन्द्रो देवता अस्या (आमिक्षायाः) इति विग्रहः । औत्सी - उत्सस्येयमिति विग्रहः । ऊरुद्वयसी ऊरू प्रमाणमस्या इति विग्रहः । आक्षिकी - अक्षैर्दीव्यतीति विग्रहः । लावणिकी - लवणं पण्यमस्या इति विग्रहः ।

**ताच्छीलिके णेऽपि (प.) चौरी**

**सरलार्थः –** तच्छीले भवस्ताच्छीलिकः, तस्मिन् णप्रत्यये सति तदन्तादपि ङीप् भवति । तथा च - चुरा शीलमस्या इति विग्रहे छत्रादित्वाद् णप्रत्यये आदिवृद्धौ चौरशब्दाद् ङीपि 'यस्येति च' इत्यकारलोपे स्वादिकार्ये 'चौरी' इति भवति ।

**नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम् (वा.)**

**स्त्रैणी । पौंस्नी । शाक्तीकी । आढ्यङ्करणी । तरुणी । तलुनी ।**

**सरलार्थः–** नञ्, स्नञ्, ईकक्, ख्युन्, तरुण, तलुन-एतेषामपि ङीब्विधौ वचनं कर्तव्यम् । स्त्रैणीति -स्त्रिया इयमित्यर्थे स्त्री शब्दान्नञि, आदिवृद्धौ, णत्वे, ङीपि, 'यस्येति च' इत्यकारलोपे स्त्रैणीति । एवं स्नञ् प्रत्यये पौंस्नी । शाक्तीकी - शक्तिः प्रहरणम् अस्या इत्यर्थे 'शक्तियष्ट्योरीकक्' पूर्ववत् प्रक्रियया भवति । आढ्यङ्करणीति । अनाढ्यः आढ्यः क्रियते अनयेति विग्रहे "आढ्यसुभग-" इत्यनेन ख्युन्प्रत्यये अनादेशे मुमागमे, णत्वे ङीपि, अकारलोपे आढ्यङ्करणी इति रूपं भवति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**यञश्च ४ । १ । १६**

**यञन्तात् स्त्रियां ङीप् स्यात् । अकारलोपे कृते ।**

(यञः, च, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, अनुपसर्जनात्)

**सरलार्थः –** यञन्ताच्च प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति ।

### लोपादेशविधायकं विधिसूत्रम्

**हलस्तद्धितस्य ६ । ४ । १५०**

**हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीति परे । गार्गी ।**

(हलः, तद्धितस्य, लोपः, ईति, उपधायाः)

**सरलार्थः –** हलः उत्तरस्य तद्धितयकारस्य उपधाया ईति परतो लोपो भवति ।

'गर्गस्यापत्यं स्त्री' इत्यर्थे 'गर्गादिभ्यो यञ्' इति यञ्-प्रत्ययेऽनबुन्धलोपे, आदिवृद्धौ 'यस्येति च' इति गकारादकारस्य लोपे 'गार्ग्य' शब्दाद् ङीपि अनुबन्धलोपे 'यस्येति च' इत्यकारलोपे 'हलस्तद्धितस्य' इति यकारस्य लोपे गार्गीति भवति ।

**अनपत्याधिकारस्थान्न ङीप्** (वा.)

द्वीपे भवा द्वैप्या । अधिकारग्रहणाद् नेह देवस्यापत्यं दैव्या । 'देवाद्यञञौ' इति हि यञ् प्राग्दीव्यतीयः, न त्वपत्याधिकारपठितः ।

**सरलार्थः –** 'तस्यापत्यम्' इत्यपत्याधिकारबहिर्भूताद् यञन्ताद् ङीब्न भवति । द्वैप्येति । द्वीपे भवेति विग्रहे 'द्वीपादनुसमुद्रं यञ्' इति यञ्-प्रत्यये, आदिवृद्धौ, 'यस्येति च' इत्यकारलोपे, टापि, सवर्णदीर्घे 'द्वैप्या' इति । अत्र यञः अपत्याधिकारविहितत्वाभावान्न ङीबिति भावः । अनपत्यत्वान्न ङीबित्येतावतैव द्वैप्येत्यत्र दोषाभावाद् अधिकारग्रहणं किमर्थमिति जिज्ञासायामाह अधिकारग्रहणादिति । देवस्यापत्यमिति विग्रहे 'देवाद्यञञौ' इति यञ्प्रत्यये आदिवृद्धौ, अकारलोपे 'दैव्य' शब्दात् टापि सवर्णदीर्घे 'दैव्या' इति रूपम् । अनपत्यान्न ङीबित्युक्ते हि यञः अपत्यत्वाद् ङीब् - निषेधो न स्यात् । अधिकारग्रहणे तु प्रकृतयञः 'तस्यापत्यम्' इत्यधिकारबहिर्भूतत्वान्निषेधो भवतीति बोध्यम् ।

### विभाषया ष्फप्रत्ययविधायकं विधिसूत्रम्

**प्राचां ष्फ तद्धितः ४ । १ । १७**

**यञन्तात् ष्फो वा स्यात् स्त्रियाम्, स च तद्धितः ।**

(प्राचाम्, ष्फः, तद्धितः, अनुपसर्जनात्, यञः प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** यञन्तात् प्रातिपदिकात् स्त्रियां ष्फप्रत्ययो भवति, स च तद्धितसंज्ञश्च भवति ।

### षकारस्य इत्संज्ञाविधायकं सूत्रम्

**षः प्रत्ययस्य १ । ३ । ६**

**प्रत्ययस्यादिः ष इत् स्यात् ।**

(षः, प्रत्ययस्य, उपदेशे, इत्, आदिः)

**सरलार्थः –** प्रत्ययस्य औपदेशिकस्वरूपस्य आदिस्थः षकारः इत्संज्ञको भवति ।

### आयनाद्यादेशविधायकं विधिसूत्रम्

**आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७ । १ । २**

**प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः । तद्धितान्तत्वात् प्रातिपदिकत्वम् । षित्त्वसामर्थ्यात् ष्फेणोक्तेऽपि स्त्रीत्वे "षिद्गौरा-" (४।१।४१) इति वक्ष्यमाणो ङीष् । गार्ग्यायणी ।**

(प्रत्ययादीनाम्, फढखछघाम्, आयनेयीनीयियः, अङ्गस्य)

**सरलार्थः –** प्रत्ययादिस्थानां फ्ढ्ख्छ्घ् इत्येतेषां स्थाने क्रमेण आयन् एय् ईन् ईय् इय् इमे आदेशाः भवन्ति ।

गर्गस्यापत्यं स्त्री इति विग्रहे गर्गादियञन्ताद् गार्ग्यशब्दात् ष्फप्रत्यये षकारस्येत्संज्ञायां फकारस्य आयन्नादेशे यकारादकारस्य लोपे षित्वाद् ङीषि णत्वे 'गार्ग्यायणी' इति रूपम् ।

### ष्फप्रत्ययविधायकं विधिसूत्रम्

**सर्वत्र लोहितादिकतन्तेभ्यः ४ । १ । १८**

**लोहितादिभ्यः कतशब्दान्तेभ्यो नित्यं ष्फः स्यात् ।**

**लौहित्यायनी । कात्यायनी ।**

(सर्वत्र, लोहितादिकतन्तेभ्यः, अनुपसर्जनात्, यञः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ष्फः )

**सरलार्थः –** सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यो यञन्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां ष्फप्रत्ययो भवति ।

'लोहितस्यापत्यं स्त्री' इति विग्रहे लोहितशब्दात् गर्गादियञन्तात् ष्फप्रत्यये षकारस्येत्संज्ञायां फकारस्यायन्नादेशे, यकारादकारस्य लोपे षित्वाद् ङीषि स्वादिकार्ये 'लौहित्यायनी' इति भवति ।

### ष्फप्रत्ययविधायकं विधिसूत्रम्

**कौरव्यमाण्डूकाभ्यां च ४ । १ । १९**

**आभ्यां ष्फः स्यात । क्रमेण टाब्ङीषोरपवादः । कुर्वादिभ्यो ण्यः (४ । १ । १५) कौरव्यायणी । ढक् च माण्डूकात् (४ । १ । ११९) इत्यण् माण्डूकायनी ।**

(कौरव्यमाण्डूकाभ्याम्, च, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ष्फः)

**सरलार्थः –** कौरव्यमाण्डूकाभ्यां ष्फः प्रत्ययो भवति स्त्रीत्वे द्योत्ये । कौरव्यशब्दात् टापः, माण्डूकशब्दाद् ङीषश्चापवादः । कौरव्यायणीति । कुरोरपत्यं स्त्रीति विग्रहे 'कुर्वादिभ्यो ण्यः' इति ण्यप्रत्यये णकारस्येत्संज्ञायां लोपे च भसंज्ञायाम् 'ओर्गुणः' इति गुणे आदिवृद्धौ, अत्र टापं बाधित्वा ष्फप्रत्यये षकारस्येत्संज्ञायां लोपे च आयन्नादेशे षित्त्वाद् ङीषि णत्वे कौरव्यायणीति रूपं भवति । एवं मण्डूकस्यापत्यं स्त्रीति विग्रहे 'ढक् च मण्डूकात्' इत्यणि ङीषं प्रबाध्य ष्फप्रत्यये पूर्ववत् प्रक्रियया माण्डूकायनीति ।

**आसुरेरुपसंख्यानम्** (वा.) **आसुरायणी** ।

**सरलार्थः –** आसुरेः ष्फप्रत्ययस्योपसङ्ख्यानं कर्तव्यम् । 'असुरस्यापत्यं स्त्री' इति विग्रहे 'अत इञ्' इति इञ् प्रत्यये, आदिवृद्धौ, ष्फप्रत्यये षकारस्येत्संज्ञायां लोपे च आयन्नादेशे 'यस्येति च' इतीकारलोपे षित्त्वाद् ङीपि णत्वे आसुरायणीति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**वयसि प्रथमे ४ । १ । २०**

**प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात् । कुमारी ।**

(वयसि, प्रथमे, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, अनुपसर्जनात्)

**सरलार्थः –**प्राणिनां कालकृतावस्थाविशेषो वयः । तच्च कौमारं यौवनं वार्धकं चेति त्रिधा । तत्र प्रथमे वयसि यत् प्रातिपदिकं श्रुत्या वर्तते ततः स्त्रियां ङीप्प्रत्ययो भवति । कुमारत्ववयोविशिष्टा स्त्रीति विग्रहे कुमारशब्दात् प्रकृतसूत्रेण ङीपि कुमारी इति सिद्ध्यति ।

**वयस्यचरम इति वाच्यम्** (वा.)

**वधूटी । चिरण्टी । वधूटचिरण्टशब्दौ यौवनवाचिनौ । अतः किम् ? शिशुः । कन्याया न, कन्यायाः कनीन च** (४ । १ । ११६) **इति निर्देशात् ।**

**सरलार्थः –** चरमम् = अन्त्यं वयः, तद्भिन्नम् = अचरमम् । "वयसि प्रथमे" इति सूत्रे प्रथमे इत्यपनीय अचरमे इति वक्तव्यमित्यर्थः । शिशुशब्दस्य प्रथमवयोवाचित्वेऽपि अदन्तत्वाभावान्न ङीबिति बोध्यम् ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**द्विगोः ४ । १ । २१**

**अदन्ताद् द्विगोर्ङीप् स्यात् । त्रिलोकी । अजादित्वात् त्रिफला । त्र्यनीका सेना ।**

(द्विगोः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्, अनुपसर्जनात्)

**सरलार्थः –** द्विगुसंज्ञकाद् अदन्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति ।

त्रयाणां लोकानां समाहार इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासे 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वे त्रिलोकशब्दान्ङीपि 'यस्येति च' इत्यकारलोपे स्वादिकार्ये त्रिलोकीति । त्रयाणां फलानां समाहारः, त्रयाणामनीकानां समाहार इति विग्रहे द्विगुसमासे 'द्विगोः' इति ङीपं बाधित्वा अजादित्वाद् 'अजाद्यतष्टाप्' इति टाब् भवतीति विशेषः ।

### ङीपो निषेधविधायकं सूत्रम्

**अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ४ । १ । १२**

**अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोर्ङीब् न स्यात्, तद्धितलुकि सति । पञ्चभिरश्वैः क्रीता पञ्चाश्वा । आर्हीयष्ठक् । तस्य 'अध्यर्ध-' (५ । १ । २८) इति लुक् । द्वौ बिस्तौ पचति द्विबिस्ता । द्व्याचिता । द्विकम्बल्या परिमाणान्तात्तु द्व्याढकी । तद्धितलुकि किम् ? समाहारे पञ्चाश्वी ।**

(अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि, ङीप्, अनुपसर्जनात्, द्विगोः)

**सरलार्थः –** अपरिमाणान्तान्ताद् द्विगोः, बिस्ताचितकम्बल्यान्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति ।

पञ्चाश्वेति । पञ्चभिरश्वैः क्रीतेति विग्रहे द्विगुसमासे 'आर्हाद्-' इत्यधिकारे 'तेन क्रीतम्' इति ठक्प्रत्यये 'अध्यर्धपूर्वाद्-' इति तस्य लुकि 'द्विगोः' इति ङीपि प्राप्ते अपरिमाणान्तद्विगुत्वादनेन निषेधे टापि 'पञ्चाश्वा' इति भवति । एवमन्यत्राप्यूह्यम् ।

### ङीपो निषेधविधायकं सूत्रम्

**काण्डान्तात् क्षेत्रे ४ । १ । २३**

**क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि । द्वे काण्डे प्रमाणमस्या द्विकाण्डा क्षेत्रभक्तिः । 'प्रमाणे द्वयसच्-' (५ । २ । ३७ ) इति विहितस्य मात्रचः ।**

(काण्डान्तात्, क्षेत्रे, ङीप्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम् द्विगोः, न, तद्धितलुकि)

**सरलार्थः –** काण्डशब्दान्ताद् द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये ङीप् प्रत्ययो न भवति ।

प्रमाणे लः द्विगोर्नित्यम् (वा.) इति लुक् द्विकाण्डी रज्जुः ।

**सरलार्थः –** प्रमाणशब्दा लोके ये प्रसिद्धा बिस्तिहस्तादयस्तेभ्यः परस्य प्रत्ययस्य नित्यं लुग् भवति द्विगुसमासे । द्वे काण्डे प्रमाणमस्या इति विग्रहे द्विगुसमासे द्विकाण्डशब्दस्य क्षेत्रवर्तित्वे नपुंसकत्वशङ्काव्युदासाय क्षेत्रभक्तिरिति विशेष्योपादानम् । अत्र "प्रमाणे द्वयसच्-" इति विहितस्य 'मात्रच्' प्रत्ययस्य लुकि सति 'काण्डान्तात् क्षेत्रे' इति ङीब्निषेधे 'द्विकाण्डा' इति भवति । द्विकाण्डी रज्जुरिति । प्रकृतसूत्रे क्षेत्रग्रहणाद् 'द्वे काण्डे प्रमाणमस्याः' इति विग्रहे पूर्ववत् प्रक्रियया द्विकाण्डशब्दाद् 'द्विगोः' इति सूत्रेण ङीपि द्विकाण्डीति भवति । अत्र क्षेत्रवृत्तित्वाभावान्न ङीब्निषेधः ।

### विभाषया ङीप्प्रत्ययविधायकं विधिसूत्रम्

**पुरुषात् प्रमाणेऽन्यतरस्याम् ४ । १ । २४**

**प्रमाणे यः पुरुषस्तदन्ताद् द्विगोर्ङीब्वा स्यात् तद्धितलुकि । द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी/द्विपुरुषा वा परिखा ।**

(पुरुषात्, प्रमाणे, अन्यतरस्याम्, ङीप्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, द्विगोः, न, तद्धितलुकि)

**सरलार्थः –** प्रमाणे यः पुरुषशब्दः तदन्ताद् द्विगोस्तद्धितलुकि सति अन्यतरस्यां ङीप् प्रत्ययो न भवति ।

प्रमाणम् = आयामः, पञ्चहस्तायामः पुरुष इत्युच्यते । तथा च द्वौ पुरुषौ प्रमाणमस्या इति विग्रहे "तद्धितार्थ-" इति द्विगुसमासे "प्रमाणे द्वयसच्-" इति विहितस्य मात्रच्प्रत्ययस्य 'प्रमाणे लः, द्विगोर्नित्यम्' इति लुकि । अत्र पुरुषप्रमाणस्य आयामात्मकस्य 'अपरिमाण-' इति नित्यं ङीब्निषेधे प्राप्ते विकल्पार्थमिदं सूत्रम् । एवञ्चानेन ङीप्पक्षे द्विपुरुषी ङीबभावे 'द्विपुरुषा' इति रूपद्वयं बोध्यम् ।

## विशेषाध्ययनम्

१. अनुपसर्जनाधिकारो 'यूनस्तिः' इति सूत्रपर्यन्तं भवति । अनुपसर्जनाधिकारः स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति ।

२. प्रत्ययस्याद्यवयवस्य षकारस्य 'षः प्रत्ययस्य' इति सूत्रेणेत्संज्ञा भवति ।

३. प्रत्ययाद्यवयवभूतानामधस्तनानां वर्णानां स्थाने क्रमशः अधोनिर्दिष्टा आदेशा भवन्ति ।

| प्रत्ययाः | फ् | ढ् | ख् | छ् | घ् |
|---|---|---|---|---|---|
| आदेशाः | आयन् | एय् | ईन् | ईय् | इय् |

## प्रयोगसिद्धिप्रकारः

### ऐन्द्री

इन्द्रो देवता अस्याः, (आमिक्षायाः) इति विग्रहे 'सास्य देवता' इत्यण्प्रत्ययेऽनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यकारलोपे आदिवृद्धौ ऐन्द्रशब्दात् 'टिड्ढाणञ्-' इति ङीपि अनुबन्धलोपे भसंज्ञायामकारलोपे स्वादिकार्ये 'ऐन्द्री' इति सिद्ध्यति ।

### त्रिफला

'त्रयाणां फलानां समाहारः' इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासे 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वे 'द्विगोः' इति ङीपि प्राप्ते तं प्रबाध्य अजादित्वाद् 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये 'त्रिफला' इति सिद्ध्यति ।

# अभ्यासः

## १. अधस्तनप्रश्नानामुत्तराणि दत्त

(क) 'अनुपसर्जनात्' इत्यस्याधिकारः किं सूत्रमभिव्याप्य वर्तते इति निर्दिशत ?

(ख) स्त्रीप्रत्ययेषु तदन्तविधिज्ञापकं किम् ?

(ग) यञन्तात् स्त्रियां ङीप् विधायकं सूत्रं किम् ?

(घ) 'षः प्रत्ययस्य' इति सूत्रं किं कुरुते ?

(ङ) यञन्तात् स्त्रियां 'ष्फ' प्रत्ययः केन सूत्रेण विधीयते ।

(च) 'पञ्चाश्वा' इत्यत्र ङीब्निषेधकं सूत्रं किम् ?

(छ) 'वक्ष्यमाणा' इत्यत्र कथं ङीप्प्राप्तः ? कथञ्च न भवति ?

## २. अधोलिखितानां सूत्राणामर्थं लिखत

(क) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ।

(ख) हलस्तद्धितस्य ।

(ग) सर्वत्र लोहितादिकतन्तेभ्यः ।

(घ) वयसि प्रथमे ।

(ङ) द्विगोः ।

## ३. अधोनिर्दिष्टानां वार्तिकानां कार्यं निर्दिशत

(क) नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम् ।

(ख) आसुरेरुपसङ्ख्यानम् ।

(ग) वयस्यचरम इति वाच्यम् ।

## ४. निर्दिष्टप्रयोगाणां साधुत्वप्रक्रियां दर्शयत

ऐन्द्री, चौरी, गार्गी, कात्यायनी, कुमारी, द्विकाण्डा ।

## ५. रिक्तस्थानं पूरयत

(क) सौपर्णेयशब्दाद् ङीपि … … … इति रूपं भवति ।

(ख) उत्सस्येयमित्यर्थे … … … इति रूपं भवति ।

(ग) 'शक्तिः प्रहरणमस्याः' इति विग्रहे … … …इति रूपं भवति ।

(घ) ष्फप्रत्यये … … …इत्संज्ञा … … … इति सूत्रेण भवति ।

(ङ) 'मण्डूकस्यापत्यं स्त्री' इत्यर्थे … … … इति रूपं भवति ।

(च) 'त्रयाणां लोकानां समाहारः' इति विग्रहे … … … इति सूत्रेण समासे … … … इति सूत्रेण ङीपि … … … इति सूत्रेण अकारस्यलोपे … … … इति रूपं भवति ।

## ६. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं दर्शयत

(क) 'बहुकुरुचरा' इत्यत्र ङीब् न भवति ।

(ख) 'वक्ष्यमाणा' इत्यत्र टित्त्वाद्वादुगित्वाच्च ङीब्न प्राप्नोति ।

(ग) अजादिगणपठितत्वात् 'त्रिफला' इत्यत्र 'द्विगोः' इति प्रवर्तते ।

(घ) 'आसुरेरुपसङ्ख्यानम्' इति वार्तिकं ङीब्विधायकम् ।

(ङ) अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यते ।

## ७. परस्परं यथौचिति मेलयत

| (अ) | (आ) |
|---|---|
| ऊरू प्रमाणमस्याः | आढ्यङ्करणी । |
| चुरा शीलमस्याः | पञ्चाश्वा । |
| अनाढ्यः आढ्यः क्रियते अनया | ऊरुद्वयसी । |
| लोहितस्यापत्यं स्त्री | कौरव्यायणी । |
| कुरोरपत्यं स्त्री | द्विकाण्डी । |
| पञ्चभिरश्वैः क्रीता | लौहित्यायनी । |
| द्वे काण्डे प्रमाणमस्याः | चौरी । |

स्त्रीप्रत्ययप्रकरणे

# शब्दस्वरूपेण स्त्रियां ङीब्ङीषोर्विवेकः

### अनङादेशविधायकं विधिसूत्रम्

**ऊधसोऽनङ् ५ । ४ । १३१ ।**

**ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियाम् । इत्यनङि कृते डाब्ङीब्निषेधेषु प्राप्तेषु ।**

(ऊधसः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, अनङ्, बहुव्रीहौ)

**सरलार्थः** –ऊधशब्दान्तस्य बहुव्रीहेः समासान्तोऽनङादेशो भवति ।

कुण्डमिव ऊधो यस्या इति बहुव्रीहौ 'कुण्डोधस्'शब्दाद् अनेन सूत्रेण अनङादेशः । अनङि ङकारस्येत्संज्ञा भवति नकारादकारश्चोच्चारणार्थः । एवञ्च' कुण्डोधन्' इति जाते डाब्ङीब्निषेधेष्विति । 'डाबुभाभ्याम्-' इति वैकल्पिके डापि 'अन उपधालोपिनः' इति वैकल्पिके ङीपि, तदुभयाभावे 'ऋन्नेभ्यो ङीप्' इति प्राप्तस्य ङीपः 'अनो बहुव्रीहेः' इति निषेधे च प्राप्ते -

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**बहुव्रीहेरूधसो ङीष् ५ । १ । २५**

**ऊधोऽन्ताद् बहुव्रीहेर्ङीष् स्यात् स्त्रियाम् । कुण्डोध्नी । स्त्रियाम् किम् ? कुण्डोधो धैनुकम् । इहानङ्पि न । तद्विधौ "स्त्रियाम्" (वा.) इत्युपसङ्ख्यानात् ।**

(बहुव्रीहेः, ऊधसः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्, अनुपसर्जनात्)

**सरलार्थः** – ऊधस्शब्दान्ताद् बहुव्रीहेः स्त्रियां ङीष्प्रत्ययो भवति ।

कुण्डोधस्शब्दात् अनेन सूत्रेण ङीषि अनुबन्धलोपे भसंज्ञायाम् 'अल्लोपोऽनः' इति अकारलोपे स्वादिकार्ये 'कुण्डोध्नी' इति रूपं भवति । स्त्रियां किमिति । ङीष्विधायकेऽस्मिन् सूत्रे स्त्रियामित्यस्यानुवृत्तेः प्रयोजनं किमिति प्रश्नः, कुण्डमिव ऊधो यस्याः, तासां समूह इत्यर्थे स्त्रीत्वाभावान्न ङीषिति बोध्यम् । ङीषभावेऽपि, अनङ् कथं न भवतीति जिज्ञासायामुच्यते, तद्विधाविति । अनङ्विधौ 'स्त्रियाम्' इत्यस्योपसंख्यानात्तत्र अनङ् नेति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**सङ्ख्याव्ययादेर्ङीप् ४ । १ । २६**

**ङीषोऽपवादः । द्व्यूध्नी । अत्यूध्नी । बहुव्रीहेरित्येव । ऊधोऽतिक्रान्ता अत्यूधाः ।**

(संख्याव्ययादेः, ङीप्, अनुपसर्जनात्, ऊधसः, बहुव्रीहेः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम् )

**सरलार्थः –** सङ्ख्याव्ययादेरूधोऽन्तात् स्त्रियां ङीप् स्यात्। 'बहुव्रीहेरूधसो ङीष्' इत्यस्यापवादः। 'द्वे ऊधसी यस्याः' इति विग्रहे अनङादेशे ङीपि 'अल्लोपोऽनः' इत्यल्लोपे द्व्यूध्नीति । एवम् - 'अतिशयितमूधो यस्याः' इति विग्रहे पूर्ववत् प्रक्रियया अत्यूध्नीति । 'अत्यादयः क्रान्ताद्यर्थे' इति विहितसमासस्याबहुव्रीहित्वाद् 'ऊधोऽतिक्रान्ता' इत्यत्र अनङादेशः, ङीष्प्रत्ययश्च न ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**दामहायनान्ताच्च ४ । १ । २७**

**सङ्ख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च ङीप् स्यात्। दामान्ते डाप्प्रतिषेधयोः प्राप्तयोर्हायनान्ते टापि प्राप्ते वचनम् । द्विदाम्नी । अव्ययग्रहणाननुवृत्तेरुद्दामा वडवेत्यत्र डाब्निषेधावपि पक्षे स्तः । द्विहायनी बाला ।**

(दामहायनान्तात्, च, अनुपसर्जनात्, बहुव्रीहेः, संख्याव्ययादेः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्)

**सरलार्थः –** संख्यादेर्बहुव्रीहेर्दामशब्दान्ताद् हायनशब्दान्ताच्च स्त्रियां ङीप्प्रत्ययो भवति ।

अत्र सूत्रे 'सङ्ख्याव्ययादेर्ङीप्' इति सूत्रात् सङ्ख्यादेः, ङीप् चानुवर्तेते, अव्ययग्रहणं तु नानुवर्तते । दामान्ते इति द्विदामन्शब्दे "डाबुभाभ्याम्-" इति डाप्प्रत्यये, "अन उपधालोपिन-" इति ङीप्प्रत्यये, "अनो बहुव्रीहेः" इति ङीप्प्रतिषेधे च प्राप्ते, 'द्विहायनी' इत्यत्रापि हायनान्ते अदन्तत्वाट्टापि प्राप्ते 'दामहायनान्ताच्च' इति सूत्रं ङीप्प्रत्ययविधायकम् । तथा च - 'द्वे दामनी यस्या इति विग्रहे बहुव्रीहौ 'द्विदामन्' शब्दाद् ङीपि भसंज्ञायाम् 'अल्लोपोऽनः' इत्यकारलोपे स्वादिकार्ये द्विदाम्नीति । अत्र सूत्रे अव्ययग्रहणाननुवृत्तेः प्रयोजनमाह अव्ययग्रहणाननुवृत्तेरिति । 'उत्क्रान्तं दाम यस्याः' इति विग्रहे 'उद्दामा वडवा' इत्यत्र डाप्प्रत्ययः 'अनो बहुव्रीहेः' इति ङीप्प्रतिषेधश्च स्यादित्येतदर्थम् । द्विहायनीत्यत्र 'द्वौ हायनौ यस्याः' इति विग्रहो बोद्धव्यः ।

**त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्** (वा.)

**सरलार्थः –** त्रिचतुर्भ्यां परस्य हायनशब्दस्य णत्वं वक्तव्यम् । 'त्रिहायणी' इत्यत्र भिन्नपदत्वाद् णत्वाप्राप्तौ वार्तिकमिदम् । एवमपि द्विहायना शाला इत्यत्रापि ङीब् स्यात्, त्रिहायना शालेत्यत्र ङीब् णत्वं च स्यातामिति जिज्ञासायां वार्तिकान्तरमुपस्थाप्यते ।

**वयोवाचकस्यैव हायनस्य ङीब् णत्वं चेष्यते (वा.) त्रिहायणी । चतुर्हायणी । वयसोऽन्यत्र द्विहायना, त्रिहायना चतुर्हायना शाला ।**

**सरलार्थः –** त्रिचतुर्भ्यामुत्तरस्य हायनशब्दस्य ङीब्णत्वे वयोवाचकस्यैव हायनशब्दस्य भवत इति बोध्यम् । तथा च द्विहायना त्रिहायना चतुर्हायना चेत्यत्र न ङीब्णत्वे ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**नित्यं संज्ञाछन्दसोः ४ । १ । २७**

**अन्नन्ताद् बहुव्रीहेरुपधालोपिनो ङीप् स्यात् संज्ञाछन्दसोः । सुराज्ञी नाम नगरी । अन्यत्र पूर्वेण विकल्प एव । वेदे तु शतमूर्ध्नी ।**

(नित्यम्, संज्ञाछन्दसोः, अनुपसर्जनाद्, बहुव्रीहेः, अनः, उपधालोपिनः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** अन्नन्ताद् बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङीप्प्रत्ययो भवति ।

'अन उपधालोपिनः' इति विकल्पस्यापवादः 'शोभनः राजा यस्याः' इति विग्रहे ङीपि 'अल्लोपोऽनः' इत्यस्य प्रवृत्तौ 'सुराज्ञी' इति भवति ।

### ङीप्प्रत्ययविधायकं विधिसूत्रम्

**केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ४ । १ । ३०**

**एभ्यो नवभ्यो नित्यं ङीप् स्यात् संज्ञाछन्दसोः । 'अथोत इन्द्रः केवलीर्विशः' 'मामकी तनू' । भागधेयी । पापी । अपरी । समानी । आर्यकृती । सुमङ्गली । भेषजी । अन्यत्र 'केवला' इत्यादि । मामकग्रहणं नियमार्थम्, अण्णन्तत्वादेव सिद्धेः । तेन लोकेऽसंज्ञायां मामिका ।**

(केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजात्, च, अनुपसर्जनात्, संज्ञाछन्दसोः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** केवल, मामक, भागधेय, पाप, अपर, समान, आर्यकृत, सुमङ्गल, भेषज इत्येतेभ्यो नवभ्यो नित्यं ङीप्प्रत्ययो भवति । मदीयायामित्यर्थे छन्दसि 'मामकी' इति भवति । अत्र 'युष्मदस्मदोरन्यतरस्यां खञ् च' इत्यनेनाण्प्रत्यये 'तवकममकावेकवचने' इति प्रकृतेर्ममकादेशे ङीपि "सुपां सुलुक्-" इति सप्तम्या लुकि मामकीति । भागधेयीति । "भागरूपनामभ्यो धेयः" इति स्वार्थिके धेयप्रत्यये भागशब्दस्य पुँल्लिङ्गत्वेऽपि 'स्वार्थिकाः क्वचिल्लिङ्गवचनान्यतिवर्तन्ते" इति नियमात् स्त्रीत्वे ङीपि भागधेयीति । एवमन्यत्रापि बोध्यम् । मामकग्रहणमिति । 'मामकी' इत्यादावण्णन्तत्वादेव 'टिड्ढाणञ्-' इति ङीपि रूपसिद्धौ सूत्रे मामकग्रहणं लोके असंज्ञायाञ्च ङीब्निवृत्त्यर्थमिति भावः ।

### नुगागमविधायकं विधिसूत्रम्

**अन्तर्वत्पतिवतोर्नुक् ४ । १ । ३२**

**एतयोः स्त्रियां नुक् स्यात्। 'ऋन्नेभ्यो ङीप्'। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते। 'तत्रान्तरस्त्यस्यां गर्भः' इति विग्रहे अन्तश्शब्दस्याधिकरणशक्तिप्रधानतया स्तिसामानाधिकरण्याभावाद- प्राप्तो मतुब् निपात्यते। 'पतिवत्नी' इत्यत्र तु वत्वं निपात्यते। अन्तर्वत्नी। पतिवत्नी। प्रत्युदाहरणं तु अन्तरस्त्यस्यां शालायां घटः। पतिमती पृथिवी।**

(अन्तर्वत्पतिवतोः , नुक्, अनुपसर्जनात्)

**सरलार्थः –** अन्तर्वत् पतिवत्शब्दयोर्नुगागमो भवति स्त्रियाम्। तथा च कित्त्वादन्तागमे अन्तर्वत् न्, पतिवत् न् इत्यवस्थायाम् ऋन्नेभ्यो ङीपि अन्तर्वत्नी पतिवत्नीति।

### नकारादेशविधायकं विधिसूत्रम्

### पत्युर्नो यज्ञसंयोगे ४।१।३३

**पतिशब्दस्य नकारादेशः स्याद् यज्ञेन सम्बन्धे। वसिष्ठस्य पत्नी। तत्कर्तृकस्य यज्ञस्य फलभोक्त्रीत्यर्थः। दम्पत्योः सहाधिकारात्।**

(पत्युः, नः, यज्ञसंयोगे, अनुपसर्जनात्)

**सरलार्थः –** पतिशब्दस्य स्त्रीत्वे द्योत्ये यज्ञसन्दर्भे नकारादेशो भवति।

यज्ञसम्बन्धः, यज्ञेन सह स्वामितया (यज्ञफलभोक्तृत्वेन) सम्बन्धः। पतिशब्दान् नकारादेशे 'पत्न्' इत्यस्य नान्तत्वाद् ङीपि 'पत्नी' इति भवति।

### विभाषया नकारादेशविधायकं विधिसूत्रम्

### विभाषा सपूर्वस्य ४।१।३४

**पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः, गृहपतिः, गृहपत्नी। 'अनुपसर्जनस्य' इतीहोत्तरार्थमनुवृत्तमपि न पत्युर्विशेषणम्, किन्तु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी, दृढपतिः। वृषलपत्नी, वृषलपतिः। अथ 'वृषलस्य पत्नी' इति व्यस्ते कथमिति चेन्न, पत्नीव पत्नीत्युपचारात्। यद् वा आचारक्विबन्तात् कर्तरि क्विप्। अस्मिंश्च पक्षे - पत्नियौ, पत्नियः, इतीयङ्विषये विशेषः। सपूर्वस्य किम्? गवां पतिः स्त्री।**

(विभाषा, सपूर्वस्य, अनुपसर्जनात्, पत्युः, न)

**सरलार्थः –** पूर्वावयवसहितस्य पतिशब्दान्तस्य प्रातिपदिकस्य विकल्पेन नकारादेशो भवति। गृहपतिः गृहपत्नीति। गृहपतिशब्दस्य पतिशब्दान्तत्वात्, गृहशब्दात्मकपूर्वावयवसहितत्वाच्च अनेन वैकल्पिके नकारादेशे नादेशपक्षे 'ऋन्नेभ्यः' इति ङीप्। 'अनुपसर्जनस्य' इतीहोत्तरार्थमिति। अत्र सूत्रे सपूर्वस्येति पत्यन्तस्य श्रुतत्वेन तद्विशेषणत्वमेवानुपसर्जनस्येति बोध्यम्। अनुपसर्जनत्वस्य पत्यन्तविशेषणत्वेन बहुव्रीहिसमासे 'दृढः पतिः यस्याः' इति विग्रहे 'दृढपत्नी' दृढपतिः, इति नत्वविकल्पो भवतीति। ननु 'वृषलस्य पत्नी' इति विग्रहवाक्ये

सपूर्वत्वाभावात् प्रकृतसूत्रेण नत्वविकल्पः कथं तथा च 'वृषलपत्नी' इति प्रयोगानुपपत्तिरिति जिज्ञासायामाह पत्नीवेति। यज्ञसंयुक्तायां द्विजभार्यायां यः पत्नीशब्दो व्युत्पादितः, तस्यैव शूद्रस्त्रियामपि अयज्ञसंयुक्तायां गौण्या वृत्त्या प्रयोगः। सपूर्वस्य किमिति। प्रातिपदिकविशेषणतया पतिशब्दस्य तदन्तलाभे सति अव्यावर्तकत्वात् सपूर्वस्येति विशेषणं किमर्थमिति प्रश्नः। गवां पतिः स्त्री, अत्र असमस्तत्वाद् गवामित्यस्य न पूर्वावयवत्वम्। एवञ्च न नत्वविकल्प इति भावः।

### नकारादेशविधायकं विधिसूत्रम्

**नित्यं सपत्न्यादिषु ४।१।३५**

**पूर्वविकल्पापवादः। समानस्य सभावोऽपि निपात्यते। समानः पतिर्यस्याः सा सपत्नी। एकपत्नी। वीरपत्नी।**

(नित्यम्, सपत्न्यादिषु, अनुपसर्जनाद्, पत्युर्न)

**सरलार्थः –** सपत्न्यादिविषये तत्सिद्ध्यर्थं नित्यं नत्वं भवति। 'विभाषा सपूर्वस्य' इति विकल्पस्यापवादः। सपत्नीति समानस्य सभावो निपात्यते सपत्न्यादिगणे समानशब्दस्य पाठसत्वादिति ज्ञेयम्। पत्न्यादिगणे समान, एक, वीर, भ्रातृ, पुत्र इति शब्दाः पठिताः। तेन एकपत्नी, वीरपत्नी इत्यादावपि सूत्रेणानेन नत्वं भवतीति।

### ङीपा सह ऐ-आदेशविधायकं विधिसूत्रम्

**पूतक्रतोरै च ४।१।३६**

**अस्य स्त्रियामै आदेशो ङीप् च।**

(पूतक्रतोः, ऐ, च, अनुपसर्जनात्)

**सरलार्थः –** पूतक्रतुशब्दात् स्त्रीत्वे द्योत्ये ङीप्प्रत्ययः तत्सन्नियोगेन प्रकृतेः ऐकारादेशश्च विधीयेते।

**"इयं त्रिसूत्री पुंयोग एवेष्यते" (वा.) पूतक्रतोः स्त्री पूतक्रतायी। 'यया तु क्रतवः पूताः स्यात् पूतक्रतुरेव सा'।**

**सरलार्थः –** पूतक्रतोः रित्यादिसूत्रत्रयं पुंयोगात् स्त्रियां वृत्तावेव बोध्यम्। 'पूतः क्रतुः येन स पूतक्रतुः तस्य स्त्री इत्यर्थे ङीपि तकारादुकारस्य ऐकारे तस्य आयादेशे 'पूतक्रतायी' इति भवति।

### ङीपा सह ऐ-आदेशविधायकं विधिसूत्रम्

**वृषाकप्यग्निकुसितकुसिदानामुदात्तः ४।१।३७**

**एषामुदात्त ऐ आदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपायी। 'हरविष्णू वृषाकपी' इत्यमरः। 'वृषाकपायी श्रीगौर्योः' इति च। अग्नायी। कुसितायी, कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः।**

(वृषाकप्यग्निकुसितकुसिदानाम्, ऐ, उदात्तः, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीप्)

**सरलार्थः –** वृषाकपि, अग्नि, कुसित, कुसिद एतेभ्यः शब्देभ्यः स्त्रीत्वे द्योत्ये ङीप्प्रत्ययः तत्सन्नियोगेन प्रकृतेः उदात्तः ऐकारादेशश्च भवतः ।

'वृषाकपी'शब्दाद् ङीपि ऐकारान्तादेशे, तस्य आयादेशे 'वृषाकपायी' इति । कुसितकुसिदे अव्युत्पन्नप्रातिपदिके देवता विशेषस्य नामधेये । ततो ङीप्, ऐकारश्चान्तादेशः ।

### ऐकारदेश-औकारादेश-ङीप्प्रत्ययानां विधायकं विधिसूत्रम्

**मनोरौ वा ४ । १ । ३८**

**मनुशब्दस्यौकारादेशः स्यादुदात्तश्चैकारश्च वा, ताभ्यां सन्नियोगशिष्टो ङीप् च । मनोः स्त्री मनायी, मनावी, मनुः ।**

(मनोः, औ, वा, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, उदात्तः)

**सरलार्थः –** मनुशब्दात् स्त्रीत्वे द्योत्ये विभाषया ङीप्प्रत्ययः, तत्सन्नियोगेन प्रकृतेः उदात्तः ऐकारादेशः औकारादेशश्च वा भवतः ।

मनुशब्दस्यौकारादेशः, उदात्त ऐकारश्च वा स्यात्, ऐकारौकाराभ्यां समुच्चयेनैव विहितत्वाद् ङीप् च भवतीति । एवञ्च ऐकारौकाराभावपक्षे ङीबपि नेति फलति । 'सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति परिभाषावशादिति भावः ।

### ङीप्प्रत्ययनकारादेशयोः विधायकं विधिसूत्रम्

**वर्णादनुदात्तात्तोपधात्तो नः ४ । १ । ३९**

**वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात् प्रातिपदिकाद् वा ङीप् स्यात्, तकारस्य नकारादेशश्च । एनी, एता । रोहिणी, रोहिता ।**

(वर्णाद्, अनुदात्तात् , तोपधात्, तः, नः, अनुपसर्जनात्, वा)

**सरलार्थः –** वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् तकारोपधाद् वा ङीप् प्रत्ययो भवति, तकारस्य स्थाने नकारादेशश्च भवति ।

एनी एतेति । एतशब्दाद् ङीपि तकारस्य नकारादेशे च 'एनी' इति । ङीबभावे टाबेव । नत्वमपि न ङीपा सन्नियोगशिष्टत्वात् । एतशब्दः श्वेतपर्यायः, 'एनी' इत्यस्य श्वेतेत्यर्थः ।

**वर्णानां तणतिनितान्तानाम्** (फि.सू.) इति फिट्सूत्रेणाद्युदात्तः । '**त्र्येण्या शलल्या**' इति गृह्यसूम् । त्रीण्येतान्यस्या इति बहुव्रीहिः । अनुदात्तात् किम् ? श्वेता । घृतादीनां च (फि.सू.) इत्यन्तोदात्तोऽयम् अत इत्येव शितिः स्त्री ।

त, ण, ति, नि, त् इत्यन्तानां शब्दानामादिरुदात्त इत्यर्थः। प्रकृते एतशब्दे एकारस्य, रोहित शब्दे ओकारस्य चोदात्तत्वे अवशिष्टानामनुदात्तत्वं बोध्यम्। त्र्येण्या शलल्येति। त्रीणि एतानि श्वेतानि अवयवसंस्थानानि यस्या इति बहुव्रीहौ त्र्येतशब्दः। अत्र एतशब्दस्य वर्णवाचिन उपसर्जनत्वाद् ङीब् नत्वे न स्याताम्। अनुपसर्जनादित्यस्य वर्णान्तविशेषणत्वे तु त्र्येतशब्दस्यानुपसर्जनत्वाद् दोषाभावः। गृह्यम्-गृह्यन्ते = संगृह्यन्ते औपासनाग्निसाध्यकर्माण्यत्रे' ति व्युत्पत्त्या आपस्तम्बाश्वलायनादिप्रणीतकल्पसूत्रविशेषाणां ग्रहणं गृह्यपदेन बोध्यम्।

**पिशङ्गादुपसङ्ख्यानम् (वा.) पिशङ्गी, पिशङ्गा।**

**सरलार्थः –** पिशङ्गशब्दस्य मध्योदात्ततया अनुदात्तान्तत्वेऽपि तोपधत्वाभावाद् 'वर्णादनुदात्ताद्-' इत्यनेनाप्राप्तो ङीब् भवति।

**असितपलितयोर्न (वा.) असिता। पलिता।**

**सरलार्थः –** असितपलितशब्दयोर्ङीब्नत्वे न भवतः। असितशब्दस्य कृष्णवर्णवाचकतया, पलितशब्दस्य श्वेतवाचकतया च 'वर्णादनुदात्तात्-' इति प्राप्ते ङीब्नत्वे निषिध्येते।

**छन्दसि क्नमेके (वा.) असिक्नी। पलिक्नी। अवदातशब्दस्तु न वर्णवाची, किन्तु विशुद्धवाची। तेन अवदाता इत्येव।**

**सरलार्थः –** असितपलितयोस्तकारस्य ङीप्सन्नियोगेन क्नादेशमन्ये आचार्या इच्छन्ति। तथा च - असितशब्दाद् ङीपि तकारस्य क्नादेशे पररूपे 'यस्येति च' इत्यकारलोपे 'असिक्नी' इति। केचित्तु 'क्न्' इति नकारान्त एवेति वदन्ति।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**अन्यतो ङीष् ४।१।४०**

**तोपधभिन्नाद् वर्णवाचिनोऽनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्। कल्माषी। सारङ्गी। लघावन्ते द्वयोश्च बह्वचो गुरुः (फि.सू.) इति मध्योदात्तावेतौ। अनुदात्तान्तात् किम्? कृष्णा, कपिला।**

(अन्यतः, ङीष्, अनुपसर्जनात्, वर्णात्, अनुदात्तात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** यस्य वर्णवाचकशब्दस्यान्तिमः स्वरोऽनुदात्तोऽकारोऽस्ति तथा च यस्य उपधायां तकारभिन्नः वर्णः विद्यते, तस्मात् स्त्रीत्वे ङीष्प्रत्ययः विधीयते। कल्माषी सारङ्गी इत्यत्र लघावन्ते इति मध्योदात्तः लघावन्ते द्वयोश्च.... इत्यस्य च अन्ते एकस्मिन् लघौ सति द्वयोर्वा लघ्वोः सतोः पूर्वः बह्वच्कः गुरुः उदात्तः स्यादित्यर्थः।

## प्रयोगसिद्धिप्रकारः

**कुण्डोध्नी**

कुण्डमिव ऊधो यस्या इति विग्रहे बहुव्रीहिसमासे कुण्डोधस्शब्दाद् 'ऊधसोऽनङ्' इति सूत्रेणानङादेशेऽनुबन्धलोपे 'कुण्डोधन्' इति जाते अत्र 'डाबुभाभ्याम्-' इति वैकल्पिके डापि, 'अन उपाधालोपिनः' इति वैकल्पिके ङीपि, तदुभयाभावे 'ऋन्नेभ्यो ङीपि', इति प्राप्तस्य ङीपः 'अनो बहुव्रीहेः' इति निषेधे च प्राप्ते 'बहुव्रीहेरूधसो ङीष्' इति सूत्रेण ङीषि अनुबन्धलोपे भसंज्ञायाम् 'अल्लोपोऽनः' इत्यकारलोपे स्वादिकार्ये 'कुण्डोध्नी' इति रूपं सिद्ध्यति ।

## अभ्यासः

### १. अधोलिखितानां प्रश्नानामुत्तराणि दत्त

(क) उधोऽन्तस्य बहुव्रीहेरनङादेशविधायकं सूत्रं किम् ?

(ख) 'अत्यूधाः' इत्यत्र अनङादेशः कथं न भवति ।

(ग) 'दामहायनान्ताच्च' इत्यत्र अव्ययाननुवृत्तेः प्रयोजनं किम् ?

(घ) 'केवलमामकभागधेय-' इत्यादिसूत्रे मामकग्रहणं किमर्थम् ?

(ङ) 'पतिवत्नी' इत्यत्र किं निपात्यते?

(च) 'नित्यं सपत्न्यादिषु' इति सूत्रेण किं क्रियते ?

(छ) 'वर्णादनुदात्तात्तोपधात्तो नः' इति सूत्रं किं करोति ?

### २. अधस्तनसूत्राणामर्थं प्रकाशयत

(क) बहुव्रीहेरूधसो ङीष् ।

(ख) दामहायनान्ताच्च ।

(ग) नित्यं संज्ञाछन्दसोः ।

(घ) विभाषा सपूर्वस्य ।

(ङ) वर्णादनुत्तात्तोपधात्तो नः ।

### ३. अधोऽङ्कितानां वार्तिकानां कार्यं निर्दिशत

(क) त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् ।

(ख) पिशङ्गादुपसङ्ख्यानम् ।

(ग) असितपलितयोर्न ।

## ४. निर्दिष्टप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

द्व्यूध्नी, द्विहायनी, भागधेयी, पत्नी, एकपत्नी, रोहिणी, असिक्नी ।

## ५. रिक्तस्थानं पूरयत

(क) 'द्वे, ऊधसी यस्याः' इति विग्रहे ... ... ... इति रूपं भवति ।

(ख) शोभनः राजा यस्या इति विग्रहे ... ... ... इति रूपं भवति ।

(ग) 'द्विदाम्नी' इत्यत्र ... ... ... इति विग्रहः ।

(घ) 'सपत्नी' इत्यत्र ... ... ... इति विग्रहः ।

(ङ) 'मनोः स्त्री' इत्यर्थे ... ... ...रूपाणि भवन्ति ।

(च) एतशब्दाद् ङीपि तकारस्य ... ... ... आदेशे ... ... ... इति रूपं भवति, ङीबभावे टापि ... ... ... इति रूपं च भवति ।

## ६. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं दर्शयत

(क) 'ऊधोऽतिक्रान्ता' इति विग्रहे 'अतिशयितमूधो यस्याः' इति विग्रहे समानं रूपं न भवति ।

(ख) 'ऊद्दामा वडवा' इत्यत्र डाप्प्रत्ययो भवति ।

(ग) त्रिचतुर्भ्यां परस्य हायनशब्दस्य णत्वं भवति ।

(घ) मदीयायामित्यर्थे 'मामकी' इति न भवति ।

(ङ) 'दृढः पतिर्यस्याः' इति विग्रहे 'दृढपत्नी' इति न भवति ।

(च) यया क्रतवः पूताः सा 'पूतक्रतायी' इति भवति ।

(छ) मनोः स्त्री 'मनायी' इति भवति ।

(ज) 'गृह्यम्' इति कथनेन आपस्तम्बादिकल्पसूत्राणां ग्रहणं भवति ।

स्त्रीप्रत्ययप्रकरणे

# स्त्रियां विविधप्रत्ययानां निरूपणम्

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**षिद्गौरादिभ्यश्च ४ । १ । ४१**

**षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात् । नर्तकी । गौरी ।**

(षिद्गौरादिभ्यः, च, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** ष् इत् येषां ते षितः, गौरः आदिर्येषां ते गौरादयः, षितश्च गौरादयश्च षिद्गौरादयस्तेभ्यः षिद्गौरादिभ्यो ङीष् भवति । तथा च - 'नृती गात्रविक्षेपे' इत्यस्मात् 'शिल्पिनि ष्वुन्' इति ष्वुन् प्रत्यये 'षः प्रत्ययस्य' इति षकारस्येत्संज्ञायाम् नकारस्य 'हलन्त्यम्' इतीत्संज्ञायाम्, 'युवोरनाकौ' इत्यकादेशे गुणे रपरत्वे च निष्पन्नाद् 'नर्तक' शब्दाद् ङीषि 'यस्येति च' इत्यकारलोपे 'नर्तकी' इति भवति । एवं गौरशब्दाद् 'गौरी' इत्यपि ।

**अनडुहः स्त्रियाम् आम् वा** (वा.) **अनड्वाही, अनडुही ।**

**सरलार्थः –** अनडुह्शब्दस्य स्त्रियाम् आमागमो विकल्पेन भवतीति वार्तिकार्थः । 'अनडुहः स्त्री' इत्यर्थे गौरादिगणे पाठाद् ङीषि वैकल्पिके आमागमे मित्त्वादन्त्यादचः परे, यणि 'अनड्वाही' इति आमागमाभावे 'अनडुही' इति च भवति ।

**पिप्पल्यादयश्च** (ग.सू.) **आकृतिगणोऽयम् ।**

गौरादिगणे - गौर, मत्स्य, मनुष्य, श्रृङ्ग, गवय, हय, मुकय, गौतम, अनड्वाही-अनडुही, तरुण, तलुन, श्वन् इति पठित्वा 'पिप्पल्यादयश्च' इति पठित्वा पिप्पली, हरीतकी, कोशातकी, पृथिवी, मातामही इत्यादि पठितम् । गौरादिगणेऽवान्तरगणत्वेन पिप्पल्यादीनामुल्लेखः । गौरादेराकृतिगणत्वादेव सिद्धेऽवान्तरगणपाठो व्यर्थ इत्यपि केषाञ्चिन्मतम् ।

### यलोपविधायकं विधिसूत्रम्

**सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ६ । ४ । १४९**

**अङ्गस्योपधाया यस्य लोपः स्यात्, स चेद् यः सूर्याद्यवयवः ।**

(सूर्यतिष्यागस्त्यमत्स्यानाम्, यः, उपधायाः, तद्धिते, लोपः, ईति)

**सरलार्थः –** अङ्गस्योपधाभूतः सूर्यतिष्यागस्त्यमत्स्यशब्दानामवयवश्च यः यकारः तस्य लोपो भवति ।

**मत्स्यस्य ङ्याम्** (वा.) **मत्सी**

**सरलार्थः –** मत्स्यस्यावयवस्य यकारस्य लोपो भवति ङ्यामेव । मत्स्यशब्दाद् 'षिद्गौरादिभ्यश्च' इति ङीषि 'मत्स्यस्य ङ्याम्' इति नियमेन यलोपे 'यस्येति च' इत्यकारलोपे मत्सीति भवति ।

**सूर्यागस्त्ययोश्छे च ङ्यां च** (वा.)

**सरलार्थः –** सूर्यागस्त्ययोश्छे प्रत्यये ङ्यां च यकारस्य लोपो वक्तव्यः । यथा - सूरीयः सूरी । अगस्तीयः, अगस्ती ।

**तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्** (वा.)

**सरलार्थः –** 'नक्षत्रेण युक्तः कालः' 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इति च विहिते नक्षत्रसम्बन्धिनि अणि परतः तिष्यपुष्ययोर्यलोपो वक्तव्यः । यथा - तिष्येण युक्तः पूर्णमासः, तिष्ये भवो वा तैषः ।

**मातरि षिच्च** (वा.) **इति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीष्** । **दंष्ट्रा** ।

**सरलार्थः –** 'पितुर्माता' मातुर्माता चेति विग्रहे विहितो डामहच् प्रत्ययः षित् भवति । यथा पितुर्माता इति विग्रहे 'पितृव्यमातुलमातामहपितामहाः' इति सूत्रेण डामहच् प्रत्यये टिलोपे निपातनान् मातामहशब्दो निष्पद्यते ततः षित्त्वाद् ङीषि 'मातामही' इति भवति । एवं पितामही इत्यपि बोध्यम् । ननु डामहच्प्रत्ययस्य षित्त्वविधानादेव ङीष् सिद्धेः गौरादिषु मातामहीशब्दपाठो व्यर्थ इति चेत्, गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीष् इति ज्ञापनात् ।

## ङीष्प्रत्ययविधायकं विधिसूत्रम्

### जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्य-वर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ४ । १ । ४२

**एभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्यादिष्वर्थेषु ङीष् स्यात् । जानपदी वृत्तिश्चेत्, अन्या तु जानपदी । उत्सादित्वादञन्तत्वेन 'टिड्ढ-' इति ङीप्याद्युदात्तः । कुण्डी अमत्रं चेत्, कुण्डान्या । 'कुडि दाहे' । 'गुरोश्च हलः' इत्यप्रत्ययः । यस्तु 'अमृते जारजः कुण्डः' इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव । अमत्रे हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते, न तु नियम्यते । गोणी आवपनं चेत्, गोणान्या । स्थली अकृत्रिमा चेत्, स्थलाऽन्या । भाजी श्राणा चेत्, भाजान्या । नागी स्थूला चेत्, नागाऽन्या गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम् । सर्ववाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम् । काली वर्णश्चेत्, कालान्या । नीली अनाच्छादनं चेत्, नीलाऽन्या, नील्या रक्ता शाटीत्यर्थः । 'नील्या अन् वक्तव्यः'** (वा.) **इत्यन् । अनाच्छादनेऽपि न सर्वत्र, किन्तु 'नीलादोषधौ'** (वा.) **नीली । 'प्राणिनि च'** (वा.) **नीली गौः । 'संज्ञायां**

**वा' (वा.) नीली, नीला । कुशी अयोविकारश्चेत्, कुशाऽन्या । कामुकी मैथुनेच्छा चेत्, कामुकाऽन्या । कबरी केशानां सन्निवेशश्चेत्, कबराऽन्या - चित्रेत्यर्थः ।**

(जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादना-योविकारमैथुनेच्छाकेशवेशेषु, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष् )

**सरलार्थः –** जानपद, कुण्ड, गोण, स्थल, भाज, नाग, काल, नील, कुश, कामुक, कबर इत्येतेभ्यः शब्देभ्यः वृत्तिः, अमत्रा, आवपना, अकृत्रिमा, श्राणा, स्थौल्यम्, वर्णः, अनाच्छादनम्, अयोविकारः, मैथुनेच्छा, केशवेशः इत्येषु अर्थेषु द्योत्येषु ङीष् प्रत्ययो भवति ।

## ङीष्प्रत्ययविधायकं विधिसूत्रम्

**शोणात् प्राचाम् ४ । १ । ४३**

**शोणी, शोणा ।**

(शोणात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, प्राचाम्, अनुपसर्जनात्, ङीष्)

**सरलार्थः –** शोणशब्दात् प्राचां मते एव ङीष् भवति नान्येषाम् । 'अन्यतो ङीष्' इति सूत्रेण नित्यं ङीषि प्राप्ते विकल्पार्थमिदं सूत्रं बोध्यम् ।

## ङीष्प्रत्ययविधायकं विधिसूत्रम्

**वोतो गुणवचनात् ४ । १ । ४४**

**उदन्ताद् गुणवाचिनो वा ङीष् स्यात् । मृद्वी, मृदुः । उतः किम् ? शुचिः । गुण इति किम् ? आखुः ।**

(उतः, गुणवचनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, वा, ङीष् )

**सरलार्थः –** उकारान्तगुणवाचकप्रातिपदिकात् स्त्रीत्वे द्योत्ये विभाषया ङीष्प्रत्ययो भवति ।

मृदुशब्दाद् ङीषि यणि 'मृद्वी' इति, ङीष्प्रत्ययाभावे तु मृदुरिति । अत्र सूत्रे उत इति प्रातिपदिके विशेषणाभावे हि "शुचिः" इत्यत्रापि ङीष् स्यात् । गुण इत्यस्याभावे हि मूषिकावाचकाद् आखुशब्दादपि ङीष् स्यात् । गुणशब्दोपादाने आखोस्तु जातिविशिष्टद्रव्यवचनत्वाद् गुणवचनत्वाभावान्न ङीष् ।

**खरुसंयोगोपधान्न (वा.) खरुः । पतिंवरा कन्या । पाण्डुः ।**

**सरलार्थः –** खरुशब्दात् संयोगोपधाच्च 'वोतो गुणवचनात्' इति विहितो ङीष् न भवति । तथा च 'खरु'शब्दस्य पाणिग्रहणोत्कण्ठाभिधायित्वाद् गुणवचनत्वेऽपि ङीष् न भवति । 'पाण्डु'शब्दस्य संयोगोपधत्वाद् न ङीष् इति बोध्यम् ।

## विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्

**बह्वादिभ्यश्च ४ । १ । ४५**

**एभ्यो वा ङीष् स्यात् । बह्वी, बहुः ।**

(बह्वादिभ्यः, च, अनुपसर्जनात्, स्त्रियाम् । ङीष् । वा)

**सरलार्थः** – बह्वादिगणपठितेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वे द्योत्ये विभाषया ङीष्प्रत्ययो भवति ।

**कृदिकारादक्तिनः** (ग.सू.) **रात्रिः, रात्री ।**

**सरलार्थः** – कृतो य इकारस्तदन्तात् प्रातिपदिकात् ङीष् स्यात् न तु क्तिन्नन्ताद् । राधातोरौणादिके त्रिप्प्रत्यये निष्पन्नाद् रात्रिशब्दाद् ङीषि 'रात्री' इति ङीष्प्रत्ययाभावे 'रात्रिः' इति ।

**सर्वतोऽक्तिन्नर्थादित्येके** (ग.सू.) **शकटिः, शकटी अक्तिन्नर्थात् किम् ? अजननिः**

**सरलार्थः** – कृदिकारान्तादकृदिकारान्तादपि ङीष् वा स्यात, न तु क्तिन्नर्थकप्रत्ययान्ताद् । शकटिः, शकटीति । शकटिशब्दस्याव्युत्पन्नप्रातिपदिकत्वात् कृदन्तत्वाभावात् सर्वत इति वचनम् ।

अजननिरिति । 'स्त्रियां क्तिन्' इत्यधिकारे 'आक्रोशे नञ्यनिः' इति नञि उपपदे जनेरनिप्रत्यये निष्पन्नः 'अजननि'शब्दः अत्र अक्तिन इत्युक्तौ निषेधो न स्यात्, तस्माद् अक्तिन्नर्थादित्युक्तं ज्ञेयम् ।

## ङीष्प्रत्ययविधायकं विधिसूत्रम्

**पुंयोगादाख्यायाम् ४ । १ । ४८**

**या पुमाख्या पुंयोगात् स्त्रियां वर्तते, ततो ङीष् स्यात् । गोपस्य स्त्री गोपी ।**

(पुंयोगात्, आख्यायाम्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः** – पुंसा योगः पुंयोगः । पुंयोगात् हेतोर्यत् प्रातिपदिकं स्त्रियां वर्तते तस्माद् प्रातिपदिकाद् ङीष्प्रत्ययो भवति ।

गाः पातीति गोपः, तस्य स्त्री इत्यर्थे, गोपजायायां गोरक्षणाभावेऽपि तद्भार्यात्वात् तद्व्यपदेशः, ततश्च पुंयोगमाश्रित्य स्त्रियां वर्तमानत्वाद् ङीषि 'यस्येति च' इत्यकारलोपे 'गोपी' इति । या तु स्वयमेव गाः पाति, सा तु गोपा, तत्र गोपाशब्दस्य स्वत एव स्त्रियां वृत्त्या पुंयोगादवृत्तेः ।

**पालकान्तान्न** (वा.) **गोपालिका । अश्वपालिका ।**

**सरलार्थः** – पालकशब्दान्तात् पुंयोगलक्षणङीष् न भवति । गोपालकस्य स्त्री इत्यर्थे ङीष् न किन्तु टापि "प्रत्ययस्थात्-" इति इत्वे "गोपालिका" इति भवति ।

**सूर्याद्देवतायां चाब्वाच्यः** (वा.) **सूर्यस्य स्त्री देवता सूर्या । देवतायां किम् ? सूरी कुन्ती, मानुषीयम् ।**

**सरलार्थः –** देवताभूतायां स्त्रियां पुंयोगाद् वर्तमानात् सूर्यशब्दात् 'चाप्' वक्तव्यः । 'पुंयोगादाख्यायाम्' इति ङीषोऽपवादः । चापि चपावितौ । सूर्यशब्दात् चापि अनुबन्धलोपे सवर्णदीर्घे 'सूर्या' इति भवति । देवतायामित्यस्याभावे 'सूर्यस्य स्त्री' इत्येवार्थे कुन्त्यामपि 'सूर्या' शब्दत्वव्यवहारः प्राप्नोति । 'देवता' इत्युक्तौ तु इयं कुन्ती मानुषी । अतः सूर्यशब्दात् ङीषि । सूर्यातिष्य - 'इति यलोपे अकारलोपे 'सूरी' इति भवति ।

### आनुगागमङीष्प्रत्यययोः विधायकं विधिसूत्रम्

**इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ४ । १ । ४९**

**एषामानुगागमः स्यान् ङीष् च । इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते, तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते । इतरेषां चतुर्णामुभयम् । इन्द्राणी ।**

(इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणाम्, आनुक्, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम् ङीष्)

**सरलार्थः –** इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष्प्रत्ययो भवति, आनुगागमश्च । इन्द्र-वरुण-भव-शर्व-रुद्र-मृडशब्दानां मातुलाचार्ययोश्च 'पुंयोगादाख्यायाम्' इत्यनेनैव ङीषि सिद्धे अनेन आनुगागममात्रं विधीयते, हिमारण्ययवयवनानां तु आनुक्, ङीष् चेत्युभयं विधीयते, तत्र पुंयोगस्यासम्भवादिति बोध्यम् । 'इन्द्रस्य स्त्री' इत्यर्थे ङीषि आनुगागमे ककारस्येत्संज्ञायां कित्त्वादन्तावयवत्वे, उकारस्योच्चारणर्थत्वादपाये सवर्णदीर्घे णत्वे 'इन्द्राणी' इति भवति । एवमेव वरुणानी भवानी, मृडानीत्यादीनामपि सिद्धिप्रक्रिया बोध्या ।

**हिमारण्ययोर्महत्त्वे** (वा.) **महद्धिमं हिमानी । महदरण्यम् अरण्यानी ।**

**सरलार्थः –** महत्त्वविशिष्टे अर्थे वर्तमानयोरनयोरानुङ्ङीषौ भवतः ।

**यवाद् दोषे** (वा.) **दृष्टो यवो यवानी ।**

**सरलार्थः –** दुष्टयवे वृत्तौ यवशब्दाद् आनुङ्ङीषौ भवत ।

**यवनाल्लिप्याम्** (वा.) । **यवनानां लिपिर्यवनानी ।**

**सरलार्थः –** लिपिः = अक्षरविन्यासः, तत्र वृत्तौ यवनशब्दाद् आनुङ्ङीषौ भवतः ।

**मातुलोपाध्याययोरानुग् वा** (वा.) **मातुलानी, मातुली । उपाध्यायानी, उपाध्यायी ।**

**सरलार्थः –** मातुलोपाध्याययोरानुगागमो विकल्पेन भवति । अत्र आनुगेव विकल्प्यते, आनुगभावेऽपि पक्षे ङीष् भवत्येव । मातुलस्य स्त्री **मातुलानी, मातुली** । उपाध्यायस्य स्त्री **उपाध्यायानी उपाध्यायी** ।

**या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः (वा.) उपाध्यायी उपाध्याया ।**

**सरलार्थः –** या स्वयमेवाध्यापयति, त तु उपाध्यायस्य स्त्री तत्र पुंयोगाभावेऽपि केवलङीष् विकल्पो वक्तव्यः ।

**आचार्यादणत्वं च (वा.) आचार्यस्य स्त्री आचार्यानी । पुंयोग इत्येव, आचार्या स्वयं व्याख्यात्री ।**

**सरलार्थः –** आचार्यात् पुंयोगे ङीषानुगौ भवतः, 'अट्कुप्वाङ्-' इति णत्वं च न भवति । अत्र पुंयोगग्रहणानुवृत्त्या या स्वयं धर्मोपदेष्ट्री तत्र ङीषानुगौ न भवत इति बोध्यम् ।

**अर्यक्षत्रियाभ्यां वा स्वार्थे (वा.) अर्याणी, अर्या, स्वामिनी वैश्या वेत्यर्थः । क्षत्रियाणी, क्षत्रिया । पुंयोगे तु अर्यी । क्षत्रियी । कथं 'ब्रह्माणी' इति । ब्रह्माणमानयति जीवयतीति कर्मण्यण् ।**

**सरलार्थः –** अर्यक्षत्रियाभ्यामानुङ्ङीषौ भवतः स्वार्थे । 'अर्यः स्वामिवैश्ययोः' इति निपातनाद् अर्याणी, अर्या शब्दयोः स्वामिनी वैश्येत्यर्थो निर्दिष्टः । अर्यस्य स्त्री क्षत्रियस्य स्त्री विग्रहे तु पुंयोगे ङीपि अर्यी क्षत्रियी इति ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**क्रीतात् करणपूर्वात् ४ । १ । ५०**

**क्रीतान्ताददन्तात् करणादेः स्त्रियां ङीष् स्यात् । वस्त्रक्रीती । क्वचिन्न धनक्रीता ।**

(क्रीतात्, करणपूर्वात्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** करणं पूर्वं यस्मिन्निति करणपूर्वं प्रातिपदिकम् । क्रीतशब्दान्तात् प्रातिपदिकात् करणपूर्वात् स्त्रियां ङीष्प्रत्ययो भवति ।

'वस्त्रैः क्रीता' इति विग्रहे 'वस्त्र भिस् क्रीत' इति स्थिते "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषायाः सुबुत्पत्तेः प्राक् क्रीतशब्देन समासे "सुपोधातु-" इति सुब्लुकि 'वस्त्रक्रीत' इत्यस्यादन्तत्वान् ङीषि 'यस्येति च' इत्यकारलोपे वस्त्रक्रीतीति । एवं हि 'धनक्रीता' इत्यत्रापि ङीष् स्यादिति शङ्कायामाह क्वचिन्नेति । "कर्तृकरणे कृता बहुलम्" इत्यत्र बहुलग्रहणात् 'गतिकारकोपपदानाम्-" इत्यस्य क्वचिदप्रवृत्त्या 'धनेन क्रीता' इत्यत्र सुबुत्त्यनन्तरं समासे तत्रान्तरङ्गत्वात् सुबुत्पत्तेः प्रागेव टापि अदन्तत्वाभावात् सूत्रस्यास्य प्रवृत्तिर्नेति बोध्यम् ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**क्तादल्पाख्यायाम् ४ । १ । ५१**

**करणादेः क्तान्താददन्तात् स्त्रियां ङीष् स्यादल्पत्वे द्योत्ये/अभ्रलिप्ती द्यौः । अल्पाख्यायाम् किम् ? चन्दनलिप्ता अङ्गना ।**

(क्ताद्, अल्पाख्यायाम्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्, करणपूर्वात्)

**सरलार्थः –** करणपूर्वात् प्रातिपदिकात् क्तान्तादल्पाख्यायां ङीष्प्रत्ययो भवति ।

अल्पाख्यायामिति समुदायोपाधिः, अभ्रैरल्पैर्लिप्ता अभ्रलिप्ती' 'कृद्ग्रहणे-' इति परिभाषया समुदायस्यापि क्तान्तत्वान् ङीष्प्रत्ययो भवति ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**बहुव्रीहेश्चान्तोदात्तात् ४ । १ । ५२**

**बहुव्रीहेः क्तान्तादन्तोदात्तादन्तात् स्त्रियां ङीष् स्यात् । जातिपूर्वादिति वक्तव्यम् (वा.) तेन बहुनञ्सुकालसुखादिपूर्वान्न । उरुभिन्नी । नेह बहुक्रीता ।**

(बहुव्रीहेः, च, अन्तोदात्तात्, अनुपसर्जनात्, ङीष्, क्तात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** बहुव्रीहिर्योऽन्तोदात्तः तस्माद् क्तान्ताद् प्रातिपदिकात् स्त्रियां ङीष्प्रत्ययो भवति ।

बहुव्रीहेश्चान्तोदात्तादित्यत्र जातिपूर्वादिति वक्तव्यमित्यर्थः । तेन = जातिपूर्वादिति विशेषणेन बह्वादिपूर्वान्न ङीषित्याऽऽशयः । ऊरुभिन्नीति । 'उरू भिन्नौ (असंयुक्तौ) यस्याः' इति विग्रहे 'जातिकालसुखादिभ्यः-' इति सूत्रेणान्तोदात्तत्वे अनेन सूत्रेण ङीषि 'ऊरुभिन्नी' इति भवति । 'बहवः क्रीता यया' इत्यत्र तु जातिपूर्वत्वाभावाद् ङीष् न् भवति ।

**जातान्तान्न** (**वा.**) **दन्तजाता** ।

**सरलार्थः –** जातशब्दान्ताद् बहुव्रीहेः पूर्वोक्तो ङीष् न भवति । 'दन्ता जाता यस्याः' इति विग्रहे दन्तजाता ।

**पाणिगृहीती भार्यायाम्** (**वा.**) **पाणिगृहीता अन्या** ।

**सरलार्थः –** विधिवदूढा भार्या, तस्यां विद्यमानादेव पाणिगृहीतशब्दाद् ङीष्प्रत्ययो भवति । विवाहकाले विधिवत् 'पाणिः गृहीतो यस्याः' इति विग्रहः ।

### विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्

**अस्वाङ्गपूर्वपदाद् वा ४ । १ । ५३**

**पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् । सुरापीती, सुरापीता । अन्तोदात्तात् किम् ? वस्त्रच्छन्ना । 'अनाच्छादनात्' इत्युदात्तनिषेधः । अत एव पूर्वेणापि न ङीष् ।**

(अस्वाङ्गपूर्वपदाद्, वा, अनुपसर्जनाद्, ङीष्, क्तात्, बहुव्रीहेः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, च, अन्तोदात्तात्)

**सरलार्थः –** अस्वाङ्गं यत् पूर्वपदं तस्मात् परं यत् क्तान्तं तदन्ताद् बहुव्रीहेर्ङीष् वा स्याद्। पूर्वेणेति- 'बहुव्रीहेश्चान्तोदात्तात्' इति पूर्वसूत्रेण नित्ये ङीषि प्राप्ते तद्विकल्पोऽत्र विधीयते। एवं च - 'सुरा पीता यया' इति विग्रहे वैकल्पिके ङीषि "सुरापीती" इति ङीषोऽभावे टापि "सुरापीता" इति च रूपद्वयम्। अत्र सूत्रे अन्तोदात्तादित्यस्यानुवृत्त्या 'वस्त्रच्छन्ना' इत्यत्र अनुदात्तान्तत्वाद् अन्तोदात्तत्वाभावे 'अस्वाङ्गपूर्वपदात्' इत्यनेन 'बहुव्रीहेश्चान्तोदात्तात्' इत्यनेन च न ङीषिति बोध्यम्।

### विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्

**स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ४।१।५४**

**असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्ताददन्तात् प्रातिपदिकाद् वा ङीष्। केशानतिक्रान्ता अतिकेशी, अतिकेशा। चन्द्रमुखी चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। उपसर्जनात् किम्? शिखा।**

(स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्, वा)

**सरलार्थः –** स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् प्रत्ययो भवति।

केशानतिक्रान्तेति "अत्यादयः क्रान्ताद्यर्थे-" इति तत्पुरुषसमासे "एकविभक्ति-" इत्यनेन केशशब्दस्योपसर्जनत्वाद् वैकल्पिके ङीषि 'अतिकेशी' इति ङीषोऽभावे टापि 'अतिकेशा' इति च भवति। चन्द्रमुखीति 'चन्द्र इव मुखं यस्याः' इति विग्रहः। एवं सु=शोभनौ गुल्फौ यस्याः सुगुल्फा इत्यस्यापि विग्रहः, अत्र संयोगोपधत्वाद् ङीष् न भवति। उपसर्जनादित्यस्याभावे हि 'शिखा' इत्यत्रापि टापं बाधित्वा पक्षे ङीष् स्यादिति भावः।

**स्वाङ्गं त्रिधा - अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्। सुस्वेदा, द्रवत्वात्। सुज्ञाना, अमूर्तत्वात्। सुमुखा शाला अप्राणिस्थत्वात्। सुशोफा, विकारजत्वात्।**

**'अतस्थं तत्र दृष्टं च'**

**सुकेशी, सुकेशा वा रथ्या। अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्।**

**'तेन चेत्तत्तथा युतम्'**

**सुस्तनी, सुस्तना वा प्रतिमा, प्राणिवत् प्राणिसदृशे स्थितत्वात्।**

**सरलार्थः –** स्वाङ्गपदेन भाष्ये त्रिधा निरुक्तं स्वाङ्गमिह विवक्षितम्। तत्र - 'अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्' इति प्रथमं स्वाङ्गलक्षणम्। न विद्यते द्रवो यस्य तद् अद्रवम्। मूर्तिः = अवयवसंयोगः अस्यास्तीति मूर्तिमत्। स्पर्शवद्द्रव्यपरिमाणं मूर्तिः, तद्वदित्यर्थः। प्राणिनि = प्राणवति जन्तौ विद्यमानं प्राणिस्थम्। अविकारजम् = रोगादिविकाराजन्यं च यत् तत् प्रथमं स्वाङ्गमित्यर्थः। अद्रवमित्यस्य प्रयोजनं सुस्वेदेति। सु = शोभनः स्वेदो घर्मजः उदप्रस्रवो यस्या इति विग्रहः, अस्य द्रवत्वान्न स्वाङ्गत्वमिति न ङीष्। मूर्तिमदिस्यस्य प्रयोजनम् -

सुज्ञानेति । 'सु = शोभनं ज्ञानं यस्या' इति विग्रहः । अत्र अमूर्तत्वान्न स्वाङ्गत्वम् । प्राणिस्थमित्यस्य प्रयोजनम् - सुमुखा शालेति । सु = शोभनं मुखं = प्रथमभागो यस्या इति विग्रहः, अत्र अप्राणिस्थत्वान्न स्वाङ्गत्वमिति । अविकारजमित्यस्य प्रयोजनम् - सुशोफेति । सु = अधिकः, शोफः = श्वयथुः यस्या इति विग्रहः अत्र विकारजत्वाद् = रोगजत्वान्न स्वाङ्गत्वमिति । एवम् - 'अतत्स्थं तत्र दृष्टं च' इति द्वितीयं स्वाङ्गलक्षणम् । अतत्स्थम् = अप्राणिस्थम्, तत्र = प्राणिनि दृष्टं च यत् तदपि स्वाङ्गमित्यर्थः । रथ्यास्थानां केशानां प्राणिस्थत्वाभावात् पूर्वलक्षणेनासिद्धेर्द्वितीयं लक्षणम् । अप्राणिस्थस्यापीति । इदानीं प्राणिस्थत्वाभावेऽपि कदाचित् प्राणिस्थत्वादपि स्वाङ्गमित्याऽऽशयः । 'तेन चेत्तत्तथायुतम्' इति तृतीयं स्वाङ्गलक्षणम् । तेन = प्राणिस्थेन, स्तनाद्यङ्गाकृतिविशेषेण तद् = अप्राणिद्रव्यं प्रतिमादि, तथा प्राणिद्रव्याद् युतं =सम्बद्धं यदि तदा तत् स्तनाद्याकृतिकम् अप्राणिनोऽपि स्वाङ्गमित्यर्थः । सुस्तनीति । सु = शोभनौ स्तनौ = स्तनाकृती अवयवौ यस्या इति विग्रहः । प्राणिवत् प्राणिसदृशे प्रतिमादिद्रव्ये स्थितत्वात् स्वाङ्गमित्यर्थः ।

### विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्

**नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ४ । १ । ५५**

**एभ्यो वा ङीष् स्यात् । आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते, पुरस्तादपवादन्यायात् । ओष्ठादीनां पञ्चानां तु 'असंयोगोपधात्' इति पर्युदासे प्राप्ते वचनम्, मध्येऽपवादन्यायात् । सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः । तुङ्गनासिकी, तुङ्गनासिकेत्यादि । नेह सहनासिका, अनासिका अत्र वृत्तिः 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' । स्वङ्गी, स्वङ्गेत्यादि । एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् । 'भाष्यह्यनुक्तत्वादप्रमाणम्' इति प्रामाणिकाः अत्र वार्तिकानि ।**

(नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गात्, च, स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्, वा)

**सरलार्थः-** उपसर्जनभूतनासिकादिशब्दान्तेभ्यः प्रातिपदिकेभ्यो वा ङीष्प्रत्ययो भवति । आद्ययोरिति- नासिकोदरशब्दयोर्विषये 'न क्रोडादिबह्वचः' इति निषेधः प्राप्तः, अनेन ङीष् विकल्वविधिना बाध्यते, 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायादिति भावः । ओष्ठादीनामिति- 'सुगुल्फा' इत्यादौ असंयोगोपधादित्यस्य सावकाशत्वान्निषेधे प्राप्ते पक्षे ङीब्विधानाय सूत्रमिदम् 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्', इति न्यायादित्यर्थः । ननु 'नासिकोदर-' इति ङीष्विकल्पः 'तुङ्गनासिकी' इत्यादौ सावकाशः, 'सहनञ्-' इति निषेधस्तु 'सहकेशा' इत्यादौ सावकाशः, 'सहनासिका' इत्यादौ उभयप्राप्तौ कतरस्य बाधःस्यादित्याशङ्कायामाह- 'सहनञ्-' इति निषेधस्तु परत्वाद् 'नासिकोदर-' इति ङीष् विकल्पविधेर्बाधक इति ।

**पुच्छाच्च** (वा.) **सुपुच्छी, सुपुच्छा** ।

**सरलार्थः –** संयोगोपधत्वेऽपि पुच्छशब्दान्ताद् ङीष् वा भवति ।

**कबरमणिविषशरेभ्यो नित्यम् (वा.) कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरीत्यादि ।**

**उपमानात् पक्षाच्च पुच्छाच्च (वा.) नित्यमित्येव । उलूकपक्षी शाला । उलूकपक्षी सेना ।**

**सरलार्थः–** कबरान्तादिभ्यः परो यः पुच्छशब्दः तदन्ताद् नित्यं ङीष् वक्तव्यम् । उपमानात् परौ यौ पक्षपुच्छशब्दौ तदन्तादपि ङीष् भवति । अत्र नित्यमित्यनुवर्तते । उलूकपक्षाविव पक्षौ पार्श्वे यस्या इति विग्रहे 'उलूकपक्षी' इति एवम् उलूकपुच्छमिव पुच्छं यस्या इति विग्रहे 'उलूकपुच्छी' इति च ।

## विशेषाध्ययनम्

१. गौरादिगणे अवान्तरगणरूपेण पिप्पल्यादिगणस्योल्लेखो वर्तते ।

२. 'सूर्यस्य स्त्री देवता' इत्यर्थे सूर्या इति भवति, यदि सूर्यस्य स्त्री मानुषी तदा 'सूरी' इति रूपं बोध्यम् ।

३. 'पुंयोगादाख्यायाम्' इत्यनेन विधीयमानो ङीष्प्रत्ययः पालकशब्दान्ताद् न भवति, अन्यत्र तु भवत्येव, तथा च इन्द्र - वरुण - भव - शर्व - रुद्र - मृड मातुलाचार्यशब्देभ्यः 'पुंयोगादा-ख्यायाम्' इत्यनेन ङीषि सिद्धे 'इन्द्रवरुणभवशर्वरुद्र-' इति सूत्रेण आनुगागम एव भवति ।

४. 'उपाध्यायस्य स्त्री' इत्यर्थे उपाध्यायानी - उपाध्यायी इति रूपद्वयम् या तु स्वयमध्यापयति तत्र उपेत्य अस्या अधीयत इत्यर्थे उपाध्याया इति रूपद्वयं ङीषो वैकल्पिकत्वाद् बोध्यम् ।

## प्रयोगसिद्धिप्रकारः

**अनड्वाही, अनडुही**

'अनडुहः, स्त्री' इत्यर्थे गौरादित्वात् 'षिद्गौरादिभ्यश्च' इति ङीषि अनुबन्धलोपे 'अनुडुहः स्त्रियाम् आम् वा' इति वार्तिकेन वैकल्पिके आमागमे 'मिदचोऽन्त्यात् परः' इत्यनेन अन्त्यादचः परो भवतीति बोधिते सति 'अनडु आह् ई' इति स्थिते यणि 'अनड्वाही' इति, आमागमाभावे 'अनडुही' इति, सिद्ध्यति ।

**अतिकेशी - अतिकेशा**

'केशानतिक्रान्ता' इति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति वार्तिकेन समासे 'एकविभक्ति चापूर्वनिपाते' इति सूत्रेण केशशब्दस्योपसर्जनत्वात् 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति सूत्रेण वैकल्पिके ङीषि अनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यकारलोपे प्रातिपदिकत्वात् स्वादिकार्ये 'अतिकेशी' इति, ङीषोऽभावे टापि सवर्णदीर्घे 'अतिकेशा' इति च सिद्ध्यति ।

## अभ्यासः

### १. अधस्तनप्रश्नानामुत्तराणि दत्त

(क) गौरादिगणपठितेभ्यो ङीष्-विधायकं सूत्रं किम् ?

(ख) 'मत्सी' इत्यत्र यकारस्य लोपः केन भवति ।

(ग) 'मातरि षिच्च' इति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठप्रयोजनं किम् ?

(घ) 'वोतो गुणवचनात्' इति सूत्रे गुणग्रहणप्रयोजनं किम् ?

(ङ) 'इन्द्राणी' इति प्रयोगे ङीष्विधायकं सूत्रं किम् ?

(च) 'मातुलस्य स्त्री' इत्यर्थे आनुगागमः केन भवति ।

(छ) 'उपाध्यायस्य स्त्री' इत्यर्थे निष्पन्ने रूपे निर्दिशत ।

(ज) स्वाङ्गं कतिविधम् ? किञ्च तत् ?

### २. अधोऽङ्कितानां सूत्राणामर्थं निर्दिशत

(क) सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ।

(ख) वोतो गुणवचनात् ।

(ग) पुंयोगादाख्यायाम् ।

(घ) क्रीतात् करणपूर्वात् ।

(ङ) स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ।

### ३. अधोनिर्दिष्टानां वार्तिकानामाशयं प्रकाशयत

(क) मत्स्यस्य ङ्याम् ।

(ख) खरुसंयोगोपधान्न ।

(ग) पालकान्तान्न

(घ) सूर्याद्देवतायां चाब्वाच्यः ।

(ङ) अर्यक्षत्रियाभ्यां वा स्वार्थे ।

## ४. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

मत्सी, शोणी, मृद्वी, अश्वपालिका, भवानी, यवनानी ।

## ५. रिक्तस्थानं पूरयत

(क) उदन्ताद् गुणवाचिनो वा ङीष् विधायकं सूत्रम् ... ... ... ।

(वातो गुणवचनात्, शोणात् प्राचाम्)

(ख) बह्वादिगणपठितेभ्यः स्त्रियाम् ... ... ... भवति ।

(ङीष्, टाप्)

(ग) सूर्यस्य स्त्री देवता इत्यर्थे ... ... ... भवति ।

(सूरी, सूर्या)

(घ) 'उपाध्यायस्य स्त्री' इत्यर्थे ... ... ... भवति ।

(उपाध्यायानी, उपाध्याया)

(ङ) सुरापीता यया इति विग्रहे ... ... ... भवति ।

(सुरापीता, सुरापीती)

(च) 'अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्' इति ... ... ... स्वाङ्गलक्षणम् ।

(प्रथमम्, द्वितीयम्)

## ६. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं योजयत

(क) येषां ष् इत् ते षितः भवन्ति ।

(ख) नर्तकशब्दाद् ङीषि 'नर्तकी' इति भवति ।

(ग) 'शुचिः' 'वोतो गुणवचनाद्' इत्यस्य प्रवृत्तिर्भवति ।

(घ) बह्वादिगणपठितेभ्यः स्त्रियां नित्यं ङीष् भवति ।

(ङ) रात्रिः, रात्री इति रूपद्वयं शुद्धमेव ।

(च) 'गोपस्य स्त्री' इत्यर्थे गोपी, गोपा इति रूपद्वयं भवति ।

(छ) या स्वयमध्यापयति सा उपाध्याया न तु उपाध्यायानी ।

(ज) आचार्यस्य स्त्री आचार्यानी या स्वयं व्याख्यात्री सा आचार्या ।

## ७. परस्परं यथौचिति मेलयत

| (अ) | (आ) |
|---|---|
| अश्वपालकस्य स्त्री | यवनानी । |
| सूर्यस्य स्त्री (मानुषी) | सुज्ञाना । |
| यवनानां लिपिः | अश्वपालिका । |
| आचार्यस्य स्त्री | चन्द्रमुखी । |
| चन्द्र इव मुखं यस्याः | सूरी । |
| सु = शोभनं ज्ञानं यस्याः | आचार्यानी । |

स्त्रीप्रत्ययप्रकरणे

# स्त्रियां विविधप्रत्ययानां निरूपणम्

### ङीष्प्रत्ययनिषेधविधायकं सूत्रम्

**न क्रोडादिबह्वचः ४ । १ । ५६**

**क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् । कल्याणक्रोडा । अश्वानामुरः क्रोडा । आकृतिगणोऽयम् । सुजघना ।**

(न, क्रोडादिबह्वचः, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम, ङीष्, स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्)

**सरलार्थः –** क्रोडाद्यन्ताद् बह्वजन्तात् च प्रातिपदिकाद् स्त्रियां ङीष्प्रत्ययो न भवति ।

### ङीष्प्रत्ययनिषेधविधायकं सूत्रम्

**सहनञ्विद्यमानपूर्वाच्च ४ । १ । ५७**

**सहेत्यादित्रिकपूर्वान्न ङीष् । सकेशा अकेशा । विद्यमाननासिका ।**

(न, सहनञ्विद्यमानपूर्वाच्च, अनुपसर्जनाद्, ङीष्, स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** सह नञ् विद्यमान इत्येवंपूर्वात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति ।

### ङीष्प्रत्ययनिषेधविधायकं सूत्रम्

**नखमुखात् संज्ञायाम् ४ । १ । ५८**

**ङीष् न स्यात् । शूर्पणखा । गौरमुखा । संज्ञायां किम् ? गौरमुखी कन्या ।**

(नखमुखात्, संज्ञायाम्, ङीष्, न स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** नखमुखात् संज्ञायां ङीष् न स्यात् । सूर्पाणीव कररुहा यस्या इत्यस्वपदविग्रहः, संज्ञात्वेन नित्यसमासाय । पूर्वपदात् संज्ञायामग इति णत्वम् । 'शूर्पणखा' इति राक्षसीविशेषस्य नाम । गौरमुखा इत्यपि कस्याश्चिन्नाम । ताम्रमुखीति । 'ताम्रं मुखं यस्या' इति विग्रहे निष्पन्नः शब्दोऽयं यौगिकः, तथा च संज्ञात्वाभावान्न ङीष्निषेध इति बोध्यम् ।

### ङीबादेशविधायकं विधिसूत्रम्

**दिक्पूर्वपदान्ङीप् ४ । १ । ६०**

**दिक्पूर्वपदात् स्वाङ्गान्तात् प्रातिपदिकात् परस्य ङीषो ङीबादेशः स्यात् । प्राङ्मुखी । आद्युदात्तं पदम् ।**

(दिक्पूर्वपदात्, ङीप्, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** दिक्पूर्वपदात् प्रातिपदिकाद् विहितस्य ङीषः स्थाने ङीबादेशो भवति ।

प्राङ्मुखीति । 'प्राग् मुखं यस्याः, इति विग्रहे ङीषः स्थाने ङीबादेशे प्राङ्मुखीति । ङीषो ङीब्विधानफलं तु - ङीपः पित्त्वादनुदात्तत्वे बहुव्रीहिप्रकृतिस्वरेणाद्युदात्तत्वम् ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**वाहः ४ । १ । ६१**

**वाहन्तात् प्रातिपदिकाद् ङीष् स्यात् । ङीषेवानुवर्तते न ङीप् । दित्यवाट् च मे । दित्यौही च मे ।**

(वाहः, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** स्पष्टम् । ङीषेवानुवर्तत इति अत्र सूत्रे 'अन्यतो ङीष्' इत्यस्माद् ङीषनुवर्तते दिक्पूर्वपदादित्यतो ङीब्ग्रहणं तु नानुवर्तते, ङीपि ङीषि च स्वरे विशेषो बोध्यः । दित्यवाडिति दित्यं वहतीति विग्रहे 'वहश्च' इति ण्विप्रत्यये उपधावृद्धौ उपपदसमासे दित्यवाह् शब्दाद् ङीषि 'वाह ऊठ्, इत्यूठि 'एत्येधत्यूठ्सु' इति वृद्धौ 'दित्यौही' इति रूपं भवति ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**सख्यशिश्वीति भाषायाम् ४ । १ । ६२**

**इतिशब्दः प्रकारे भाषायाम् इत्यस्यानन्तरं द्रष्टव्यः । तेन छन्दस्यपि क्वचित् । सखी । अशिश्वी । 'आ धेनवो धुनयन्तामशिश्वी' ।**

(सखी अशिश्वी इति भाषायाम्, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** सखिशब्दाद् अशिशुशब्दाच्च स्त्रियां ङीष् निपात्यते भाषायाम् । लौकिकप्रयोगो भाषा । तर्हि वेदे नैव स्यादित्याशङ्कायामाह इतिशब्द इति । इतिशब्दः प्रकारे वर्तते, स च इतिशब्दो भाषायामित्यस्यानन्तरं संनिवेश्यते, ततश्च भाषायां वेदे चेति फलितम् । भाषाग्रहणसामर्थ्याद् भाषायां सर्वत्र भवति, वेदे तु क्वचिदिति गम्यते । सखीति सखीशब्दाद् ङीषि भसंज्ञायामिकारलोपे 'सखी' इति भवति । अशिश्वीति । 'न विद्यते शिशुर्यस्याः' इति विग्रहे अशिशुशब्दाद् ङीषि, उकारस्य यणि 'अशिश्वी' इति भवति ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**जातेरस्त्रीविषयादयोपधात् ४ । १ । ६३**

**जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् ।**

(जातेः, अस्त्रीविषयाद्, अयोपधात्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** जातिवाचि यत् प्रातिपदिकं न च स्त्रियामेव नियतम् अस्त्रीविषयमयोपधञ्च तस्मात् स्त्रियां ङीष्प्रत्ययो भवति ।

**आकृतिग्रहणा जातिः**

**अनुगतसंस्थानव्यङ्ग्चेत्यर्थः । तटी ।**

**लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या ।**

**'असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः' इति लक्षणान्तरम् । वृषली । सत्यन्तं किम् ? शुक्ला । सकृदित्यादि किम् ? देवदत्ता ।**

**गोत्रं च चरणैः सह ।**

**अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः । औपगवी । कठी । कलापी । बह्वृची । ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठान् ङीना ङीष् बाध्यते । जातेः किम् ? मुण्डा । अस्त्री विषयात् किम् ? बलाका । अयोपधात् किम् ? क्षत्रिया ।**

**सरलार्थः–** अत्र प्रसङ्गाज्जातिलक्षणविषये विचार्यते- आकृतिग्रहणा जातिरिति प्रथमं जातिलक्षणमिदम् । आकृतिः = अवयवसंनिवेशविशेषः गृह्यतेऽनेनेति ग्रहणम् = व्यञ्जकम् । तथा च 'आकृतिः' ग्रहणं यस्या' इति विग्रहे फलितार्थस्तु - सर्वासु घटादितद्व्यक्तिषु एकरूपतत्तदाकारव्यङ्ग्या जातिरिति । 'तटीति'- जलसमीपप्रदेश आकृतिविशिष्टस्तटः, अतस्तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः । तटशब्दस्य जातिवाचित्वादनियतस्त्रीलिङ्गत्वादयोपधत्वाच्च ङीष् भवतीति बोध्यम् । लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्येति द्वितीयं जातिलक्षणम् । अस्य च असर्वलिङ्गत्वे सति कस्याञ्चिद् व्यक्तौ सकृत् कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरित्यर्थः । अस्योदाहरणं 'वृषली' इति । वृषलत्वमसर्वलिङ्गम्, एकस्यां व्यक्तौ वृषलत्वे उपदिष्टे तदपत्यसहोदरादिषु तदुपदेशं विना तस्य सुग्रहत्वात् सकृदाख्यातनिर्ग्राह्यं चेति बोध्यम् । सत्यन्तं किमिति । अत्र लक्षणे असर्वलिङ्गत्वे सतीति किमर्थमिति प्रश्नः, शुक्ला 'बलाका' इति योजनीयम् । शुक्लशब्दस्य विशेष्यनिघ्नतया त्रिलिङ्गत्वाद् असर्वलिङ्गत्वाभावात् शुक्लत्वं न जातिरित्याऽऽशयः । सकृदित्यादि देवदत्तेति- देवदत्तशब्दस्य संज्ञात्वेन नपुंसकलिङ्गहीनतया असर्वलिङ्गत्वेऽपि सकृदाख्यातनिर्ग्राह्यत्वाभावान्न जातित्वमिति । गोत्रं च चरणैः सह इति तृतीयं जातिलक्षणम् । अत्र गोत्रशब्देन अपत्यं विवक्षितम्, चरणशब्दस्तु शाखाध्येतरि प्रसिद्धः । तथा च चरणैः सह गोत्रं जातिरिति लभ्यते । गोत्रं चरणाश्च जातिरिति निष्कर्षः । गोत्रस्योदाहरणम् - औपगवीति । 'उपगोरपत्यं स्त्री' इत्यर्थे उपगुशब्दात् 'तस्यापत्यम्' इत्यणि, आदिवृद्धौ ङीषि 'औपगवी' इति चरणस्योदाहरणम् - कठीति । कठेन प्रोक्तमधीयाना' इत्यर्थे णिनि प्रत्यये तस्य 'कठचरकाल्लुक्' इति लुकि ङीषि कठीति भवति एवं कलापी बह्वृचीत्यादावपि बोध्यम् ।

**योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः** (वा.)

**हयी । गवयी । मुकयी । 'हलस्तद्धितस्य' इति यलोपः "मनोर्जातावञ्यतौ षुक्च" मनुषी । मत्स्यस्य ङ्याम्** (वा) **मत्सी ।**

**सरलार्थः –** हयगवयादीनां योपधत्वेऽपि ङीष् वक्तव्यः । हयी - अश्वा, गवयी - गोसदृशश्चतुष्पाज्जातिविशेषः । मनुष्यशब्दात् स्त्रियां ङीषि 'मनुष्य ई' इति स्थिते 'हलस्तद्धितस्य' इति यकारस्य लोपे 'यस्येति च' इत्यकारलोपे मनुषीति रूपं भवति । मत्सीशब्दस्य सिद्धिप्रक्रिया 'सूर्यतिष्यागस्त्य-' सूत्रे 'मत्स्यस्य ङ्याम्' इति वार्तिकव्याख्यायां द्रष्टुं शक्यते ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च ४ । १ । ६४**

**पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् । ओदनपाकी । शङ्कुलकर्णी । शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली । गोबाली । ओषधिविशेषे रूढा एते ।**

(पाककर्णपर्णपुष्पफलमूलबालोत्तरपदात्, च, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्, जातेः)

**सरलार्थः –** पाकाद्युत्तरपदाज् जातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष्प्रत्ययो भवति ।

### ङीष्प्रत्ययविधायकं विधिसूत्रम्

**इतो मनुष्यजातेः ४ । १ । ६५**

**ङीष् स्यात् । दाक्षी । योपधादपि, उदमेयस्यापत्यं स्त्री औदमेयी । मनुष्येति किम् ? तित्तिरिः ।**

(इतो मनुष्यजातेः, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ङीष्)

**सरलार्थः –** इदन्तान्मनुष्यजातिवाचिनः स्त्रियां ङीष्प्रत्ययो भवति । दाक्षीति । 'दक्षस्यापत्यं स्त्री' इत्यर्थे 'अत इञ्' इति इञ्प्रत्यये अल्लोपे आदिवृद्धौ ङीषि 'यस्येति च' इति इकारस्य लोपे 'दाक्षी' इति । औदमेयीति- उदमेयः कश्चित् तस्यापत्यं स्त्री इत्यर्थे पूर्ववत् प्रक्रियया 'औदमेयी' इति भवति । तित्तिरिरिति- तित्तिरिः पक्षिविशेषः, अत्र सूत्रे मनुष्यजातिरित्युक्तत्वादत्र ङीष् न भवतीत्यपि बोध्यम् ।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**ऊङुतः ४ । १ । ६६**

**उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् । कुरूः । कुरुनादिभ्यो ण्यः** (४।१।१७२)**। तस्य**

**'स्त्रियामवन्ति-'** (४।१।१७६) **इत्यादिना लुक् । अयोपधात् किम् ? अध्वर्युः ।**

(ऊङ्, उतः, मनुष्यजातेः, अयोपधात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** स्पष्टम् । कुरुरिति- 'कुरोरपत्यं स्त्री' इत्यर्थे कुरुशब्दादूङि सवर्णदीर्घे 'कुरूः' इति भवति । अत्रापत्यार्थको ण्यप्रत्ययः कथं न श्रूयते, इत्याशङ्कायामाह- तस्य 'स्त्रियामवन्ति-' इति सूत्रेण लुग् इति ।

**अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम्** (वा.)

**रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव । अलाब्वा । कर्कन्ध्वा । अनयोर्दीर्घान्तत्वेऽपि 'नोङ्धात्वोः'** ६।१।१७५) **इति विभक्त्युदात्तत्वप्रतिषेध ऊङः फलम् । प्राणिजातेस्तु कृकवाकुः । रज्ज्वादेस्तु रज्जुः, हनुः ।**

**सरलार्थः –** रज्ज्वादिभिन्नानामप्राणिजातिवाचकानामपि ऊङ् प्रत्ययो भवति । अत्र उत इति न सम्बध्यते, रज्ज्वादिसदृशानामुवर्णान्तानामेव ग्रहणात् पर्युदासस्य तद्भिन्नतत्सदृश- वाचकत्वादिति । अलाब्वेति- अलाबूशब्दादूङि सवर्णदीर्घे 'अलाबू' इत्यस्मादूङन्तात् तृतीयाया एकवचने टाविभक्तौ यणि अलाब्वा इति ऊदन्तादूङ्विधानं व्यर्थमित्यत आह अनयोरिति । ऊङि कृते 'नोङ् धात्वोः' इति विभक्त्युदात्तत्वप्रतिषेधाय ऊङ्विधानं सार्थकमिति ।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**बाह्वन्तात् संज्ञायाम् ४ । १ । ६७**

**स्त्रियामूङ् स्यात् । भद्रबाहूः । संज्ञायां किम् ? वृत्तबाहुः ।**

(बाह्वन्तात् , संज्ञायाम्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ऊङ्)

**सरलार्थः –** बाह्वन्तात् प्रातिपदिकात् स्त्रियामूङ् स्यात् संज्ञायां गम्यमानायाम् ।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**पङ्गोश्च ४ । १ । ६८**

**पङ्गूः ।**

(पङ्गोः, अनुपसर्जनातद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ऊङ्)

**सरलार्थः –** पङ्गुशब्दात् स्त्रियामूङ्प्रत्ययो भवति स्त्रीत्वे द्योत्ये ।

**श्वशुरस्योकाराकारलोपश्च** (वा.)

**चादूङ् । पुंयोगलक्षणस्य ङीषोऽपवादः । लिङ्गविशिष्टपरिभाषया स्वादयः । श्वश्रूः ।**

**सरलार्थः –** 'श्वशुरस्य स्त्री' इत्यर्थे श्वशुरशब्दादूङ् भवति, रेफादकारस्य शकारादुकारस्य लोपश्च भवति। अत्र पुंयोगलक्षणे ङीषि प्राप्ते तदपवादः 'ऊङ्' इति बोध्यम्। 'श्वशुरस्य स्त्री' इत्यर्थे ऊङ्प्रत्यये रेफादकारस्य शकारादुकारस्य च लोपे 'श्वश्रू' इति जाते प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया प्रातिदिकत्वात् सौ रुत्वे विसर्गे 'श्वश्रूः' इति भवति।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**ऊरूत्तरपदादौपम्ये ४ । १ । ६९**

**उपमानवाचिपूर्वपदमूरूत्तरपदं यत् प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः।**
(ऊरूत्तरपदादौपम्ये, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ऊङ्)

सरलार्थः- उरूत्तरपदात् प्रातिपदिकाद् औपम्ये गम्यमाने स्त्रियामूङ् प्रत्ययो भवति।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**संहितशफलक्षणवामादेश्च ४ । १ । ७०**

**अनौपम्यार्थे सूत्रम्। संहितोरूः। सैव शफोरूः शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षणशब्दादर्शआद्यच् लक्षणोरूः। वामोरूः।**
(संहितशफलक्षणवामादेश्च, अनुपसर्जनाद्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ऊङ्)

**सरलार्थः –** संहित - शफ - लक्षण - वाम इत्येवमादेः प्रातिपदिकादूरूत्तरपदात् स्त्रियामूङ् प्रत्ययो भवति। पूर्वसूत्रेण औपम्ये ऊङ् विधीयते चेदनेन अनौपम्ये इति बोध्यम्।

'संहितौ संश्लिष्टौ ऊरू यस्या' इति विग्रहः। 'लक्षणौ ऊरू यस्याः' इति लक्षणोरूः। 'वामौ = सुन्दरौ ऊरू यस्या' इति विग्रहे वामोरूः इति भवति।

**सहितसहाभ्यां चेति वक्तव्यम्** (वा.)

**सरलार्थः –** सहित-सहशब्दाभ्यां परो य ऊरुशब्दः, तस्मादपि ऊङ्प्रत्ययो भवति।

हितेन सहितौ ऊरू यस्याः सा सहितोरूः। सहेते इति सहौ ऊरू यस्याः सा सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः।

### ऊङ्प्रत्ययविधायकं विधिसूत्रम्

**संज्ञायाम् ४ । १ । ७२**

**कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् स्यात्। कद्रूः। कमण्डलूः। संज्ञायां किम्? कमण्डलुः। अच्छन्दोऽर्थं वचनम्।**

(संज्ञायाम्, कद्रुकमण्डल्वोः, ऊङ्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** संज्ञायां गम्यमानायां कद्रुकमण्डलुशब्दाभ्यामूङ्प्रत्ययो भवति स्त्रियाम् ।

इतः पूर्वं 'कद्रुकमण्डल्वोश्छन्दसि' इति सूत्रं पठितं तस्य छन्दोविषयत्वादच्छन्दोऽर्थं सूत्रमिदं बोध्यम् । 'कद्रूः' नागानां माता । कमण्डलूरिति कस्यचिन्मृगस्य नाम ।

### ङीन्प्रत्ययविधायकं विधिसूत्रम्

**शार्ङ्गरवाद्यञो ङीन् ४ । १ । ७३**

**शार्ङ्गरवाद्यञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात् । शार्ङ्गरवी । बैदी । 'जाते' इत्यनुवृत्ते- पुंयोगे ङीषेव ।**

(शार्ङ्गरवाद्यञो ङीन्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन्प्रत्ययो भवति ।

'शृङ्गरोपत्यं स्त्री' इत्यर्थेऽपत्यार्थके अणि आदिवृद्धौ रपरत्वे 'ओर्गुणः' इति गुणे जातित्वाद् 'जातेरस्त्री-' इति ङीषि प्राप्ते 'शार्ङ्गरवाद्यञो ङीन्' इति ङीनि शार्ङ्गरवीति भवति । एवं बिदस्यापत्यं स्त्री बैदी ।

**नृनरयोर्वृद्धिश्च (ग.सू.) नारी ।**

**सरलार्थः –** नृनरयोर्वृद्धिर्भवति चकाराद् ङीन् च भवतीति बोध्यम् । नृशब्दाद् 'ऋन्नेभ्यो ङीप्' इति ङीपं प्रबाध्यानेन ङीनि वृद्धौ रपरत्वे 'नारी' इति, नरशब्दात्तु जातिलक्षणे ङीषि प्राप्ते अनेन गणसूत्रेण ङीनि वृद्धौ रपरत्वे 'नारी' इति भवति ।

### चाप्प्रत्ययविधायकं विधिसूत्रम्

**यङश्चाप् ४ । १ । ७४**

**यङन्तात् स्त्रियां चाप् स्यात् । यङिति ष्यङ्ष्यङोः सामान्यग्रहणम् । आम्बष्ठ्या । कारीषगन्ध्या ।**

(यङः, चाप्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** यङन्तात् प्रातिपदिकात् स्त्रियां चाप्प्रत्ययो भवति ।

आम्बष्ठ्येति- 'अम्बष्ठस्यापत्यं स्त्री' इत्यर्थे 'वृद्धेत्कोसल-' इति ञ्यङ्प्रत्यये आदिवृद्धौ आम्बष्ठ्यशब्दाच्चापि 'आम्बष्ठ्या' इति भवति । कारीषगन्ध्येति- करीषं गवादिपशुपुरीषं तस्येव गन्धो यस्य स करीषगन्धिः 'उपमानाच्च' इति गन्धस्य इकारोऽन्तादेशः । 'करीषगन्धेः गोत्रापत्यं स्त्री' इत्यर्थे अण् प्रत्यये तस्य 'अणिञोरनार्षयोः-' इति ष्यङादेशे चापि 'कारीषगन्ध्या' इति ज्ञेयम् ।

**षाद्यञश्चाब्वाच्यः (वा.) शार्कराक्ष्या । पौतिमाष्या ।**

**सरलार्थः –** षकारात् परो यो यञ् तदन्तादपि चाप् भवति । 'शर्कराक्षस्यापत्यं स्त्री' इत्यर्थे गर्गादिभ्यो यञ् आदिवृद्धौ चापि शार्कराक्ष्या इति ।

### चाप्प्रत्ययविधायकं विधिसूत्रम्

**आवट्याच्च ४ । १ । ७५**

**अस्माच्चाप् स्यात् । 'यञश्च' इति ङीपोऽपवादः ।**

**अवटशब्दो गर्गादिः, आवट्या ।**

(आवट्यात्, च, चाप्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्)

**सरलार्थः –** आवट्यात् शब्दात् स्त्रियां चाप्प्रत्ययो भवति ।

आवट्येति । 'अवटस्यापत्यं स्त्री' इत्यर्थे अवटशब्दस्य गर्गादित्वाद्यञि आदिवृद्धौ अकारस्य लोपे आवट्यशब्दाच्चापि आवट्या' इति भवति ।

### अधिकारसूत्रम्

**तद्धिताः ४ । १ । ७६**

**आपञ्चमसमाप्तेरधिकारोऽयम् ।**

**सरलार्थः –** इत ऊर्ध्वं पञ्चमाध्यायपर्यन्तं वक्ष्यमाणाः प्रत्ययाः तद्धितसंज्ञकाः प्रत्येतव्याः ।

### तिप्रत्ययविधायकं विधिसूत्रम्

**यूनस्तिः ४ । १ । ७७**

**युवन्शब्दात् तिप्रत्ययः स्यात्, स च तद्धितः । लिङ्गविशिष्टपरिभाषया सिद्धेस्तद्धिताधिकार उत्तरार्थः ।**

**युवतिः** । अनुपसर्जनादित्येव । बहवो युवानो यस्यां सा बहुयुवा । युवतीति तु यौतेः शत्रन्तान् ङीपि बोध्यम् ।

(यूनः, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च, स्त्रियाम्, ति)

**सरलार्थः –** युवन्शब्दात् स्त्रियां तिप्रत्ययो भवति ।

इदं सूत्रम् 'ऋन्नेभ्यः-' इत्यस्यापवादः । अत्र 'तद्धिताः' इत्यधिकारो व्यर्थः लिङ्गविशिष्टपरिभाषयैव तिप्रत्ययान्तात् सुबुत्पत्तेरिति जिज्ञासायामाह तद्धिताधिकार उत्तरार्थ इति । युवतिरिति युवन्शब्दात् तिप्रत्यये 'स्वादिष्वसर्वनामस्थाने'

इति पदत्वाद् 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे सौ रुत्वे विसर्गे युवतिरिति । तिप्रत्ययोऽपि अनुपसर्जनादेव भवति । तेन बहवो युवानो यस्यामित्यत्र युवन्शब्दस्योपसर्जनत्वान्न तिप्रत्ययः, किन्तु 'डाबुभाभ्याम्-' इति डापि 'बहुयुवा' इति रूपं बोध्यम् । कथं तर्हि 'युवती' इति ईकारान्तपाठः काव्यादौ उपलभ्यत इति जिज्ञासायामाह- 'यु मिश्रणे' इत्यस्माद्धातोर्लटि शतरि, शपो लुकि, उवङि, उगित्त्वाद्, 'उगितश्च' इति ङीपि 'युवती' शब्दो निष्पद्यते तस्य तत्र ग्रहणं बोध्यम् ।

## विशेषाध्ययनम्

१. जातिलक्षणविषये 'नित्यमेकमनेकानुगतं सामान्यम्' जातिरिति नैयायिकैर्यल्लक्षणं स्वीक्रियते तस्य शुक्लत्वादौ गुणेऽतिव्याप्तिः, औपगवी, कठी, इत्यादावव्याप्तिश्च स्यात् । जननेन प्राप्यते या सा जातिरिति स्वीकारे युवत्यादावव्याप्तिः, अतः पूर्वोक्तदोषपरिहाराय आकृतिग्रहणा जातिः, लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह । इति त्रिविधं जातित्त्वमिह स्वीक्रियते ।

## प्रयोगसिद्धिप्रकारः

**कल्याणक्रोडा**

'कल्याणी क्रोडा यस्याः' इति विग्रहे बहुव्रीहिसमासे 'स्त्रियाः पुंवत्-' इति सूत्रेण पुंवद्भावे स्त्रीत्वविवक्षायां 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङीषि प्राप्ते 'न क्रोडादिबह्वचः' इति निषेधे टापि सवर्णदीर्घे स्वादिकार्ये 'कल्याणक्रोडा' इति सिद्ध्यति ।

**वामोरूः**

'वामौ ऊरू यस्याः' इति विग्रहे वामोरुशब्दात् 'संहितशफलक्षणवामादेश्च' इति ऊङ् प्रत्ययेऽनुबन्धलोपे सवर्णदीर्घे लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वात् स्वादिकार्ये 'वामोरूः' इति सिद्ध्यति ।

## अभ्यासः

### १. अधालिखितानां प्रश्नानामुत्तराणि देयानि

(क) 'न क्रोडादिबह्वचः' इति सूत्रं किं करोति ?

(ख) 'सकेशा' इत्यत्र ङीषो निषेधः केन सूत्रेण ?

(ग) आकृतिग्रहणा जातिरित्यस्योदाहरणं किम् ?

(घ) असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरिति लक्षणे सत्यन्तं किमर्थम् ?

(ङ) तृतीयं जातिलक्षणं सोदाहरणं विलिखत ।

(च) 'श्वशुरस्योकारलोपश्च' इत्यत्र चकारेण किं गृह्यते ?

(छ) चाप्प्रत्ययविधायकं सूत्रं किम् ?

### २. अधोलिखितानां सूत्राणामर्थं निर्दिशत

(क) नखमुखात् संज्ञायाम् ।

(ख) जातेरस्त्रीविषयादयोपधात् ।

(ग) इतो मनुष्यजातेः ।

(घ) संहितशफलक्षणवामादेश्च ।

(ङ) संज्ञायाम् ।

### ३. अधस्तनवार्तिकानामर्थं प्रकाशयत

(क) योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः ।

(ख) श्वशुरस्योकाराकारलोपश्च ।

(ग) सहितसहाभ्यां चेति वक्तव्यम् ।

(घ) षाद्यञश्चाब्वाच्यः ।

### ४. निर्दिष्टप्रयोगाणां साधुत्वं दर्शयत

सुजघना, शूर्पणखा, वृषली, औपगवी, शङ्खपुष्पी, कुरूः, संहितोरूः, कारीषगन्ध्या ।

### ५. समुचितेषु कथनेषु (✓) चिह्नं तथा असमुचितेषु कथनेषु (X) चिह्नं दर्शयत

(क) 'ताम्रं मुखं यस्याः' इति विग्रहेऽसंज्ञात्वाद् 'नखमुखात् संज्ञायाम्' इत्यस्य प्रवृत्तिर्न ।

(ख) ङीषि ङीपि च स्वरे विशेषो नास्ति ।

(ग) तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः ।

(घ) 'गोत्रञ्च चरणैः सह' इत्यत्र गोत्रशब्देन अपत्यं विवक्षितम् ।

(ङ) पङ्गुशब्दात् स्त्रियामूङ्प्रत्ययो भवति ।

(च) 'यङश्चाप्' इति सूत्रे यङ्पदेन ञ्यङ्ष्यङोः सामान्यग्रहणं भवति ।

(छ) बहवो युवानो यस्या इति विग्रहे 'यूनस्तिः' इत्यस्य प्रवृत्तिर्भवति ।

### ६. रिक्तस्थानं पूरयत

(क) क्रोडादिगणपठितेभ्यः ... ... ... न भवति ।

(ङीष्, ङीप्)

(ख) 'शूर्पणखा' इत्यत्र ... ... ... इति सूत्रेण णत्वं भवति ।

(पूर्वपदात् संज्ञायामगः, अट्कुप्वाङ्नुम्व्यवायेऽपि)

(ग) आकृतिग्रहणा जातिरिति ... ... ... जातिलक्षणम् ।

(द्वितीयम्, प्रथमम्)

(घ) वृत्तबाहुरित्यत्र ऊङ् ... ... ... ।

(भवति, न भवति)

(ङ) यौतेः शत्रन्तान् ङीपि ... ... ... भवति ।

(युवती, युवतिः)